ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ /1220/583/ છ, તા. 29/08/2020 - થી મંજૂર

# अनिवार्यसंस्कृतव्याकरणम्

## मध्यमा २

## (ધોરણ 12)

**प्रतिज्ञापत्रम्**

भारतं मम देशः।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति।
मम मानसे देशस्पृहा अस्ति। समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि।
प्रत्येकेन सह शिष्टव्यवहारं करिष्यामि।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति।

**मूल्य : ₹ 20.00**

नमसो मा ज्योतिर्गमय
**गुजरातराज्यशालापाठ्यपुस्तकमंडलम्**
**'विद्यायनम्', सेक्टर 10-ए, गान्धीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यशालापाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषयमार्गदर्शनम्**
डॉ. कृष्णप्रसाद निरौला

**लेखनम्**
श्री अर्जुनकुमारः सामलः (कन्वीनर)
डॉ. पुनितः वी, शीलु
श्री प्रदिपः एम. जोषी

**समीक्षणम्**
डॉ. अश्विनभाई का. राजगोर
डॉ. अत्रि न. राजगोर
डॉ. रविशङ्कर के. राजगोर

**भाषाशुद्धि**
डॉ. रघुभाई डी. जोषी

**संयोजनम्**
डॉ. क्रिश्ना दवे
(विषय-संयोजक : अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामक : शैक्षणिकः)

**मुद्रणायोजनम्**
श्री हरेश एस. लीम्बाचीया
(उपनियामक : उत्पादन)

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **अनिवार्यसंस्कृत-व्याकरणम् मध्यमा-२ (धोरण 12)** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव॥

**पी. भारती** (IAS)
नियामकः — कार्यवाहकप्रमुखः
ता. 26-10-2020 — गान्धीनगरम्

प्रथमावृत्ति : 2020
**प्रकाशक :** गुजरात-राज्य-शाला-पाठ्यपुस्तक-मण्डल, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रतिनिध्येन पी. भारती, नियामकः
**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

(क) संविधानं प्रति प्रामाणिकत्वम्, आदर्शत्वं संस्थानां राष्ट्रध्वजस्य, राष्ट्रियगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अस्माकं राष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य, एकतायाः, अखण्डिततायाश्च समर्थनं।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धुत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां, तडागानां, नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानिकमानसाय, मानवतावादाय, जिज्ञासायै भावनाभिगमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं, हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६ तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

---

* भारतीय संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | |
|---|---|
| १. व्याकरणलक्षणम् | 1 |
| २. अष्टविधं व्याकरणम् | 3 |
| ३. समासपरिचयः | 5 |
| ४. नामधातुप्रकरणम् | 19 |
| ५. कण्ड्वादिप्रकरणम् | 24 |
| ६. आत्मनेपदप्रकरणम् | 25 |
| ७. परस्मैपदप्रकरणम् | 30 |
| ८. भावकर्मप्रकरणम् | 33 |
| ९. कर्मकर्तृप्रकरणम् | 37 |
| १०. लकारार्थ-प्रकरणम् | 38 |
| ११. कृत्यप्रकरणम् | 41 |
| १२. पूर्वकृदन्तप्रकरणम् | 48 |
| १३. उत्तरकृदन्तप्रकरणम् | 69 |
| १४. विभक्त्यर्थप्रकरणम् | 82 |
| १५. तर्कसंग्रहः | 89 |
| ● सूत्रसूचिः वार्तिकसूचिश्च | 110 |

# १ व्याकरणलक्षणम्

व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्। वि आङ् इत्युपसर्गद्वयपूर्वकात् - कृ धातोः करणार्थे ल्युट् प्रत्यये व्याकरणशब्दः निष्पद्यते। महामुनिः भाष्यकारः पतञ्जलिः शब्दानुशासनमिति व्याकरणस्य अन्वर्थं मन्यते। अनुशिष्यते असाधुशब्देभ्यो विविच्य बोध्यन्ते शब्दाः इत्यनुशासनम्। शब्दानाम् अनुशासनं शब्दानुशासनम्।

वस्तुतः ''शब्दानुशासनम्'' पाणिनिप्रणीतायाः अष्टाध्याय्याः संज्ञा वर्तते। अतः शब्दानुशासनं नाम शास्त्रमिति भाष्यकारः। महाभाष्ये सुन्दरं व्याकरणलक्षणं प्रदत्तमस्ति यथा ''यदि शब्दो व्याकरणं ल्युडर्थो नोपपद्यते न हि शब्देन किञ्चिद् व्याक्रियते सूत्रेणैव शब्दाः व्याक्रियन्ते। सूत्रतः एव शब्दाः प्रतिपद्यन्ते सूत्रं व्याकरणमिति सिद्धम् ''शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्-व्यवहारतश्च'' इत्युक्त्या प्राधान्येन व्याकरणादेव। ''षडङ्गो वेदोऽध्येयो ज्ञेयश्च'' विधिश्रवणात् षड्भिरङ्गैः संवलितस्यैव वेदस्य तत्त्वज्ञानं निःश्रेयसाधनमभिमतम्। तेषु अङ्गेषु -

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।**
**ज्योतिषामयनं चक्षुर्निरूक्तं श्रोत्रमुच्यते॥**

**शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीपते॥ (पाणिनीयशिक्षायाम् 41/42)**

शरीरावयवेषु मुख्यमङ्गं मुखमिव वेदाङ्गेषु व्याकरणमेव प्रधानमङ्गं वर्तते। वाक्यपदीपस्य ब्रह्मकाण्डे भर्तृहरिणा अपि सूचितम्

**आसन्नब्रह्मणस्तस्य तपसामुत्तमं तपः।**
**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः॥ (वाक्यपदियम् 1/11)**

वेदरूपस्य ब्रह्मणः समीपस्थं साधुप्रकारबोधद्वारा तपसां=ब्रह्मचर्य-चान्द्रायण-स्वाध्याय-सत्यभाषण-योगाभ्यासादीनां मध्ये उत्तमं=दृष्टादृष्टफलजनकतया तपः वर्तते। अथ च छन्दसां=वेदानां प्रथमं=मुखम् अङ्गं - व्याकरणमिति, बुधाः=ऋषयः, प्राहुः वदन्ति।

व्याकरणं केवलं वेदपुरुषस्य मुखमेव न अपि तु समस्तशास्त्राणामुपकारकत्वात् श्रेष्ठतमं वर्तते। अतः एव कश्चित् पिता पुत्रं व्याकरणं पठितुं प्रेरयन् वदति-

**यद्यपि बहु नाधीषे तथापि पठ पुत्र व्याकरणम्।**
**स्वजनः श्वजनो मा भूत् सकलं शकलं सकृच्छकृत्॥**

स्वजनः=आत्मीयजनः। श्वजनः=शुनकः। सकलं=सम्पूर्णम्। शकलं=खण्डः। सकृत्=एकवारं। शकृत्=विष्ठा।

रामायणे, गोपथब्राह्मणे, मुण्डकोपनिषदि शब्दशास्त्रस्य कृते व्याकरणशब्दस्य प्रयोगः दृश्यते।

रामायणे -

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**
**बहुव्याहरतानेन न किञ्चिदपभाषितम्॥ (वा. रा. 4.3.29)**

हनुमतः विषये रामस्योक्तिरियम्।

गोपथब्राह्मणे -

ओम्कारं पृच्छामः को धातुः, किं प्रातिपदिकं, किं नामाख्यातं, किं लिङ्गं, किं वचनं, का वभक्तिः, कः प्रत्ययः, कः स्वरः, उपसर्गो निपातः, किं वैय्याकरणं, को विकारः, को विकारी, कति मात्राः, कति वर्णाः, कति पदः, कः संयोगः, किं स्थाननादानुप्रदानानुकरणम् इति। अनेन प्रकारेण शब्दानुशासनविषये व्याकरणस्य सर्वश्रेष्ठस्थानं प्रतिपादितम्।

व्याकरणशास्त्रम् आयुर्वेदः इव वाङ्मलानां चिकित्सकं सर्वविद्याधिविद्यं सर्वविद्यापवित्रं सत् मोक्षार्थपरमपुरुषार्थप्राप्तये एकः ऋजुः पन्थाः। लोके सर्वविद्याः शब्दैः निबद्धाः सन्ति। अतः एव सर्वासां विद्यानां

शक्तिग्रहः सत् व्याकरणं वेदज्ञानद्वारा मोक्षस्य द्वारभूतमस्ति। मोक्षकामायमानानां कृते सिद्धिसोपानपर्वणाम् आद्यं पदस्थानम्, अकुटिलो राजमार्गः वर्तते। तेनैव ब्रह्मसाक्षात्कारोऽपिजायते। यथोक्तंभर्तृहरिणा -

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम्।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते॥ वाक्यपदीयम् ( 1/14 )**
**इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् -**
**इयं सा मोक्षमार्गाणामजिह्मा राजपद्धतिः॥ वाक्यपदीयम् ( 1/16 )**

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा उत्तराणि लिखत।**

(1) व्याकरणस्य अन्वर्थः ....... । (शब्दानुशासनम्, शब्दः, परिभाषा)

(2) वेदस्य ....... अङ्गानि। (5, 6, 7)

(3) यद्यपिवहुनाधीषे तथापि पठ पुत्र .......। (साहित्यम्, व्याकरणम्, ज्योतिषम्)

(4) अत्र व्याकरणे ब्रह्मशब्दस्य ....... अर्थः ? (ब्राह्मणः, ब्रह्मा, शब्दः)

(5) स्वजनस्यार्थः ....... भवति। (आत्मीयजनः, परकीयः, अन्यः)

**2. लघूत्तराणि देयानि -**

(1) निःश्रेयः साधनं किमभिमतम् ?

(2) वाङ्गमलानां चिकित्सितं किम् ?

(3) भाष्ये व्याकरणं नाम किमुक्तम् ?

(4) शब्दानुशासनम् इत्यस्य का व्युत्पत्तिः ?

**3. अधोलिखितानां प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) तद्द्वारमपवर्गस्य इतिश्लोकं लिखित्वा अर्थं लिखत।

(2) गोपथब्राह्मणे व्याकरणविषये किं लिखितम् ?

(3) पिता पुत्रं व्याकरणं पठितुं प्रेरयन् किं वदति ?

(4) भर्तृहरिणा किमुक्तं तपोविषये ?

●

# २ अष्टविधं व्याकरणम्

शब्दानुशासनविषये अनेकाः शाखाः प्रादुरभूवन्। श्रूयन्ते च शब्दशास्त्रप्रणेतॄणां नैकेषामाचार्याणां नामानि। तदुक्तं च वोपदेवेन इन्द्रश्चन्द्रः काशकृत्स्नापिशलीशाकटायनः। पाणिन्यमरजैनेन्द्रा जयन्त्यष्टादिशाब्दिकाः॥

इन्द्रः, चन्द्रः, काशकृत्स्नः, आपिशलिः, शाकटायनः, पाणिनिः, अमरः, जैनेन्द्रः इति अष्टौ वैय्याकरणाः सन्ति इति। एवं वोपदेवेन अष्टानां वैय्याकरणानां नामानि प्रदत्तानि।

वाल्मीकीये रामायणे उत्तरखण्डे नव व्याकरणानामुल्लेखः लभ्यते। किन्तु तेषां नामानि नोपलभ्यन्ते। पुनश्च श्रौतनिधिनामके ग्रन्थे अपि नव-वैय्याकरणानां नामानि निर्दिष्टानि इन्द्रचन्द्रकाशकृत्स्न-कुमार-शाकटायनाः सारस्वत आपिशलः शाकल्यः पाणिनिश्चेति। पाणिनिः स्वप्रणीते अष्टाध्यायीग्रन्थे स्वपूर्वतनानां दशविधाचार्याणां स्मरणं करोति।

(1) व्योर्लघुप्रयत्नतरः शाकटायनस्य 8/3/18 ॥ (1) शाकटायनः

(2) लोपःशाकल्यस्य 8/3/19॥ (2) शाकल्यः

(3) वा सुप्यापिशले 6/1/92॥ (3) आपिशलिः

(4) ई ३ चाक्रवर्मणस्य 6/1/130॥ (4) चाक्रवर्मणः

(5) अड्गार्ग्यगालवयोः 7/3/99॥ (5) गार्ग्यः (6) गालवः

(6) तृषि-मृषि कृशेः काश्यपस्य 1/2/25॥ (7) कश्यपः

(7) अवङ् स्फोटायनस्य 6/1/23॥ (8) स्फोटायनः

(8) ऋतो भारद्वाजस्य 7/2/63॥ (8) भारद्वाजः

(9) गिरेश्च सेनकस्य 5/4/112 ॥ (10) सेनकः

युधिष्ठिर मीमांसकमहोदयेन तु पाचीनानां पञ्चाशीतिवैय्याकरणानां वर्णनं कृतम्। अर्वाचीनास्तु प्रधानतया अष्टनां वैय्याकरणानां समुल्लेखं कुर्वन्ति।

तत्र हैमवृध्दवृत्यवचूर्णिकानामके ग्रन्थे अष्टानां वैय्याकरणानाम् उल्लेखः विद्यते।

ब्राह्म-ऐशान-ऐन्द्र=प्राजापत्य-बाार्हस्पत्य-त्वाष्ट-आपिशल-पाणिनीय इत्येतेषामष्टानां व्याकरणग्रन्थानामुल्लेखः विहितः। कन्तु सर्वेषु व्याकरणेषु महेश्वरप्रसादात् पाणिनिप्रणीतव्याकरणशास्त्रमेव श्रेष्ठं सारवत्तरमिति सर्वैरपि अङ्गीक्रियते।

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्। सर्वोपकारं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन।** यद्यपि अद्यत्वे जैनेन्द्र-सुबोध-कातन्त्राद्यभिधानानि विविधानि व्याकरणानि उपलभ्यन्ते तथापि नैव तेषां वेदाङ्गत्वम्। निखिललौकिकालौकिकशब्दानां व्युत्पादकतया पाणिनीयव्याकरणमेव सर्वेषां मूर्धन्यं धन्यं च सन् वेदाङ्गत्वमाधत्ते।

यथोक्तं महाभाष्ये - ''इदमक्षरं छन्दोवर्णशः समनुक्रान्तं ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय, इन्द्रो भारद्वाजाय, भारद्वाजः ऋषिभ्यः ऋषयः ब्राह्मणेभ्यः। तं खल्विममक्षरसमाम्नायमित्याचक्षते। न भुक्त्वा न नक्तं ब्रूयात् ब्रह्मराशिः'' ऋकृतन्त्रव्याकरणोक्तरीत्याक्षररूपस्यास्य चतुर्दशसूत्र-समूहस्य आम्नायत्वं निष्पद्यते। तन्मूलकत्वाच्च इदं वेदशरीरम् (वेदाङ्गम्) अभ्युपगम्यते। येनाक्षरसमाम्नायमधिगम्य महेश्वरात्। इति शिक्षावचनानुसारं महेश्वरप्रसादात् अक्षरसमाम्नायमधिगम्य पाणिनिना सूत्राष्टाध्यायीनामकं शब्दानुशासनं प्रणीतम्। तच्च -

लौकिकवैदिकशब्दानां व्युत्पादनसमर्थं सत् सकलानि अपि व्याकरणानि अतिशेते। **त्रीणि सूत्रसहस्राणि तथा नवशतानि च। षट् च षष्टिश्च सूत्राणि कृतवान् पाणिनि स्वयम्।** इत्युक्त्या अष्टाध्यायीग्रन्थे 3966 सूत्राणि सन्ति। इदानीं सिद्धान्तकौमुद्यां 3998 सूत्राणि उपलभ्यन्ते।

पाणिनिः वेदरक्षणमेव प्रमुखं प्रयोजनं मन्वानः। व्याकरणं रचयामास।

भाष्यकारेणापि शब्दानुशासनस्य **रक्षोहागमलध्वसन्देहाः प्रयोजनम्** इत्युक्तम्। उक्तेषु मुख्यप्रयोजनेषु वेदरक्षा एव प्रथमप्रयोजनत्वेन निर्दिष्टमस्ति पराशरपुराणे अपि उक्तम् -

पाणिनीयं महाशास्त्रं शब्दसाधुत्वलक्षणम्
सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन।

## स्वाध्यायः

**1. विकल्पं चित्वा रिक्तस्थानं पूरयत।**

(1) व्याकरणं ....... विधिमस्ति। (9, 8, 6)

(2) भाष्यकारेण मुख्यप्रयोजनानि ....... उक्तानि। (5, 6, 13)

(3) अष्टाध्यायी ग्रन्थे ....... सूत्राणि सन्ति। (3966, 4965, 3998)

(4) व्याकरणं ....... अस्ति (पादौ, चक्षुः, मुखम्)

(5) महाभाष्यस्य रचयिता ....... अस्ति (पाणिनिः, कात्यायनः, पतञ्जलिः)

**2. लघूत्तराणि देयानि।**

(1) वोपदेवेन कतिविधं व्याकरणमुक्तम्।

(2) कदा न ब्रूयात् ब्रह्मराशिः ?

(3) पाणिनीयव्याकरणस्य वेदाङ्गत्वं कथम् ?

(4) युधिष्ठिरमीमांसकेन कति वैय्याकरणानां वर्णनं कृतम् ?

**3. अधोलिखितानां प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) पाणिनिः अष्टाध्यायीग्रन्थे केषामाचार्याणां स्मरणं करोति ?

(2) श्रोतनिधिनामके ग्रन्थे कानि व्याकरणानि निर्दिष्टानि ?

(3) हैमबृहत् चूर्णिकानामके ग्रन्थे केषामष्टानां वैय्याकरणानामुल्लेखः कृतः ?

(4) पाणिनिप्रणीतव्याकरणस्य कथं वेदाङ्गत्वं सविस्तरं लिखत ?

•

| ३ | # समासपरिचयः |
|---|---|

समसनं समासः। अनेकपदानाम् एकपदीकरणं समासः उच्यते। अर्थः भवति - संक्षेपीकरणं न्यूनीकरणं मेलनं वा। यथा नराणां पति नरपतिः।

समासयुक्तस्य शब्दस्य विभाजनं कृत्वा अर्थानुसारं योग्य विभक्तिवचनानां स्थापनं कृत्वा पृथक् पृथक् क्रियते तदा विग्रहः उच्यते? यथा सभापतिः इति समस्तपदस्य विग्रहः सभायाः पतिः (सभा +ङस् पति + सु)। विग्रहः द्विविधः भवति - स्वपदविग्रहः अस्वपदविग्रहः

(1) समासघटकपदसहितं वाक्यं स्वपदविग्रहः।

(2) समासघटकपदरहितं वाक्यं अस्वपदविग्रहः।

उदाहरणम् -

**रामबाणः** रामस्य बाणः इत्यत्र रामस्य बाणः इति पदद्वयं समासघटकम् अस्ति। अतः स्वपदविग्रहः।

**उपकृष्णम्** - कृष्णस्य समीपम् इत्यत्र ''समीपम्'' इति पदं समासघटकं नास्ति। अतः अस्वपदविग्रहः।

यस्य पदस्य अर्थः प्रायः क्रियया सह अन्वितः भवति सः अर्थः प्रधानः उच्यते। समस्ते पदे क्रियापदस्य उच्चारणं करणीयं यथा ''राजपुरुषः गच्छति''। अत्र राजन् इति पूर्वपदं दूतः इति उत्तरपदं गच्छति इति क्रियापदेन (गमनक्रियया) ''दूतः'' इति पदस्य अर्थः अन्वितो अर्थात् राजसम्बन्धी दूतः गच्छति इति उत्तरपदस्य अर्थः प्रधानः वर्तते अतः उत्तरपदप्रधानः तत्पुरुषः कथ्यते। तथैव कर्मकुशलः गच्छति अत्र कुशलपदं गच्छति क्रियया सह अन्वितं भवति अतः तत्पुरुषः। प्रायः पूर्वपदार्थः प्रधानः अव्ययीभावः।

उपगृहम् - गृहस्य समीपम् इति अस्वपदविग्रहे उप इति पूर्वपदस्य सामीप्यार्थप्रधानः अस्ति। समासे जाते उप इति अव्ययं पदं पूर्वं भवति। अतः पूर्वपदार्थप्रधानः अव्ययीभावः।

(3) **अन्यपदार्थप्रधानो बहुव्रीहिः''** अन्यपदं समासस्य अघटकपदं क्रियया सह अन्वितं भवति तदा बहुव्रीहिः उच्यते।

पीतं क्षीरं येन सः पीतक्षीरः (शिशुः) इत्यत्र पीतशब्दस्य क्षीरशब्दस्य च पानक्रियया चक्रपाणिः गच्छति इत्यस्मिन् सह अन्वयः न भवति किन्तु समासे अघटकपदस्य शिशुपदस्य (अन्यपदस्य) अर्थः अन्वितः भवति। तथैव चक्रपाणिः गच्छति इत्यस्मिन् चक्रं पाणौ यस्य सः चक्रपाणिः (विष्णुः)। अत्र चक्रशब्दस्य पाणिशब्दस्य च गच्छति क्रियया सह अर्थः अन्वितः न भवति। किन्तु विष्णुः इति समाससाधकपदस्य अर्थः अन्वितो भवति॥

(4) **उभयपदार्थप्रधानः द्वन्द्वः**

उभयोः पदार्थयोः क्रियया सह अन्वयः भवति तदा द्वन्द्वः उच्यते।

रामश्च कृष्णश्च तौ रामकृष्णौ गच्छतः इत्यत्र गमन क्रियायाम् उभयोः पदार्थयोः अन्वयः अतः द्वन्द्वः।

कर्मधारयः द्विगुश्च द्वौ अपि तत्पुरुषस्य भेदौ एव।

(5) **केवलसमासः** - सामान्यसमासः (विशेषसंज्ञाविनिर्मुक्तः केवलसमासः) अव्ययभावादिरूपाः विशेषसंज्ञाः ताभिः विनिर्मुक्तः (रहितः) केवलसमासः। यथा पूर्वं भूतः - भूतपूर्वः।

वाक् च अर्थश्च तौ इव - वागर्थाविव

इत्थं पञ्चधा समासः।

**अव्ययीभावसमासः**

अव्ययीभावसमासे प्रथमशब्दः अव्ययः - उपसर्गः वा निपातः भवति। द्वितीयशब्दः संज्ञावाचकः द्वयोः समासे कृते अव्ययपदं भवति ''अव्ययीभावसमासे सति'' ''अव्ययीभावश्च'' इति सूत्रेण - नमपुंसकसंज्ञायां प्रथमायाः एकवचनमेव सप्तसु विभक्तिषु रूपं भवति। उपकृष्णम् उपकृष्णम् इत्येव सर्वत्र॥ अव्यं विभक्ति समीप-समृद्धि-व्यृद्ध्यर्थाभावात्यया-सम्प्रति-शब्दप्रादुर्भाव-पश्चाद्-यथानुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति साकल्यान्तवचनेषु''

इति सूत्रेण अव्ययीभावे विभक्ति - समीपादिषु अर्थेषु समासः भवति। विभक्तौ - (सप्तम्यर्थे)

''हरौ इति'' अस्वपदविग्रहे = अधिहरि (हरिविषये)

''जले इति'' अस्वपदविग्रहे = अधिजलम् (जलमध्ये)

गृहे इति ............................................................

**समीपार्थे -**

| | |
|---|---|
| गङ्गायाः समीपम् अस्वपदविग्रहे = उपगङ्गम् | यमुनायाः समीपम् = ............. |
| कृष्णस्य समीपम् = उपकृष्णम् | |

**समृद्ध्यर्थे -**

| | |
|---|---|
| मद्राणां सम्मृद्धिः अ.स्व.वि. सुमद्रम् | ............................. सुदेशम् |
| भारतस्य सम्मृद्धिः अ.स्व.वि. सुभारतम् | |

**व्यृद्ध्यर्थे ( दरिद्रता वा विनाशः ) -**

| | |
|---|---|
| यवनानां व्यृद्धिः (नाशः) = दुर्यवनम्। | ............................. = दुर्गतिः - |
| दैवस्य व्यृद्धिः (नाशः) = दुर्दैवम्। | |

**अभावार्थे -**

| | |
|---|---|
| मक्षिकाणाम् अभावः = निर्मक्षिकम्। | ............................. = निर्द्वन्द्वम्। |
| जनानाम् अभावः = निर्जनम्। | ............................. = निर्विघ्नम्। |

**अत्ययार्थे ( नाशार्थे ) -**

| | |
|---|---|
| हिमस्य अत्ययः (नाशः) = अतिहिमम्। | .............................. = अतिधर्मम्। |
| शितस्य अत्ययः (नाशः) = अतिशीतम्। | |

**असम्प्रति ( अनुचितार्थे ) -**

| | |
|---|---|
| निद्रा सम्प्रति न युज्यते = अतिनिद्रम्। | ............................. = अतिवादम्। |
| क्रीडा सम्प्रति न युज्यते = अतिक्रीडम्। | |

**शब्द प्रादुर्भावे ( प्रकाशे उच्चारणार्थे वा ) -**

| | |
|---|---|
| हरिशब्दस्य प्रकाशः वा उच्चारणम् = इतिहरि। | रामशब्दस्य उच्चारणम् = |
| विष्णुशब्दस्य प्रकाशः वा उच्चारणम् = इतिविष्णु | |

**पश्चादर्थे -**

| | |
|---|---|
| रथस्य पश्चाद् = अनुरथम्। | .................. = अनुगमनम्। |
| विष्णोः पश्चाद् = अनुविष्णु। | |

यथार्थः चतुर्विधः १. योग्यता २. वीप्सा ३. अनतिक्रमणम् ४. आनुपूर्व्यम्।

१. योग्यतार्थे –

| | |
|---|---|
| रूपस्य योग्यम् = अनुरूपम्। | वरस्य योग्यम् = अनुवरम्। |

**वीप्सायाम्**

| | |
|---|---|
| ग्रामं ग्रामं प्रति = प्रतिग्रामम्। | गृहं गृहं प्रति = प्रतिगृहम्। |
| अर्थम् अर्थं प्रति = प्रत्यर्थम्। | = प्रतिजनम्। |

**अनतिक्रमणे** –

| | |
|---|---|
| शक्तिमनतिक्रम्य (शक्त्यनुसारम्) = यथाशक्ति | ................................ = यथाधीतम्। |
| मतिम् अनतिक्रम्य (मत्यनुसारम्) = यथामति। | ................................ = यथाधनम्। |

**आनुपूर्व्ये (क्रमार्थे)**

| | |
|---|---|
| ज्येष्ठस्य आनुपूर्व्येण = अनुजेष्ठम्। | ................................ = अनुमानम्। |
| क्रमस्य आनुपूर्व्येण = अनुक्रमम्। | |

**यौगपद्ये** –

| | |
|---|---|
| चक्रेण युगपद् (चक्रेण सह) = सचक्रम्। | आनन्देन सह = सानन्दम्। |
| ................................ = सधनम्। | हृदा सह = सहार्दम्। |
| ................................ = सजनम्। | |

अव्ययीभाव समासे समासान्तानि रूपाणि – आत्मनि इति टच् (अ) अन्लोपः अध्यात्मम्

| | |
|---|---|
| राज्ञ समीपम् = उपराजम्। | शरदः समीपम् = उपशरदम्। |
| सरितः समीपम् = उपसरितम्। | ................ = उपदिशम्॥ |

**तत्पुरुषसमासस्य द्वौ अर्थौ भवतः** –

तस्य पुरुषः = तत्पुरुषः।

सः पुरुषः = तत्पुरुषः।

एकस्मिन् भिन्नविभक्तयः भवन्ति।

द्वितीये समानविभक्तयः भवन्ति।

राज्ञः पुरुषः = राजपुरुषः व्यधिकरणतत्पुरुषः।

कृष्णः सर्पः = कृष्णसर्पः समानाधिकरणतत्पुरुषः।

समानाधिकरणतत्पुरुषः कर्मधारयः उच्यते।

व्यधिकरणतत्पुरुषः षट्सु विभक्तिषु भवति।

व्यधिकरणतत्पुरुषस्य षड्भेदाः सन्ति –

द्वितीयातत्पुरुषः, तृतीयातत्पुरुषः, चतुर्थीतत्पुरुषः, पञ्चमीतत्पुरुषः, षष्ठीतत्पुरुषः, सप्तमीतत्पुरुषः।

द्वितीयातत्पुरुषे –

प्रथमशब्दः द्वितीयान्तः द्वितीयशब्दः प्रथमान्तः भवति। गृहं गतः = गृहगतः।

**द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः।**

इति सूत्रेण श्रितः, अतीतः, पतितः, गतः, अत्यस्तः प्राप्तः, आपन्नः एतेषां शब्दानां संयोगे द्वितीयातत्पुरुषसमासः भवति।

| | | | | | |
|---|---|---|---|---|---|
| कृष्णं श्रितः | = | कृष्णश्रितः। | मेघम् अत्यस्तः | = | मेघात्यस्तः। |
| दुःखम् अतीतः | = | दुःखातीतः। | सुखं प्राप्तः | = | .............। |
| शोकं पतितः | = | शोकपतितः। | . . . . . . . . | = | सुखापन्नः। |
| ग्रामं गतः | = | .............। | | | |

**तृतीयातत्पुरुषसमासः –**

**कर्तृकरणे कृता बहुलम्''**

इति सूत्रेण तृतीयान्तः कर्ता वा करणं चेत् तेन सह क्तप्रत्ययान्तशब्दस्य समासः भवति।

| | | | | | |
|---|---|---|---|---|---|
| हरिणा त्रातः | = | हरित्रातः। | दण्डेन ताडितः | = | दण्डताण्डितः। |
| विष्णुना त्रातः | = | विष्णुत्रातः। | ................. | = | खड्गहतः। |

**नियमः –**

तृतीयान्तशब्देन सह पूर्व, सदृश, सम, ऊन, कलह, निपुण, मिश्र, श्लक्षण, एतेषां समासः भवति।

| | | | | | |
|---|---|---|---|---|---|
| मासेन पूर्वः | = | मासपूर्वः | मया समः | = | मत्समः। |
| मात्रा सदृशः | = | मातृसदृशः। | एकेन ऊनः | = | एकोनः। |
| वाचा कलहः | = | वाक्कलहः। | द्वाभ्याम् ऊनः | = | एकोनः। |

**चतुर्थीतत्पुरुषसमासः –**

**चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः।**

इति सूत्रेण चतुर्थ्यन्तशब्दस्य, अर्थः, बलिः, हितं, सुखं, रक्षितम् एतैः शब्दैः सह समासः भवति।

द्विजाय अयम् इति द्विजार्थः।

| | | | | | |
|---|---|---|---|---|---|
| गोभ्यो हितम् | = | गोहितम्। | गोभ्यः रक्षितम् | = | ........... |
| भूतेभ्यः बलिः | = | भूतबलिः। | मानवाय हितम् | = | मानवहितम्। |

**पञ्चमीतत्पुरुषसमासः –**

प्रथमशब्दः पञ्चम्यन्तः भवति।

**''पञ्चमीभयेन''**

इति सूत्रेण – भयवाचकशब्दैः सह समासः भवति।

| | | | | | |
|---|---|---|---|---|---|
| चोराद् भयम् | = | चौरभयम् | व्याघ्रात् भीतीः | = | व्याघ्रभीतिः। |
| सिंहात् भीतः | = | सिंहभीतः। | ................ | = | सर्पभयम्। |

**षष्ठीतत्पुरुषसमासः -**

प्रथमपदं षष्ठ्यन्तं भवति।

**षष्ठी** . . . . . . . इति सूत्रेण षष्ठन्तपदस्य समासः भवति।

| | | | | | |
|---|---|---|---|---|---|
| राज्ञः पुरुषः | = | राजपुरुषः। | ................. | = | सीतापतिः। |
| कृष्णस्य भक्तः | = | कृष्णभक्तः। | ................. | = | राधापतिः |

**नियमः -**

तृच्प्रत्ययान्तशब्दाः कर्ता, भर्ता, पठिता, ण्वुल्-प्रत्ययान्तशब्दाः पाचकः याचकः पाठकः।

एतादृशैः शब्दैः सह समासः न भवति।

अन्नस्य पाचकः

धनस्य हर्ता

जगतः स्रष्टा

घटस्य कर्ता इत्यादौ न समासः

यत्र निधारणे षष्ठी तत्रापि समासः न भवति।

नृणां द्विजः श्रेष्ठः।

गवां कृष्णा बहुक्षीरा इत्यादौ॥

**सप्तमीतत्पुरुषसमासः -**

अत्र सप्तम्यन्तं पदं प्रथमं भवति।

**सप्तमी शौण्डैः** इति सूत्रेण शौण्डादिगणपठितशब्दैः सह समासः भवति।

शौण्डादयः - शौण्डः, धूर्तः, कितवः, व्याडः, प्रवीणः, संवीतः, अन्तरः, अधिपटुः, पण्डितः, कुशलः, चपलः, निपुणः इति।

| | | | | | |
|---|---|---|---|---|---|
| वाचि पटुः | = | वाक्पटुः। | अक्षेषु शौण्डः | = | अक्षशौण्डः। |
| शास्त्रेषु पण्डितः | = | शास्त्रपण्डितः। | कार्येषु निपुणः | = | . . . . . . |
| कर्मणि कुशलः | = | कर्मकुशलः। | रणेषु शौण्डः | = | रणशौण्डः। |

**कर्मधारयः -**

"तत्पुरुषः समानाधिकरणः कर्मधारयः" 1/2/42 ॥

इति सूत्रेण ययोः येषां वा शब्दानां विभक्तिः समाना चेत् समानाधिकरणम् उच्यते।

कृष्णः सर्पः अत्र द्वयोः प्रथमाविभक्तिः अतः - समानाधिकरणम्। समानाधिकरणतत्पुरुषे द्वौ अपि शब्दौ प्रथमान्तौ भवतः।

"विशेषणं विशेष्येण बहुलम्" 2/1/57 ॥

इति सूत्रेण यदि प्रथमः शब्दः विशेषणरूपः द्वितीयः शब्दः विशेष्यरूपः चेद् विशेषेणपूर्वपद-कर्मधारयः भवति।

| | | | | | |
|---|---|---|---|---|---|
| कृष्णश्चासौ सर्पश्च | = | कृष्णसर्पः। | उन्नतश्चासौ वृक्षश्च | = | ...........। |
| नीलं च तत् उत्पलं च | = | नीलोत्पलम्। | दीर्घश्चासौ पन्थाश्च | = | दीर्घपथः। |
| दीर्घा चासौ रज्जुश्च | = | दीर्घरज्जुः। | रम्यश्चासौ पन्थाश्च | = | ...........। |
| महान् चासौ पुरुषश्च | = | महापुरुषः। | . . . . . . . | = | शुभरात्रिः। |
| सर्वे च ते देवाश्च | = | सर्वदेवाः। | | | |

**विशेषणोत्तरपदकर्मधारय: -**

| | | | | | |
|---|---|---|---|---|---|
| कृतं च अकृतं च | = | कृताकृतम्। | गतं च अगतं च | = | .............। |
| भुक्तं च अभुक्तं च | = | भुक्ताभुक्तम्। | यातं च आयातं च | = | .............। |
| शीतं च उष्णं च | = | शीतोष्णम्। | ...................... | = | कृष्णश्वेतम्। |

**उपमानपूर्वपदकर्मधारय: -**

**उपमानानि समान्यवचनै:** 2/9/55 इति सूत्रेण उपमानोपमेययो: समास: भवति। उपमानशब्दस्य पूर्वनिपात: भवति।

| | | | | | |
|---|---|---|---|---|---|
| घन: इव श्याम: | = | घनश्याम:। | ...................... | = | वज्रकठोर:। |
| चन्द्र: इव आह्लादक: | = | चन्द्राह्लादक:। | ...................... | = | चन्द्रशीतलम्। |
| कुसुम: इव कोमलम् | = | कुसुमकोमलम्। | | | |

**उपमानोत्तरकर्मधारय: -**

**उपमितं व्याघ्रादिभि: सामान्यप्रयोगे।**

उपमितं - यस्य उपमा भवति, उपमानं येन उपमा दीयते, तयो: समास: भवति। उपमानपदम् उत्तरपदं भवति।

| | | | | | |
|---|---|---|---|---|---|
| मुखं कमलम् इव | = | मुख कमलम्। | नर: सिंह: इव | = | नरसिंह:। |
| पुरुष: व्याघ्र इव | = | पुरुषव्याघ्र:। | | | |

**अवधारणपूर्वपदकर्मधारय: -**

| | | | | | |
|---|---|---|---|---|---|
| विद्या एव धनम् | = | विद्याधनम्। | तप: एव धनम् | = | तपोधनम्। |
| गुरु: एव देव: | = | गुरुदेव:। | | | |

**सम्भावनापूर्वपदकर्मधारय: -**

| | | |
|---|---|---|
| अयोध्या इति नगरी | = | अयोध्यानगरी |
| हिमालय: इति पर्वत: | = | हिमालयपर्वत: |
| | = | कर्णावतीनगरम्। |

**मध्यमपदलोपिकर्मधारय: -**

**शाकपार्थिवादीनां सिद्धये उत्तरपदलोपस्योपसंख्यानम्''** इति वार्तिकेण मध्यमपदस्य लोप:।

| | | | | | |
|---|---|---|---|---|---|
| रेलमार्गे चलत् यानं | = | रेलयानम्। | द्वयधिका विंशति: | = | द्वाविंशति:। |
| देवपूजक: ब्रह्मण: | = | देवब्रह्मण:। | षोऽशसंख्यका: पदार्था: | = | षोऽशपदार्था:। |
| शाकप्रिय: पार्थिव: | = | शाकपार्थिव:। | | | |
| द्विगुणितं शतम् | = | द्वितशतम् | | | |
| ..................... | = | त्रितशतम्। | | | |

**लक्षणं विना अपि सिद्धा: समासान्तशब्दा: -**

| | | | | | |
|---|---|---|---|---|---|
| निश्चितं प्रचितम् | = | निश्चप्रचम्। | चिदेव | = | चिन्मात्रम्। |
| अन्य राजा | = | राजन्तरम् | तदेव | = | तन्मात्रम्। |
| अन्य: ग्राम: | = | ग्रामान्तरम्। | | | |
| ................ | = | देशान्तरम्। | | | |

**द्विगुसमासः** -

**संख्यापूर्वो द्विगुः 2/1/52 ॥** यदि कर्मधारयसमासे प्रथमशब्दः संख्यावाचकः - द्वितीयशब्दः संज्ञावाचकः चेत् द्विगुसमासः उच्यते।

**द्विगुरेकवचनम् 2/4/7** द्विगुसमासे नपुंसकम् एकवचनं च भवति। समूहद्योतकत्वात्।

चतुर्णां युगानां समाहारः = चतुर्युगम्

त्रयाणां भुवनानां समाहारः = त्रिभुवनम्।

पञ्चानां गवां समाहारः = पञ्चगवम्।

........................ = पञ्चपात्रम्।

........................ = त्रिनयनम्।

........................ = षडाननम्।

**अवधेयम्** -

वटः, लोकः, मूलम् इति शब्दैः सह समासे जाते स्त्रीलिङ्गे ई भवति -

पञ्चानां वटानां समाहारः = पञ्चवटी।

त्रयाणां लोकानां समाहारः = त्रिलोकी।

पञ्चानां मूलानां समाहारः = पञ्चमूली।

........................ = त्रिनयनम्।

**द्विगुसमासे तद्धितप्रत्ययोऽपि भवति।-**

षण्णां मातृणाम् अपत्यम् = षाण्मातुरः।

द्वयोः मात्रोरपत्यम् = द्वैमातुरः।

षाणमातृ + अ द्विमातृ + अ तद्धितप्रत्यये पूर्वपदस्य वृद्धिः।

**नञ् तत्पुरुषसमासः** -

**नञ् 2/2/6** इति सूत्रेण नञ् सुपा सह समस्यते। तत्पुरुषे प्रथमशब्दः न द्वितीयशब्दः संज्ञा वा विशेषणः चेत् नञ्तत्पुरुषः उच्यते।

**नलोपो नञः** 6/3/73 इति सूत्रेण नस्य लोपः भवति।

न ब्राह्मणः = अब्राह्मणः।

न ज्ञातः = अज्ञातः।

न हृष्ट = अहृष्टः।

न सत्यम् = असत्यम्।

''तस्मान्नुडचि'' 6/3/74 इति सूत्रेण नकारलोपे 'अ' तिष्ठति तस्य नुट् आगमः भवति। स्वरस्य पूर्वभागे अन् इति परिवर्तते।

न अश्वः = अनश्वः।

न ईश्वरः = अनीश्वरः।

न उचितम् = अनुचितम्।

न उत्तमम् = ............।

न उपमम् = ............।

............ = अनुत्तरम्।

**प्रादितत्पुरुषः** -

**कुगतिप्रदयः 2/2/78** इति सूत्रेण तत्पुरुषसमासे प्रथमशब्दः प्रादिषु उपसर्गेषु अन्यतमः भवेत् तदा यः समासः भवति सः प्रादितत्पुरुषः उच्यते।

प्रगतः आचार्यः (अत्यन्तः विद्वान्) = प्राचार्यः।

| | | | | | |
|---|---|---|---|---|---|
| प्रगतः पितामहः | = | प्रपितामहः। | कुत्सितः पुरुषः | = | कुपुरुषः। |
| प्रतिगतम् अक्षम् | = | प्रत्यक्षम्। | .................. | = | सुपुरुषः। |
| अतिक्रान्तः रथम् | = | अतिरथः। | .................. | = | सुजनः। |
| दुष्टः जनः | = | दुर्जनः। | | | |

**उपपदतत्पुरुषः -**

**उपपदमतिङ् 2/2/19** इति सूत्रेण प्रथमः शब्दः संज्ञावाचकः वा अव्ययं, द्वितीयशब्दः कृदन्तः भवेत् तदा उपपदसमासः भवति।

कुम्भं करोति इति कुम्भकारः अत्र कुम्भः इति उपपदं कारः इति कृदन्तपदम्।

| | | | | | |
|---|---|---|---|---|---|
| स्वर्णं करोति इति | = | स्वर्णकारः। | जलाज्जायते इति | = | जलजः। |
| ग्रन्थं करोति इति | = | .......... | .................. | = | पङ्कजम्। |

**अलुक् समासः -**

समासे एकपदे जाते अपि विभक्तेः लोपः न भवति।

| | | | |
|---|---|---|---|
| आत्मनेपदम् | चतुर्थ्याः अलुक्। | युधिष्ठिर | सप्तम्याः अलुक्। |
| परस्मैपदम् | चतुर्थ्याः अलुक्। | खेचरः | सप्तम्याः अलुक्। |
| अन्तेवासीः | सप्तम्याः अलुक्। | सरसिजम् | सप्तम्याः अलुक्। |

**बहुव्रीहिसमासः -**

**अनेकमन्यपदार्थे 2/2/24** इति सूत्रेण द्वे वा अधिकपदानि अन्यपदस्य विशेषणरूपेण भवन्ति तदा बहुव्रीहिसमासः उच्यते।

बहुव्रीहशब्दस्य अर्थः भवति - बहवः व्रीहयः यस्य सन्ति सः बहव्रीहिः यस्य बहुधान्यम् अस्ति सः। अत्र बहु विशेषणं व्रीहि विशेष्यं द्वौ अपि शब्दौ अन्यस्य (पुरुषस्य) विशेषणौ स्तः।

पीतं च तद् अम्बरं च = पीताम्बरम् (कर्मधारयः)

बहुव्रीहौ तु पीतम् अम्बरं यस्य सः = पीताम्बरः (कृष्णः)

बहुव्रीहिसमासे द्वयोः शब्दयोरपि प्राधान्यं न भवति। अन्य पदार्थप्रधानं भवति।

बहुव्रीहिसमासस्य द्वौ भेदौ स्तः। (1) समानाधिकरणबहुव्रीहिः। (2) व्यधिकरणबहुव्रीहिः।

समानाधिकरणबहुव्रीहिसमासे द्वयोर्वा ,सर्वेषां पदानां समानमधिकरणम् अर्थात् विभक्तिवचनानि समानानि भवन्ति। यथा - पीतम् अम्बरं यस्य सः अत्र पीतम् अम्बरं प्रथमान्तौ स्तः।

व्यधिकरणबहुव्रीहिसमासे विभक्तिवचनानां समानता न भवति। यथा - चक्रं पाणौ यस्य सः - चक्रपाणिः (विष्णुः) चन्द्रः शेखरे यस्य सः = चन्द्रशेखरः (शिवः)

एकः प्रथमान्तः, द्वितीय सप्तम्यन्तः द्वौ अपि प्रथमान्तौ न भवतः। समानाधिकरणबहुव्रीहेः षड् भेदाः सन्ति।

| | |
|---|---|
| (1) द्वितीयासमानाधिकरणबहुव्रीहिः। | (4) पञ्चमीसमानाधिकरणबहुव्रीहिः। |
| (2) तृतीयासमानाधिकरणबहुव्रीहिः। | (5) षष्ठीसमानाधिकरणबहुव्रीहिः। |
| (3) चतुर्थीसमानाधिकरणबहुव्रीहिः। | (6) सप्तमीसमानाधिकरणबहुव्रीहिः। |

**द्वितीयासमानाधिकरणबहुव्रीहौ -**

प्राप्तम् उदकं यं सः = प्राप्तोदकः (ग्रामः)।

आरूढः वानरः यं सः = आरूढवानरः (वृक्षः)।

**तृतीयासमानाधिकरणबहुव्रीहौ -**

दत्तं चित्तं येन सः = दत्तचित्तः (छात्रः)।

जितानि इन्द्रियाणि येन सः = जितेन्द्रियः (साधकः)।

पठिता विद्या येन सः = पठितविद्यः।

भुक्तं भोजनं येन सः = ..................।

सोढं दुःखं येन सः = ..................।

पठित व्याकरणं येन सः = पठितव्याकरणः।

**चतुर्थीबहुव्रीहौ -**

दत्तं धनं यस्मै सः = दत्तधनः।

दत्ता दक्षिणा यस्मै सः = दत्तदक्षिणः।

**पञ्चमीबहुव्रीहौ -**

निर्गतं जलं यस्मात् = निर्जलः (कूपः)।

निर्गतं बलं यस्मात् = निर्बलः (पुरुषः)।

रिक्तं धनं यस्मात् = रिक्तधनः (धनकोशः)।

निर्गतः जनः यस्मात् = ..................।

निर्गतं धनं यस्मात् = ..................।

निर्गतं मलं यस्मात् = ..................।

**षष्ठीबहुव्रीहौ -**

लम्बौ कर्णौ यस्य सः = लम्बकर्णः (गर्धवः)।

लम्बम् उदरं यस्य सः = लम्बोदरः (गणेशः)।

दृढा भक्तिः यस्य सः = दृढभक्तिः (भक्तः)।

दीर्घा ग्रीवा यस्य सः = दीर्घग्रीवः।

**सप्तमीबहुव्रीहौ -**

वीराः पुरुषाः यस्मिन् सः = वीरपुरुषकः (ग्रामः)।

धीराः पुरुषाः यस्मिन् = धीरपुरुषकः (ग्रामः)।

**नञ् बहुव्रीहिः -**

अविद्यमानः पुत्रः यस्य सः = अपुत्रः।

अविद्यमानं धनं यस्य सः = अधनः।

नास्ति शक्तिः यस्य सः = अशक्तः।

नास्ति बलं यस्य सः = अबलः।

**सह बहुव्रीहिः -**

| | | |
|---|---|---|
| अग्रजेन सह इति | = | साग्रजः। |
| राधिकया सह इति | = | सराधिकः। |
| सीतया सह इति | = | ससीतः। |
| लक्ष्म्याः सह इति | = | सलक्ष्मीकः। |
| पत्न्याः सह इति | = | सपत्नीकः। |

एवं - सुपुत्रः। सकुटुम्बः, सकर्मकः, अकर्मकः।

**प्रादिबहुव्रीहिः -**

प्रपतितः पर्णः यस्मात् = प्रपर्णः (वृक्षः)।

निर्गतं भयं यस्मात् = निर्भयः (पुरुषः)।

विंशतेः समीपे ये सन्ति = उपविंशाः।

.......................... = निर्दयः।

.......................... = निरपत्यः।

.......................... = निष्करुणः।

**प्रतिहारबहुव्रीहौ -**

केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् इति = केशाकेशि।

दण्डैः दण्डैः प्रहृत्य इदं युद्धं प्रवृत्तम् = दण्डादण्डि।

............................................ = मुष्टामुष्टि।

**संख्याबहुव्रीहिः -**

द्वौ वा त्रयो वा = द्वित्राः (जनाः)।

त्रयो वा चत्वारो वा = त्रिचतुराः (जनाः)।

पञ्च वा षड् वा = पञ्चषाः।

**बहुव्रीहिसमासे कश्चिद् विशेषः -**

समानाधिकरण बहुव्रीहिसमासे प्रथमशब्दः भाषितपुंस्कः (पुंल्लिंगे आगतः) अकारान्तः न स्यात् द्वितीयशब्दः स्त्रीलिङ्गे स्यात् प्रथमशब्दस्य पुंवद्भावः भवति।

रूपवती भार्या यस्य सः = रूपवद्भार्यः (पुरुषः)

चित्राः गावो यस्य सः = चित्रगुः (गोपाः)

अत्र चित्राशब्दः पुंलिंगे नासीत् अतः पुंवद्भावः न भवति। एतेषु अपि पुंवद्भावः न।

दत्ता भार्या यस्य सः = दत्तभार्यः।

....................... = सुकेशीभार्यः।

....................... = कल्याणीप्रियः।

....................... = कल्याणीपञ्चमाः।

यदि बहुव्रीहिसमासस्य अन्ते ऋकारान्तः शब्दः ऊकारान्तः शब्दः चेत् (कप्) भवति।

ईश्वरः कर्ता यस्य सः = ईश्वरकर्तृकः (संसारः)।

सुशीला माता यस्य सः = सुशीलमातृकः (पुत्रः)।

सुन्दरी वधूः यस्य सः = सुन्दरवधूकः (पतिः)।

रूपवती स्त्री यस्य सः = रूपवत्स्त्रीकः (नरः)।

**कुत्रचित् समासान्ते इकारोऽपि भवति** -

| | | | | |
|---|---|---|---|---|
| उद्गतः गन्धः यस्य सः | = उद्गन्धिः। | शोभना दन्ता यस्याः सा | = | सुदतीः। |
| ........................ | = सुगन्धिः। | उन्नता नासिका यस्य सः | = | उन्नसः। |

**धनुश्च - 5/4/132** इति सूत्रेण बहुव्रीहौ धनुष्शब्दस्यान्ते अनङ्भवति -

पुष्पं धनुः यस्य सः = पुष्पधन्वा।

........................ = शार्ङ्गधन्वा।

........................ = शतधन्वा।

........................ = उग्रधन्वा।

जायाया निङ् - 5/4/134 इति सूत्रेण जायान्तस्य बहुव्रीहौ निङ् आदेशो भवति।

युवती जाया यस्य सः = युवजानिः

........................ = भूजानिः

........................ = महीजानिः

........................ = सीताजानिः

## द्वन्द्वसमासः

**उभयपदार्थप्रधानो द्वन्द्वः।**

**चार्थे द्वन्द्वः 2/2/29** इति सूत्रेण अनेकं सुबन्तं चार्थे वर्तमानं समस्यते। चकारार्थः त्रिविधः अर्थात् द्वन्द्वसमासः त्रिविधः भवति - (1) इतरेतरद्वन्द्वः (2) समाहारद्वन्द्वः (3) एकशेषद्वन्द्वः

**इतरेतरद्वन्द्वः** -

रामश्च लक्ष्मणश्च = रामलक्ष्मणौ।

माता च पिता च = मातापितरौ।

होता च पोता च = होतापोतरौ।

अत्रिः च रविः च = अत्रिरवी।

**द्वन्द्वसमासे अन्तिमपदानुसारं लिङ्गस्य निर्णयः।**

| | | | | |
|---|---|---|---|---|
| कुक्कुटश्च मयूरी च | = कुक्कुटमयूर्यौ। | मयूरी च कुक्कुटश्च | = | मयूरीकुक्कुट। |

**द्वन्द्वे घि 2/2/32** इति सूत्रेण घिसंज्ञकस्य (इकरान्तस्य उकारान्तस्य च) पूर्वनिपातः भवति।

| | | | |
|---|---|---|---|
| हरश्च हरिश्च | = हरिहरौ। | गुरुश्च शिष्यश्च = | गुरुशिष्यौ। |
| जमदग्निश्च हरिश्चन्द्रश्च | = जमदग्निहरिश्चन्द्रौ। | | |

**अजाद्यदन्तम् 2/2/34** इति सूत्रेण द्वन्द्वसमासे अजादिशब्दस्य पूर्वनिपातः भवति।

| | | | | |
|---|---|---|---|---|
| ईशश्च कृष्णस्य | = ईशकृष्णौ। | अग्निश्च वरुणश्च | = | अग्निवरुणौ। |

**समाहारद्वन्द्वः** -

यदि द्वन्द्वसमासे चकारेणयुक्ताः समूहबोधकाः संज्ञाः भवेयुः तदा समाहारद्वन्द्वसमासः भवति।

समाहारे एकवचनं नपुंसकं च भवति।

**द्वन्द्वश्च प्राणितूर्यसेनाङ्गनाम् 2/4/2 सूत्रेण**

| | | | | | |
|---|---|---|---|---|---|
| आहारश्च निद्रा च भयं च | = | आहारनिद्राभयम्। | मार्दङ्गिकश्च वैणविकश्च | = | मार्दङ्गवैणविकम्। |
| पाणी च पादौ च | = | पाणिपादम्। | अश्वारोहाश्च पदातयश्च | = | अश्वारोहपदाति। |

**येषां च विरोधः शाश्वतिक येषां स्वाभाविकः विरोधः तत्र द्वन्द्वसमासे एकवचनम्।**

अहिश्च नकुलश्च = अहिनकुलम्।

**प्राणिरहितानां शब्दानां समासे एकवचनम्।**

| | | | | | |
|---|---|---|---|---|---|
| कुरवश्च कुरुक्षेत्रं च | = | कुरुकुरुक्षेत्रम्। | गङ्गा च शोणश्च | = | गङ्गाशोणम्। |
| मथुरा च पाटलीपुत्रं च | = | मथुरापाटलीपुत्रम्। | यूका च लिक्षा च | = | यूकालिक्षम्। |

**अल्पाच्तरम् 2/2/34** इति सूत्रेण अल्पाक्षरः शब्दः प्रथमः भवति।

| | | | | | |
|---|---|---|---|---|---|
| शिवश्च केशवश्च | = | शिवकेशवौ। | ग्रीष्मश्च वसन्तश्च | = | ग्रीष्मवसन्तौ। |

**एकशेष द्वन्द्वः –**

द्वन्द्वसमासे केवलम् एकमेव पदं शिष्यते।

**सरूपाणामेकशेष एकविभक्तौ 1/2/64** समानार्थानामपि एकशेषसमासः भवति।

| | | | | | |
|---|---|---|---|---|---|
| देवश्च देवश्च | = | देवौ। | घटश्च कलशश्च | = | घटौ/कलशौ। |
| रामश्च रामश्च | = | रामौ। | पुत्री च पुत्रश्च | = | पुत्रौ। |
| अजश्च अजाच | = | अजौ। | सा च सः च | = | तौ। |
| ब्राह्मणी च ब्राह्मणश्च | = | ब्राह्मणौ। | श्वश्रूश्च श्वशुरश्च | = | श्वशुरौ। |
| शूद्रश्च शूद्री च | = | शूद्रौ। | | | |

**पिता मात्रा** 7/2/70 इति सूत्रेण मात्रा सह उक्तौ पिता शिष्यते विकल्पेन।

माता च पिता च = पितरौ/मातापितरौ

यथा – जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ

**समासान्ताः –**

**राजाहः सखिभ्यष्टच् 5/4/91**

तत्पुरुषसमासे अन्ते राजन्, अहन्, सखिन् एते शब्दाः स्युः तदा समासान्तः टच् प्रत्ययः भवति।

महान् चासौ राजा च = महाराजः (कर्मचारयः)।

....................... = देवराजः (कर्मधारयः)।

उत्तमम् अहः = उत्तमाहः (कर्मधारयः)।

कृष्णस्य सखा = कृष्णसखः (ष.तत्पुरुषः)।

**आन्महतः समानाधकरणजातिययोः 6/2/46**

समानाधिकरणे कर्मधारये बहुव्रीहौ च महतः शब्दस्य आकारादेशो भवति।

महान् चासौ देवश्च = महादेवः (कर्मधारयः)।

महान् आशयः यस्य सः = महाशयः (बहुव्रीहि)।

नञ्समासे तु टच् (अ) न भवति –

न सखा = असखा।

नराजा = अराजा।

**ऋकपुरब्धूः पथामानक्षे 5/4/47**

अक्षशब्दं विहाय ऋक्, पुर्, अप्, धुर्, पथिन् शब्दानां समासे जाते अन्ते 'अ' प्रत्ययः भवति।

| | | | | | |
|---|---|---|---|---|---|
| ऋचः अर्धम् | = | अर्धचः। | सु पन्थाः यस्य सः | = | सुपथः (देशः)। |
| हरेः पुर् (पू) | = | हरिपुरम्। | विमलाः आपः यस्य तत् | = | विमलापम् (सरः)। |

**द्व्यन्तरुपसर्गेभ्योऽप ईत् 6/3/96**

द्वि, अन्तर् शब्दाभ्यां तथा उपसर्गेभ्यः परे अपः स्थाने ईकारादेशो भवति।

| | | | | | |
|---|---|---|---|---|---|
| द्वयोर्गताः आपः यस्मिन् | = | द्वीपम्। | प्रतिकूलाः आपः यस्मिन् | = | प्रतीपम्। |
| अन्तर्गताः आपः यस्मिन् | = | अन्तरीयम्। | संगताः आपः यस्मिन् | = | समीपम्। |

**अनु, प्रति, अव, पूर्वे स्युः तदा सामन् लोमन् शब्दाभ्यां समसान्त टच् भवति -**

अनुलोमम् /प्रतिलोमम् / अवलोमम्

अनुसामम् /प्रतिसामम् / अवसामम् इत्यादिः।

**अहः सर्वैकदेशसङ्ख्यातपुण्याच्च रात्रेः 5/4/87**

अहः, सर्वः, एकदेशसूचकशब्दः, संख्यातशब्दः, पुण्यशब्दः एतैः सह समासे जाते - टच् (अ) भवति।

| | | | | | |
|---|---|---|---|---|---|
| अहश्च रात्रिश्च | = | अहोरात्रः। | ..................... | = | संख्यातरात्रः |
| सर्वा च रात्रिश्च | = | सर्वरात्रः। | ..................... | = | पुण्यरात्रः। |

संख्यापूर्वं रात्रं क्लीबम् (वा) संख्यापूर्वकरात्रिशब्दस्य टच् नपुंसकं च भवति।

| | | | | | |
|---|---|---|---|---|---|
| नवानां रात्रीणां समाहारः | = | नवरात्रम्। | ..................... | = | त्रिरात्रम्। |
| ..................... | = | द्विरात्रम्। | ..................... | = | पञ्चरात्रम्। |

## स्वाध्यायः

**1. विकल्पं चित्वा रिक्तस्थानं पूरयत।**

(1) भूतपूर्वः अत्र ....... समासः। (अव्ययीभावः, द्वन्द्व, केवलसमासः)

(2) मुख्यसमासाः ....... भवन्ति। (पञ्च, षड्, अष्टौ)

(3) उभयपदार्थ प्रधानः ....... समासः। (अव्ययीभावः, द्वन्द्व, केवलसमासः)

(4) चकारार्थे कः समासः भवति। .......। (अव्ययीभावः,द्वन्द्व, कर्मधारयः)

(5) कर्मधारयस्य उदाहरणं ....... अस्ति। (दुर्यवनम्, पित्तरौ, चक्रपाणिः)

(6) घनः इव श्यामः = घनश्यामः अत्र ....... समासः।

(विशेषणोत्तरकर्मधारयः, अपमानोत्तरकर्मधारयः, उपमानपूर्वपदकर्मधारयः)

(7) चन्द्रमुखम् अत्र ....... समासः। (अव्ययीभावः, बहुव्रीहिः, कर्मधारयः)

**2. लघूत्तराणि देयानि -**

(1) निर्भय: इत्यत्र विग्रहं दर्शयत ?

(2) जितेन्द्रिय: इत्यत्र क: विग्रह: ?

(3) पितरौ इत्यत्र केन सूत्रेण एकशेष: भवति ?

(4) अधो लिखितानां समासं कुरुत।

कृष्णस्य समीपम्। गृहे इति। न उत्तम: न उपलब्धि:।

(5) विग्रहं कृत्वा समासनाम लिखत।

मूढमति:। चक्रपाणि:। त्रिलोकी। चन्द्रानना।

**3. अधोलिखितानां प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) समासोनाम किं कतिविध: समास:।

(2) समानाधिकरणां किमिति लखित्वा उदाहरणं लिखत।

(3) व्याधिकरण बहुव्रीहे: लक्षणं लिखित्वा उदाहरणानि लिखत।

(4) केन सूत्रेण महत्शब्दस्य आकारो भवति ?

(6) विमलापम् इत्यस्य विग्रहं कृत्वा समासान्तप्रत्यं दर्शयत।

•

| ४ | नामधातुप्रकरणम् |
|---|---|

# ४ नामधातुप्रकरणम्

**प्रस्तावना**

अस्मिन् प्रकरणे धातुपाठस्थः न कश्चिदपि धातुः विद्यते, किन्तु 'नाम' अर्थात् सुबन्तप्रातिपदिकमेव धातुत्वेन सम्पाद्यते। इत्थं नामपदमेव धातुः जायते इति हेतोः अस्य प्रकरणस्याभिधानं 'नामधातुप्रकरणम्' इत्युच्यते। अर्थात् शब्दस्य धातुरिव प्रयोगो भवतीति तात्पर्यम्। यथा – 'विष्णु' इति शब्दात् 'विष्णूयति' इति रूपं भवति। 'विष्णूयति' इत्यस्य 'विष्णुः इव आचरति' इत्यर्थो भवति। इत्थं नामपदात् तिङन्तरूपाणि जायन्ते।

---

1. **सुप आत्मनः क्यच् | 3 | 1 | 8 ||**

   इषिकमण एषितुः सम्बन्धिनः सुबन्ताद् इच्छायामर्थे क्यच् प्रत्ययो वा स्यात्॥

2. **सुपो धातु-प्रातिपदिकयोः | 2 | 4 | 71 ||**

   एतयोरवयवस्य सुपो लुक्॥

3. **क्यचि च | 7 | 4 | 33 ||**

   अवर्णस्य ईः। आत्मनः पुत्रमिच्छति – पुत्रीयति॥

---

**1. पदपरिचयः** – सुपः (प.ए.), आत्मनः (ष.ए.), क्यच् (प्र.ए.)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** –धातोः कर्मणः समानकर्तृकादिच्छायां वा इत्यस्मात् सूत्रात् कर्मणः, इच्छायां वा इति पदानि अनुवर्तन्ते।

**सरलार्थः** – इच्छाक्रियाकर्तृसम्बन्धिनः कर्मीभूतात् सुबन्तात् इच्छायाम् अर्थे क्यच् प्रत्ययः विकल्पेन भवति।

**विशेषार्थः** – सुपः इति पञ्चम्यन्तम् आत्मनः इति षष्ठ्यन्तम्। प्रत्ययः परश्च इत्यनयोः अधिकारः प्रत्ययग्रहणे तदन्तविधिना सुबन्तात् इति जायते सूत्रे। अस्मिन् आत्मन् शब्दः स्वस्य वाचकः कर्मणः इत्यस्मात् इष् धातोः कर्मणः ग्रहणम् अतः कर्मणः आत्मनः सुबन्तात् इच्छायाम् इत्यस्मिन्नर्थे विकल्पेन क्यच् प्रत्ययः भवति। क्यचः ककारचकारयोः अनुबन्धलोपे यकारः अवशिष्यते। यथा आत्मनः पुत्रमिच्छति पुत्रीयति अस्मिन् उदाहरणे पुत्रमिति अभीष्टवस्तपवाचकं सुबन्तम्। एतत् सुबन्तम् इच्छति इत्यस्य कर्म। अतः पुत्रशब्दात् क्यच् प्रत्ययः भवति। तदभावे आत्मनः पुत्रमिच्छति इति वाक्यस्य प्रयोगः॥

**2. पदपरिचयः** – सुपः (ष.ए.), धातुप्रातिपदिकयोः (ष.द्वि.)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**समासः** – धातुप्रातिपदिकयोः इति इतरेतरद्वन्द्वः।

**अनुवृत्तिः** – 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' इत्यतः लोपपदं अनुवर्तते।

**सरलार्थः** – धातुप्रातिपदिकयोः अवयवः सुपः लुक् स्यात्।

**विशेषार्थः** – सुपः इति षष्ठ्यन्तम्, धातुप्रातिपदिकयोः इति षष्ठ्यन्तं, लुक् इति प्रथमान्तम्॥ धातुश्च प्रातिपदिकं च इति धातुप्रातिपदिके, तयोः धातुप्रातिपदिकयोः। धातोः प्रातिपदिकस्य च अवयवभूतसुपः लुक् स्यात्।

**प्रत्ययस्य लुक्श्लुपः** इति सूत्रानुसारेण प्रत्यस्य अदर्शनस्य लुक्संज्ञा जायते। अतः सम्पूर्णस्य सुपः लुक् भवति यथा प्रातिपदिकावयः सुपः उदाहरणं राज्ञः पुरुषः राजपुरुषः। पुत्र + अम् + य इति समुदास्य 'सनाद्यन्ता धावतः' इत्यनेन धातुसंज्ञायाम् अतः धातोरवयवस्य सुपः लुक् भवति॥

**3. पदपरिचयः** – क्यचि (स.ए.)), च (एव्ययम्)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** – **'अस्य च्वौ'** इत्यस्मात् 'अ' कारस्य अनुवृत्तिः। 'ई घ्राध्मों' इत्यस्मात् 'ई' कारस्य अनुवृत्तिः।

**सरलार्थः** – क्यच् प्रत्यये परे सति अवर्णस्य स्थाने ईकारादेशः भवति।

**विशेषार्थः** – क्यच् परे अवर्णस्य स्थाने ईकारादेशः स्यात्। सूत्रे अस्य इति उक्तम्। अत परत्वात् ह्रस्व दीर्धयोः उभयोः ग्रहणम् ''आत्मनो मालामिच्छति मालीयति'' ह्रस्वस्योदाहरणं यथा–आत्मनः पुत्रमिच्छति पुत्रीयति।

4. **नः क्ये | 1 | 4 | 15 ||**

क्यचि क्यङि च नान्तमेव पदं, नान्यत्। नलोपः। राजीयति। नान्तमेवेति किम्? वाच्यति। **हलि च।** गीर्यति। पूर्यति। धातोरित्येव। नेह – दिवमिच्छति दिव्यति।

5. **क्यस्य विभाषा | 6 | 4 | 50 ||**

हलः परयोः क्यच्क्यङोर्लोपो वार्धधातुके। **आदेः परस्य। अतो लोपः।** तस्य स्थानिवत्त्वाल्लघूपधगुणो न।

समिधिता, समिध्यिता॥

6. **काम्यच्च | 3 | 9 | 9 ||**

उक्तविषये काम्यच् स्यात्। पुत्रम् आत्मन इच्छति – पुत्रकाम्यति। पुत्रकाम्यिता॥

---

**रूपसिद्धिः – पुत्रीयति** – आत्मनः पुत्रम् इच्छति इति विग्रहे पुत्र-शब्दात् **सुपः आत्मनः क्यच्** सूत्रेण क्यचि अनुबन्धलोपे पुत्रम् य **सुपो धातु...** सूत्रेण सुपो लुकि **क्यचि च** सूत्रेण अकारस्य ईत्वे पुत्रीय **सनाद्यन्ता धातवः** सू. धातुसंज्ञायां लटि, तिपि, शपि, पुत्रीय+अति इति जाते। सवर्णेदीर्घे प्राप्ते **अतो गुणे** इत्यनेन पररूपे पुत्रीयति।

**4. पदपरिचयः** – नः (ष.ए.), क्ये (स.ए.)।

**सूत्रप्रकारः** – नियमसूत्रम्।

**अनुवत्तिः** – '**सुप्तिङन्तं पदम्**' इत्यस्मात् 'पदम्' इत्यस्य अनुवृत्तिः।

**सरलार्थः** – क्यच्, क्यङ् प्रत्ययौ यदि परे भवतः तदा नकारान्तं सुबन्तं पदसंज्ञकं स्यात्, नान्यत्॥

**विशेषार्थः** – द्विपदात्मकमिदं सूत्रम्। सूत्रे नकारे अकारः उच्चारणार्थः। शब्दानुशासनस्य अधिकारेण नकारः शब्दस्वरूपस्य विशेषणम् तेन तदन्त विधिना नान्तं शब्दस्वरूपम् इति जायते। क्यपदेन ''क्यच्'', क्यङ् क्यष् इति त्रयः गृह्यन्ते। वस्तुतः क्यष् प्रत्यये अथवा क्यङ् प्रत्यये परे सति नकारान्तं शब्दस्वरूपं पदसंज्ञकं स्यात्।

यद्यपि ''सुप्तिङन्तं पदम्'' इत्यनेन पदत्वं सिद्ध्यति तथापि 'सिद्धेसत्यारम्भो नियमार्थः' इति नियमेन प्रकृत सूत्रस्यावश्यकता यथा – आत्मनो वाचमिच्छति वाच्यति।

**रूपसिद्धिः – गीर्यति** – आत्मनः गिरम् इच्छति विग्रहे गिर् अम् क्यचि, धातुसंज्ञायाम्, सुपः लोपे **हलि च** इति उपधादीर्घे गीर्य, लटि, तिबादिकार्ये गीर्यति।

**5. पदपरिचयः** – क्यस्य (ष.ए.), विभाषा (प्र.ए.)।

**सूरप्रकारः** – विधिसूत्रम्।

**अनुवत्तिः** – '**यस्य हलः**' इत्यस्मात् हलः, '**अतो लोपः**' इत्यस्मात् 'लोपः इति अनुवर्तेताम्'।

**सरलार्थः** – आर्धधातुकस्य परत्वात् हलः परयोः क्यच् क्यङ् इत्यनयोः प्रत्यययोः विकल्पेन लोपो भवति।

**विशेषार्थः** – आर्धधातुकप्रत्यये परे सति हलः परयोः क्यच् क्यङ्प्रत्यययोः विकल्पेन लोपः स्यात्। ''यस्य हलः'' इत्यनेन नित्यप्राप्तस्य लोपस्य प्रकृतसूत्रेण विकल्पकार्यं विधीयते। ''आदेः परस्य'' इति परिभाषया आदियकारस्य एव लोप भवति। यथा – समिधिता।

**रूपसिद्धिः – समिधिता** – समिधम् आत्मानः इच्छति इष्टा वा 'समिध+अम्' क्यचि धातुसंज्ञायां सुपो लुकि 'समिध+य' इति जाते **नः क्ये** सूत्रेण पदत्वाभावात् जश्त्वाभावे समिध्य इत्यस्माद् लुटि प्र.पु.ए.व. तिपि, प्राप्तं शपं प्रबाध्य तासि प्रत्यये, तिपः स्थाने डादेशे डित्वात् टिलोपे 'समिध्य त् आ' इति जाते आर्धधातुकसंज्ञायाम् इडागमे 'समिध्य इ त् आ' इति जाते **क्यस्य विभाषा** सू. क्यचः लोपे प्राप्ते **आदेः परस्य** सू. य् इत्यस्यैव लोपे समिध् अ इ त् आ अलोपे संयोगे समिधिता।

**6. पदपरिचयः** – काम्यत् (प्र.ए.), च (अव्ययम्)।

**सूरप्रकारः** – विधिसूत्रम्।

**अनुवत्तिः** – '**सुप आत्मनः क्यच्**' इत्यस्मात् सुपः आत्मनः अनयोः अनुवृत्तिः। '**धातोः कर्मणः**'

**7. उपमानादाचारे | 3 | 1 | 10 ||**

उपमानात् कर्मणः सुबन्तादाचारेऽर्थे क्यच् स्यात्। पुत्रमिवाचरति–पुत्रीयति छात्रम्। विष्णूयति द्विजम्॥

**8. अनुनासिकस्य क्विझलोः क्ङिति | 6 | 4 | 15 ||**

अनुनासिकान्तस्योपधाया दीर्घः स्यात् क्वौ झलादौ च क्ङिति। इदमिवाचरति इदामति। राजेव राजानति। पन्था इव पथीनति।

---

**समानकर्तृकादिच्छायां वा**' इत्यस्मात् कर्मणः, इच्छायां, वा, इत्येतेषां त्रयाणाम् अनुवृत्तिः।

**सरलार्थः** – कर्मणः आत्मनः सुबन्तात् इच्छार्थे विकल्पेन काम्यच् प्रत्ययः भवति।

**रूपसिद्धिः – पुत्रकाम्यति** – आत्मनः पुत्रम् इच्छति इति विग्रहे पुत्र+अम् इत्यलौकिकविग्रहे **काम्यच्च** सू. काम्यच् प्रत्यये चलोपे सुपि च लोपे पुत्र काम्य इति जाते। लटि, तिपि, शपि च कृते पुत्र काम्य अति इति जाते। पररूपे कृते पुत्रकाम्यति।

**7. पदपरिचयः** – उपमानात् (प.ए.), आचारे (स.ए.)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवत्तिः** – '**सुपः आत्मनः क्यच्**' इत्यस्मात् सुपः, आत्मनः इत्यनयोः तथा '**धातोः कर्मणः...**' इत्यस्मात् कर्मणः एवं वा इत्यनयोः च अनुवृत्तिः।

**सरलार्थः** – उपमानवाचककर्मसंज्ञकसुबन्तात् आचारे अर्थे क्यच् स्यात्।

**विशेषार्थः** – उपमीयते अनेन इति उपमानम्। उपमानवाचकात् सुबन्तात् आचारे विकल्पेन क्यच् प्रत्ययः स्यात्। ''सुप आत्मनः क्यच्'' इत्यनेन इच्छार्थे क्यच् प्रत्ययः प्रोक्तः। प्रकृतसूत्रेण आचारार्थे क्यच् प्रत्यये पुत्रीयति। एवमेव विष्णुमिवाचरति विष्णूयति।

**(वा.45) सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः। अतो गुणे।** कृष्ण इवाचरति कृष्णति। स्व इवाचरति स्वति। सस्वौ।

इदं वार्तिकं 'कर्तुः क्यङ् सलोपश्च' इत्यस्मिन् सूत्रे महाभाष्ये पठितम् आचारे अर्थे सर्वेषां प्रातिपदिकेभ्य अनन्तरं विकल्पेन क्विप् प्रत्ययः स्यात्। 'क्विप्' इत्यस्य सर्वापहारलोपः।

**रूपसिद्धिः – कृष्णाति** – कृष्ण इव आचरति कृष्ण क्विप् सर्वोपहारलोपः कृष्ण इत्यस्य धातुसंज्ञा लटि, तिपि, शपि पररूपे च कृष्णति।

**8. पदपरिचयः** – अनुनासिकस्य (ष.ए.), क्विझलोः (ष.द्वि.), क्ङिति (स.ए.)॥

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवत्तिः** – '**ढ्रलोपे पूर्वस्य दीर्घोऽणः**' इत्यस्मात् दीर्घ' पदस्य अनुवृत्तिः।

**समासः** – क्विश्च, झल् च इति क्विझलौ तयोः क्विझलोः इतरेतरद्वन्द्वः॥

**सरलार्थः** – अनुनासिकान्तस्य धातोः उपधायाः दीर्घः भवति, झलादौ किति, ङिति, क्विपि प्रत्यये परे सति।

**विशेषार्थः** – त्रिपदात्मकमिदं सूत्रम्। सूत्रे अनुनासिकस्य इति पदम् अङ्गस्य विशेषणम्। अतः तदन्त विधिना अनुनासिकान्ताङ्गस्य इति जायते। क्विझलोः इत्यत्र झल् पदं क्ङिति इत्यस्य विशेषणम्।

अनुनासिकान्तस्य अङस्य उपधायाः दीर्घः स्यात् क्विपरे सति अथवा झलादौ किति ङिति परे सति।

**रूपसिद्धिः – इदामति** – इदम् इव आचरति **सर्वप्राति...** वार्तिकेन क्विप्-प्रत्यये, सर्वापहारलोपे ''**अनुनासिकस्यक्विझलोः**'' सूत्रेण उपधादीर्धे इद् आ म् इदाम् लटि, तिपि, शपि इदामति।

**9. कष्टाय क्रमणे | 3 | 9 | 14 ||**

चतुर्थ्यन्तात् कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात् कष्टाय क्रमते कष्टायते। पापं कर्तुमुत्सहत इत्यर्थः।

**10. शब्दवैरकलाहाभ्रकण्वमेघेभ्यः करण | 3 | 1 | 17 ||**

एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात्। शब्दं करोति शब्दायते।

---

**9. पदपरिचयः** - कष्टाय (प.ए.), क्रमणे (स.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** - '**कर्तुः क्यङ्सलोपश्च**' इत्यस्मात् 'क्यङ्' एवं '**धातोः कर्मणः...**' इत्यस्मात् सूत्रात् वा इति पदम् अनुर्वतते।

**सरलार्थः** - उत्साहे अर्थे चतुर्थ्यन्तात् कष्टशब्दात् क्यङ् प्रत्ययः स्यात्॥

**विशेषार्थः** - चतुर्थ्यन्तकष्टशब्दात् क्रमणे अर्थात् उत्साह इत्यर्थे क्यङ्प्रत्ययः विकल्पेन भवति।

**रूपसिद्धिः - कष्टायते** - कष्टाय क्रमते कष्ट ङे **कष्टाय क्रमणे** सू. क्यङ् अनुबन्धलोपे धातुसंज्ञत्वात् ङे इत्यस्य लोपे ''**अकृत्सार्वधातुकयोर्दीर्घः**'' सूत्रेण अन्त्याकारस्य दीर्घे कष्ट आ य इति जाते आत्मनेपदे लटि त प्रत्यये, शपि, पररूपे, एत्वे च कृते कष्टायते।

**10. पदपरिचयः** - शब्दवैरकलहाभ्रकण्वमेघेभ्यः (प.ब.), करणे (स.ए.)॥

**सूत्रप्रकारः** - विधिसूत्रम्।

**समासः** - शब्दश्च वैरञ्च कलहश्च अभ्रञ्च कण्वश्च मेघश्च तेषामितरेतरयोगद्वन्द्वे शब्दवैरकलहाभ्रकण्वमेघाः तेभ्यः शब्दवैरकलहाभ्रकण्वमेघेभ्यः॥

**अनुवृत्ति** - '**कर्तुः क्यङ् सलोपश्च**' इत्यस्मात् 'क्यङ् इति' '**धातोः कर्मणः...**' इत्यस्मात् वा इति॥

**सरलार्थः** - शब्द, वैर, कलह, अभ्र, कण्व, मेघ इत्येतेभ्यः षड्भ्यः कर्मवाचकशब्देभ्यः परे क्यङ्प्रत्ययः भवति विकल्पेन।

**विशेषार्थः** - कर्मकारकेभ्यः शब्द, वैर, कलह, अभ्र, कण्व, मेघ इत्येभ्यः षट्शब्देभ्यः परत्र विद्यमानात् धातोः करोत्यर्थे क्यङ्प्रत्ययः भवति। यथा शब्दं करोति शब्दायते। एवमेव वैरं करोति वैरायते। कलहं करोति कलहायते। अभ्रं करोति अभ्रायते। कण्वं करोति कण्वायते। मेघं करोति मेघायते।

**रूपसिद्धिः - शब्दायते** - शब्दं करोति इति अर्थे 'शब्द+अम्' इति जाते ''**शब्द-वैर...**'' सूत्रेण क्यङि अनुबन्धलोपे 'शब्द अम् य' इति जाते। धातुसंज्ञायां, सुपो लुकि **अकृत्सार्व...** सू. अजन्ताङ्गस्य दीर्धे आत्मनेपदे लटि, त प्रत्यये, शपि पररूपे च शब्दायते।

**गणसूत्रम् - तत्करोति तदाचष्टे॥**

इति णिच्॥

पाणिनीय धातुपाठे चुरादिगणस्थमिदं गणसूत्रम् तत्करोति तथा तत्कथयति इत्यस्मिन्नर्थे प्रातिपदिकात् णिच् प्रत्ययः भवति। अयं णिच् प्रयोगः वर्तमानकाले एव स्यात्। यथा घटं करोति घटमाचष्टे वा घटयति॥

**गणसूत्रम् - प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च॥**

प्रातिपदिकाद्धात्वर्थे णिच् स्यात्। इष्ठे यथा प्रातिपदिकस्य पुंवद्भाव-रभाव-टिलोप-विन्मतुब्लोपः-यणादिलोप-प्रस्थस्फाद्यादेश-भसंज्ञाः-तद्वण्णावपि स्युः। इत्यल्लोपः। घटं करोत्याचष्टे वा घटयति।

''तत्करोति तदाचष्टे'' इति सूत्रार्थानुगुणं 'तत्कार्यं करोति' वा 'तद् वदति' इत्यनयोः द्वयोः धात्वर्थयोः प्रकृतसूत्रेण प्रातिपदिकात्परत्र 'णिच्' प्रत्ययः विकल्पेन क्रियते। किञ्च इष्ठन्प्रत्यये परे सति यानि पुंवद्भाव-रभाव-टिलोप-विन्मतुबलोप-यणादिलोप-प्रस्थ-स्काद्यादेश-भसंज्ञा कार्याणि भवन्ति, तानि सर्वकार्याणि णिच् प्रत्यये परे सत्यपि भवन्ति।

## स्वाध्यायः

**1. विकल्पं चित्वा रिक्तस्थानं पूरयत।**

(1) सुप आत्मनः ....... प्रत्ययः ? (क्यच्, क्यन्,अच्)

(2) नः क्ये इत्यनेन ....... स्यात् ? (नान्तमेवपदम्, लोपः, निषेधः)

(3) पुत्रकाम्यति इत्यत्र ....... प्रत्ययः ? (ति, काम्यच्, यति)

(4) आचारार्थे ....... प्रत्ययः ? (णिच्, सन्, क्यच्)

(5) कृष्ण इवातपति इत्यत्र ....... रुपम् ? (कृष्णाचरित, कृष्णति, कृष्ण इव)

(6) कष्टाय क्रमणे इत्यत्र कष्ट शब्दस्यार्थः ....... भवति ? (दुःखम्, पापं, सुखम्)

(7) शब्दायते इत्यत्र ....... प्रत्ययः ? (यते, क्यङ्, क्यच्)

**2. लधूत्तरं प्रदेयं।**

(1) सुपोलुक् विधायकं किं सूत्रम् ?

(2) आदेः परस्य इत्यस्य कोऽर्थः ?

(3) काम्याच्च इत्यस्य कोऽर्थः ?

(4) इदामति इत्यस्य विग्रहवाक्यं लिखत।

(5) तत्करोति तदाचष्टे इत्यनेन कः प्रत्ययः ?

**3. अधोनिर्दिष्टानि रूपाणि साधयत।**

(1) पुत्रीयति

(2) गीर्यति

(3) इदामति

(4) शब्दायते

(5) घटयति

•

# ५ कण्ड्वादिप्रकरणम्

**प्रस्तावना**

'कण्डूः' आदिः यस्मिन् प्रकरणे तत्प्रकरणं कण्डवादिप्रकरणम्। पाणिनीयगणपाठे एकः कण्ड्वादिगणोऽप्यस्ति। अस्मिन् गण अन्तर्भूतानां शब्दानां धातुत्वेन तथा प्रातिपदिकत्वेनापि परिगणनं क्रियते। प्रातिपदिकत्वेन एतेषां शब्दानां सर्वासु विभक्तिषु त्रिषु लिङ्गेषु च रूपाणि निष्पाद्यन्ते। यदि कण्ड्वादिगणे विद्यमानशब्दानां धातुत्वेन परिगणनं क्रियते, तर्हि यगादिप्रत्ययं कृत्वा धातुरूपाणि निष्पाद्यन्ते।

---

**11. कण्ड्वादिभ्य यक् | 3 | 1 | 27 ||**

एभ्यो धातुभ्यो नित्यं यक् स्यात् स्वार्थे॥ कण्डूञ् गात्रविघर्षणे॥ १॥ कण्डूयत इत्यादि।

---

**11. पदपरिचयः** - कण्ड्वादिभ्यः (प.ब.) यक् (प्र.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवत्तिः** - **'धातोरेकाचो...'** इत्यस्मात् धातुभ्यः इत्यस्य अनुवृत्तिः।

**समासः** - कण्डूः आदिर्येषां ते कण्ड्वादयः तेभ्यः कण्ड्वादिभ्यः॥

**सरलार्थः** - कण्ड्वादिभ्यः धातुभ्यः स्वार्थे यक्प्रत्ययः स्यात्।

**विशेषार्थः** - कण्डू शब्द आदिः येषां ते कण्डवादयः तेभ्यः कण्ड्वादिभ्यः धातुभ्यः यक् प्रत्ययः भवति। ''अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति'' इति नियमेन यक् प्रत्ययः अत्र स्वार्थे प्रयुक्तः। कण्ड्वादय शब्दाः - कण्डू, मन्तु, वल्गु, सपरं, मही, खेला, हणी, सुख, दुःख, भूषज्, मेधा, उषस्, उरस्, पयस्, लेट्, लोट्।

**रूपसिद्धिः** - **कण्डूयते** - कण्डूञ् गात्रविघर्षणे धातोः **कण्ड्वादिभ्यो यक्** सूत्रेण यकि, कण्डूय इति जाते, धातुसंज्ञायां, लटि, तिपि, शपि कण्डूय अ ति इति जाते अतो गुणे सूत्रेण पररूपे कण्डूयति। आत्मनेपदे कण्डूयते।

## स्वाध्यायः

1. **विकल्पं चित्वा रिक्तस्थानं पूरयत।**

   (1) कण्ड्वादिभ्यः ....... प्रत्ययो भवति। (यक्, शप्, तिप्)

   (2) कण्ड्वादिभ्यः ....... सूत्रम्। (विधि, संज्ञा, नियम)

   (3) कण्ड्वादिशब्दे ....... समासः। (अव्ययी, द्वन्द्व, बहुव्री.)

2. 'कण्ड्वादिभ्यः यक्' सूत्रं विवेचयत।

3. 'कण्ड्यतेः' इति साधयत।

•

| ६ | # आत्मनेपदप्रकरणम् |
|---|---|

**प्रस्तावना**

धातोः विहितानां लकाराणां स्थाने परस्मैपदिनः तथा आत्मनेपदिनः इत्येव द्विविधाः तिङ्प्रत्ययाः आदिश्यन्ते। कीदृशात् धातोः परस्मैपदप्रत्ययाः तथा कीदृशात् धातोः आत्मनेपदप्रत्ययाः क्रियन्ते ? इति तु तिङन्तप्रकरणस्य आदौ सामान्येन निर्दिष्टमस्ति। अस्मिन् प्रकरणे आत्मनेपदस्य विशेषतया विधानं दर्श्यते।

---

**12. कर्तरि कर्मव्यतिहारे | 1 | 3 | 14 ||**

क्रियाविनिमये द्योत्ये कर्तरि आत्मनेपदम्। व्यतिलुनीते। अन्यस्य योग्यं लवनं करोतीत्यर्थः॥

**13. न गतिहिंसार्थेभ्यः | 1 | 3 | 15 ||**

व्यतिगच्छन्ति। व्यतिघ्नन्ति॥

**14. नेर्विशः | 1 | 3 | 17 ||**

निविशते॥

---

**12. पदपरिचयः** – कर्तरि (स.ए.), कर्मव्यतिहारे (स.ए.)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** – **'अनुदात्तङित आत्मनेपदम्'** इत्यस्मात् आत्मनेपदस्य अनुवृत्तिः।

**समासः** – कर्मणः व्यतिहारः कर्मव्यतिहारः तस्मिन् कर्मव्यतिहारे षष्ठीतत्पुरुषः।

**सरलार्थः** – कर्मव्यतिहारे द्योत्ये धातूनां कर्तृवाच्ये आत्मनेपदं भवति॥

**विशेषार्थः** – कर्मणः व्यतिहारः कर्मव्यतिहारः तस्मिन् कर्मव्यतिहारे। कर्म व्यतिहारे अत्र कर्मपदेन क्रिया अभिष्टा। एकस्य योग्यं कार्यं यदि अन्यः करोति तत् कर्मव्यतिहारः इति उच्यते। कर्मव्यतिहारे द्योत्ये कर्तृवाच्ये धातोः आत्मनेपदं स्यात्। यथा – व्यतिलुनीते।

**रूपसिद्धिः – व्यतिलुनीते** – वि + अति द्वयोः उपसर्गयोः योगेन क्रियायाः विनिमयव्यापारः सूच्यते। अन्यस्य योग्यं लवनम् अन्यः करोति इति विग्रहे वि अति पूर्वात् लूञ छेदने क्र्यादिगणस्य धातोः **कर्तरि कर्म व्यतिहारे** सूत्रेण आत्मनेपदं लटि प्र.पु.ए.व. तप्रत्यये शपि प्राप्ते ''क्र्यादिभ्यःश्ना'' इति श्नाप्रत्यये व्यति लू ना त इति जाते **प्वादीनां ह्रस्वः** सूत्रेण धातोः ऊकारस्य ह्रस्वत्वे इत्वे व्यति लु नी त इति जाते। एत्वे संयोगे च व्यतिलुनीते।

**13. पदपरिचयः** – न (अव्ययम्), गतिहिंसार्थेभ्यः (प.बहु.)॥

**सूत्रप्रकारः** – निषेधविधिसूत्रम्।

**अनुवृत्तिः** – **'कर्तरि कर्मव्यतिहारे'** इत्यस्मात् 'कर्मव्यतिहारे' **'अनुदात्तङित आत्मनेपदम्'** इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः॥

**समासः** – गतिश्च हिंसा च तयोरितरेतरयोगद्वन्द्वः गतिहिंसे, ते अर्थौ येषां ते गतिहिंसार्थाः, तेभ्यः गतिहिंसार्थेभ्यः। द्वन्द्वगर्भबहुव्रीहिः॥

**सरलार्थः** – गतिहिंसार्थेभ्यः धातोः क्रियायाः विनिमये अर्थे आत्मनेपदं न स्यात्।

**विशेषार्थः** – गमनार्थकात् हिंसार्थकात् धातोः कर्मव्यतिहारे आत्मनेपदं न स्यात्। यथा – व्यतिगच्छन्ति।

**रूपसिद्धिः – व्यतिघ्नन्ति** – वि + अति उपसर्गयोः योगेन हन् धातोः **न गति.** सूत्रनियमेन परस्मैपदे लटि, झि प्रत्यये अन्तादेशे च वि + अति + हन् + अन्ति इति जाते कित्वात् **''गम-हन-जन-खन...''** इत्यनेन उपधालोपे **''हो हन्तेर्..''** इति सूत्रेण कुत्वे, घकारे संयोगे च व्यतिघ्नन्ति।

**14. पदपरिचयः** – नेः (प.ए.), विशः (प्र.ब.)॥

**सूत्रप्रकारः** – विधिसूत्रम्॥

**15. परिव्यवेभ्यः क्रियः | 1 | 3 | 18 ||**

परिक्रीणीते। विक्रीणीते। अवक्रीणीते॥

**16. विपराभ्यां जेः | 1 | 3 | 19 ||**

विजयते। पराजयते॥

**17. समवप्रविभ्यः स्थः | 1 | 3 | 22 ||**

सन्तिष्ठते। अवतिष्ठते। प्रतिष्ठते। वितिष्ठते॥

**18. अपह्नवे ज्ञः | 1 | 3 | 44 ||**

शतमपजानीते, अपलपतीत्यर्थः॥

---

**अनुवृत्तिः** – ''**अनुदात्तङित आत्मनेपदम्**'' इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः।

**सरलार्थः** – नि उपसर्गपूर्वकात् विश् धातोः आत्मनेपदं स्यात्॥

**रूपसिद्धिः – निविशते** – नि उपसर्गपूर्वकात् विश् धातोः **नेर्विशः...** सूत्रेण आत्मनेपदे लटि, त प्रत्यये शपि एत्वे कृते निविशते।

**15. पदपरिचयः** – परिव्यवेभ्यः (प.बहु.) क्रियः (प.ए.)॥

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** – ''**अनुदात्तङित आत्मनेपदम्**'' इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः।

**समासः** – परिश्च विश्च अवश्च तेषामितरेतरयोगद्वन्द्वः परिव्यवाः तेभ्यः परिव्यवेभ्यः।

**सरलार्थः** – परि, वि, अव, इति एतेभ्यः उपसर्गेभ्यः परत्रविद्यामानात् क्री धातोः आत्मनेपदं स्यात्॥

**रूपसिद्धिः – परिक्रीणीते** – परि उपसर्गात् डुक्रीञ् धातोः **परिव्यवे..** सूत्रेण लटि आत्मनेपदे त प्रत्यये, श्ना प्रत्यये अनुबन्धलोपे परि क्रीना त इति जाते ''**ई हल्यघोः**'' सूत्रेण आकारस्य ईत्वे, नस्य णत्वे कृते परिक्रीणीते।

**16. पदपरिचयः** – विपराभ्यां (प.द्वि), जेः (प.ए.)॥

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** – ''**अनुदात्तङित आत्मनेपदम्**'' इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः।

**समासः** – विश्च पराश्च विपरौ, ताभ्यां विपराभ्याम् इतरेतरयोगद्वन्द्वः।

**सरलार्थः** – वि उपसर्गात् तथा परा उपसर्गपूर्वात् जि जये धातोः आत्मनेपदं स्यात्।

**रूपसिद्धिः – विजयते** – वि उपसर्गात् जि जये धातोः **वि – पराभ्यां जेः** सूत्रेण आत्मनेपदे लटि तप्रत्यये, शपि, टेः एत्वे गुणे, अय् आदेशे कृते विजयते।

**17. पदपरिचयः** – समवप्रविभ्यः (प.ब.), स्थः (प.ए.)॥

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** – ''अनुदात्तङित आत्मनेपदम्'' इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः।

**समासः** – सम् च अवश्च प्रश्च विश्च तेषामितरेतरयोगद्वन्द्वः समवप्रवयः, तेभ्यः समवप्रविभ्यः।

**सरलार्थः** – सम्, अव, प्र, वि इत्येतेभ्यः उपसर्गेभ्यः परत्रविद्यमानात् स्था धातोः आत्मनेपदं स्यात्॥

**रूपसिद्धिः – सन्तिष्ठते** – सम् उपसर्गात् स्था धातोः **समवप्रविभ्यः स्थः** सूत्रेण आत्मनेपदे लटि, तप्रत्यये, शपि, **प्रा-घ्रा-ध्मा...** इति सूत्रेण स्था स्थाने तिष्ठादेशे म् इत्यस्य अनुस्वारे पर-सवर्णे च कृते सन्तिष्ठत इति जाते टेः एत्वे सन्तिष्ठते।

**18. पदपरिचयः** – अपह्नवे (स.ए.), ज्ञः (प.ए.)॥

**सूत्रप्रकारः** – विधिसूत्रम्।

**19. अकर्मकाच्च | 1 | 3 | 45 ||**

सर्पिषो जानीते, सर्पिषोपायेन प्रवर्तत इत्यर्थः॥

**20. उदश्चरः सकर्मकात् | 1 | 3 | 43 ||**

धर्ममुच्चरते। उल्लङ्घ्य गच्छतीत्यर्थः॥

**21. समस्तृतीयायुक्तात् | 1 | 3 | 54 ||**

रथेन सञ्चरते॥

**22. दाणश्च सा चेच्चतुर्थ्यर्थे | 1 | 3 | 55 ||**

सम्पूर्वाद् दाणस्तृतीयान्तेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे। दास्या संयच्छते कामी॥

---

**अनुवृत्तिः** - ''**अनुदात्तङित आत्मनेपदम्**'' इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः।

**सरलार्थः** - अपह्नवे अर्थे ज्ञा धातोः आत्मनेपदं स्यात्।

**रूपसिद्धिः - अपजानीते** - उप उपसर्गात् ज्ञा धातोः **अपह्नवे ज्ञः** सूत्रेण आत्मनेपदे लटि, तप्रत्यये **ज्ञाजनोर्जा**: सूत्रेण ज्ञा स्थाने जा आदेशे, श्नाप्रत्यये अनुबन्धलोपे **ई हल्यघोः** इति सूत्रेण आकारस्य ईत्वे, टेः एत्वे च कृते अपजानीते।

**19. पदपरिचयः** - अकर्मकात् (प.ए.) च (अव्ययम्)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** - ''अनुदात्तङित आत्मनेपदम्'' इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः।

**सरलार्थः** - अकर्मकात् ज्ञाधातोः आत्मनेपदं स्यात्॥

**20. पदपरिचयः** - उदः (प.ए.), चरः (प.ए.), सकर्मकात् (प.ए.)॥

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** - ''**अनुदात्तङित आत्मनेपदम्**'' इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः।

**सरलार्थः** - उद् उपसर्गात् सकर्मकचरधातोः आत्मनेपदं स्यात्।

**रूपसिद्धिः - उच्चरते** - उत् उपसर्गात् चर् धातोः **उदश्चरः...** इति सूत्रेण आत्मनेपदे तप्रत्यये, शपि टेः एत्वे, तकारस्य श्चुत्वे कृते उच्चरते।

**21. पदपरिचयः** - समः (प.ए.), तृतीयायुक्तात् (प.ए.)॥

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** - ''**उदश्चरः सकर्मकात्**'' इत्यस्मात् 'चरः' इत्यस्य एवं च ''**अनुदात्तङित आत्मनेपदम्**'' इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः।

**समासः** - तृतीयया युक्तः तृतीयायुक्तः, तस्मात् तृतीयायुक्तात्।

**सरलार्थः** - तृतीयायुक्तात् सम् उपसर्गपूर्वकचर् धातोः आत्मनेपदं स्यात्।

**रूपसिद्धिः - रथेन सञ्चरते** - रथेन इति तृतीयाविभक्त्यन्तपदेन युक्तात् सम्पूर्वकचर् धातोः **समस्तृतीयायुक्तात्** सूत्रेण आत्मनेपदे तप्रत्यये, शपि, टेः एत्वे, मस्य अनुस्वारे संचरते इति जाते **वा पदान्तस्य** सूत्रेण विकल्पेन परसवर्णे कृते सञ्चरते।

**22. पदपरिचयः** - दाणः (प्र.ए.), च (अव्ययम्), सा (प्र.ए.), चेत् (अव्ययम्), चतुर्थ्यर्थे (स.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** - '**समस्तृतीयायुक्तात्**' इत्यस्मात् समः तृतीयायुक्तात् इत्यस्य अनुवृतिः एवं च '**अनुदात्तङित' आत्मनेपदम्**' इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः।

**23. पूर्ववत्सनः | 1 | 3 | 62 ||**

सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात्। एदिधिषते॥

**24. हलन्ताच्च | 1 | 2 | 10 ||**

इक्समीपाद् हलः परो झलादिः सन् कित्। निविविक्षते॥

**25. गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः | 1 | 3 | 32 ||**

गन्धनं-सूचनम्, उत्कुरुते-सूचयतीत्यर्थः। अवक्षेपणं भर्त्सनम्। श्येनो वर्तिकामुत्कुरुते। भर्त्सयतीत्यर्थः। हरिमुपकुरुते। सेवत इत्यर्थः। परदारान् प्रकुरते। तेषु सहसा प्रवर्तते। एधोदकस्योपस्कुरुते-गुणमाधत्ते। कथाः प्रकुरुते, प्रकथयतीत्यर्थः। शतं प्रकुरुते, धर्मार्थं विनियुङ्क्ते। एषु किम् ? कटं करोति। **भुजोऽनवने।** ओदनं मुङ्क्ते। अनवने किम्। महीं भुनक्ति।

---

**समासः** - चतुर्थ्याः अर्थश्चतुर्थ्यर्थः, तस्मिन् चतुर्थ्यर्थे।

**सरलार्थः** - सम् पूर्वक दाण् धातोः अनुचितव्यवहारार्थे चतुर्थ्यर्थे तृतीया भवति तत्र आत्मनेपदप्रयोगः॥

**विशेषार्थः** - सम् उपसर्गात् परे तृतीया यदि चतुर्थी अर्थे प्रयुज्यते तर्हि आत्मनेपदं स्यात्। अशिष्टव्यवहारे चतुर्थ्यर्थे तृतीया विभक्तेः प्रयोगः दृश्यते। यथा-दास्या संयच्छते कामी अत्र वाक्येऽस्मिन् चतुर्थी सम्प्रदाने इत्यनेन दासी शब्दस्य चतुर्थी विभक्तिः भवेत्। परंतु 'अशिष्ट व्यवहारे दाण प्रयोगे चतुर्थ्यर्थे तृतीया' इत्यनेन तृतीयाप्रयोगः। सम् पूर्वकदाण् धातोः प्रकृतसूत्रेण आत्मनेपदं स्यात्।

**रूपसिद्धिः - दास्या संयच्छते कामी - दास्या** तृतीयान्तः शब्दः चतुर्थ्यर्थे प्रयुक्तः। सम्पूर्वात् दाणधातोः आत्मनेपदे लटि, तप्रत्यये, शपि, **प्राघ्राध्मा...** सूत्रेण यच्छ-आदेशे, पररूपे, एत्वे, अनुस्वारे च कृते संयच्छते।

**23. पदपरिचयः** - पूर्ववत् (अव्ययम्), सनः (प.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** - "**अनुदात्तङित आत्मनेपदम्**" इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः।

**समासः** - पूर्वेण इति पूर्ववत्।

**सरलार्थः** - सन् प्रत्ययात् पूर्वं यदि आत्मनेपदं स्यात् तर्हि सन्नन्तात् अपि आत्मनेपदं भवति॥

**विशेषार्थः** - पूर्वेण तुल्यं पूर्ववत्। "तेन तुल्यं क्रिया चेत् वतिः" इति वतिप्रत्ययः। सन्प्रकृतभूतात् धातोः यदि आत्मनेपदं स्यात् तर्हि सन्नन्तात् अपि आत्मनेदं भवति। यथा - एदिधिषते।

**रूपसिद्धिः - एदिधिषते** - एधितुम् इच्छति इत्यर्थे एध धातोः सनि 'एध् स्' इति जाते सनः आर्धधातुकत्वात् इडागमे एध् इ स इति जाते **सन्यङो** सूत्रेण एधि इत्यस्य द्वित्वे प्राप्ते **अजादेर्द्वितीयस्य** सूत्रेण धि इत्यस्य द्वित्वे अभ्यास-कार्ये धस्य जश्त्वेन दकारे, मूर्धन्यषकारे धातुसंज्ञायां **पूर्ववत् सनः** सूत्रेण आत्मनेपदे लटि तप्रत्यये, शपि, पररूपे, टेः एत्वे च एदिधिषते।

**24. पदपरिचयः** - हलन्तात् (प.ए.), च (अव्ययम्)।

**सूत्रप्रकारः** - अतिदेशसूत्रम्॥

**अनुवृत्तिः** - 'इको झल्' इत्यस्मात् "इक्, झल्" इत्यनयोः अनुवृत्तिः, 'असंयोगाल्लिट् कित्' इत्यस्मात् "कित्" इत्यस्य अनुवृत्तिः 'रुदविदमुषग्रहिस्वपिप्रच्छः संश्च' इत्यस्मात् "सन्" इत्यस्य अनुवृत्तिः॥

**सरलार्थः** - इक् समीपाद् हलः परत्र विद्यामानः झलादिः सन् कित् स्यात्॥

**रूपसिद्धिः - निविविक्षते - निवेष्टुम्** इच्छति नि विश् धातोः सनि, द्वित्वे, अभ्यासकार्ये, **व्रश्चभ्रस्ज...** सूत्रेण शस्य षत्वे **पढोः कः सि** इत्यनेन षस्य कत्वे **आदेशप्रत्ययोः** सूत्रेण सस्य षत्वे संयोगे, धातुत्वे **पूर्ववत् सनः** सूत्रेण आत्मनेपदे लटि, तप्रत्यये, शपि अनुबन्ध लोपे टेः एत्वे संयोगे च निविविक्षते।

**25. पदपरिचयः** - गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु (स.ए.), कृञः (प.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्॥

**अनुवृत्तिः** - ''**अनुदात्तङित्त आत्मनेपदम्**'' इत्यस्मात् आत्मनेपदम् इत्यस्य अनुवृत्तिः।

**समासः** - गन्धनञ्च, अवक्षेपणञ्च, सेवनञ्च, साहसिक्यञ्च प्रतियत्नञ्च, उपयोगञ्च तेषामितरेतरयोगद्वन्द्वे गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोयोगाः तेषु...।

**सरलार्थः** - गन्धनादिभ्यः उपयोगपर्यन्तेषु सप्तसु अर्थेषु कृधातोः आत्मनेपदं स्यात्॥

**विशेषार्थः** - गन्धनम्, अवक्षेपणम् सेवनम् साहसिक्यम्, प्रतियत्नः, प्रकथनम्, उपयोगः एतेषु सप्तसु अर्थेषु कृञ्धातोः आत्मनेपदं स्यात्। यथा - गन्धनम्=सूचनम् कः कं न उत्कुरुते। अवक्षेपणम्=भर्त्सनम् श्येनो वर्तिकामुदाकुरुते। सेवनम्=सेवा-हरिमुपुकुरुते। साहसिक्यम्=सहसा प्रवर्तते-परदारान् प्रकुरुते। प्रतियत्नः=गुणाधानम्-एधोदकस्योपस्कुरुते। प्रकथनम्=सविस्तरं कथनम्=कथाः प्रकुरुते। उपयोगः=धर्म कर्मणि प्रयोगः शतं प्रकुरुते।

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत।**

(1) कर्तरिकर्मव्यतिहारे इत्यत्र ....... पदम्। (आत्मने, परस्मै, उभय)

(2) नेर्विशः ....... सूत्रम्। (विधि, संज्ञा, अतिदेश)

(3) विपराभ्यां ....... धातोः प्रत्ययः। (जि, नि, गम्)

(4) उच्चरते अर्थात् ....... । (पठति, गच्छति, वदति)

(5) दाणप्रयोगे ....... विभक्तिः। (पञ्चमी, तृतीया, चतुर्थी)

**2. लघूत्तराणि देयानि -**

(1) गतिहिंसार्थेभ्यः कस्य नषेधः ?

(2) व्यतिघ्नन्ति इत्यत्रः कः धातुः ?

(3) सन्तिष्ठते इति कस्योदाहरणम् ?

**3. अधोनिर्दिष्ठानि रूपाणि साधयत।**

(1) सञ्चरते (3) उच्चरते

(2) निविशते (4) व्यतिलुनीते

**4. अधोनिर्दिष्ठाना सूत्राणां सोदाहरणमर्थं लिखत।**

(1) न गतिहिंसार्थेभ्यः (3) अकर्माकाच्च

(2) परिव्यवेभ्यः क्रियः (4) पूर्ववत्सनः

●

# ७ परस्मैपदप्रकरणम्

**प्रस्तावना**

परस्मैपदविधानाय 'शेषात् कर्तरि परस्मैपदम्' इत्ययं साधारण नियमः तिङन्तप्रकरणस्यादौ निर्दिष्टः। यदा कस्माच्वित् धातोः अत्मनेपदं न विधीयते, तदा सः परस्मैपदसञ्ज्ञां लभते। यथा - भवति, गच्छति, इत्यादि। अस्यां परस्मैपदप्रक्रियायां तानि परस्मैपदसम्बद्धसूत्राणि सन्ति यानि उभयपदधातुभ्यः कर्त्रभिप्राये क्रियाफले गम्यमाने सति प्राप्तम् अत्मनेपदसंज्ञां निषेधन्ति वा आत्मनेपदधातुभ्यः साक्षात् आत्मनेपदसंज्ञां निषेधन्ति।

---

**26. अनुपराभ्यां कृञः | 1 | 3 | 79 ||**

कर्तृगे च फले गन्धानादौ च परस्मैपदं स्यात्। अनुकरोति। पराकरोति।

**27. अभिप्रत्यतिभ्यः क्षिपः | 1 | 3 | 79 ||**

क्षिप प्रेरणे। स्वरितेत्। अभिक्षिपति।

**28. प्राद्वहः | 1 | 3 | 81 ||**

प्रवहति।

---

**26. पदपरिचयः** - अनुपराभ्यां (प.द्वि.व.), कृञः (प.ए.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः -शेषात् कर्तरि परस्मैपदम्** इत्यस्मात् परस्मैपदमित्यस्यानुवृत्तिः।

**सूत्रसमासः** - अनुश्च पराच तेषामितरेतरद्वन्द्व अनुपरौ, ताभ्याम् अनुपराभ्याम्।

**सरलार्थः** - अनुपराभ्याम् उपसर्गाभ्यां कृञ् धातोः परस्मैपदं स्यात्।

**विशेषार्थः** - कर्तृगेऽपि फले गन्धनादौ च परस्मैपदार्थमिदम्। कृञ् धातोः ञित्त्वात् **स्वरितञितः कर्त्रभिप्राये क्रियाफले** इत्यनेन आत्मनेपदे प्राप्ते सति परस्मैपदविधानार्थमिदं सूत्रम्।

**विशेषार्थः** - **अनुकरोति** - अनु + कृ धातोः **अनुपराभ्यां कृञः** इत्यनेन सूत्रेण परस्मैपदे लटि, तिपि, शपि प्राप्ते शपं प्रबाध्य तनादिकृञ्भ्यः उः इति उप्रत्यये, उप्रत्ययस्य आर्धधातुकत्वात् ऋकारस्य गुणे रपरत्वे अनु + कर् + उ + ति इति जाते उकारस्य गुणे अनुकरोति इति रूपम्।

**27. पदपरिचयः** - अभिप्रत्यतिभ्यः (प.ब.व.), क्षिपः (प.ए.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः -शेषात् कर्तरि परस्मैपदम्** इत्यस्मात् परस्मैपदमित्यस्यानुवृत्तिः।

**सूत्रसमासः** - अभिश्च प्रतिश्च अतिश्च तेषामितरेतरयोगद्वन्द्वे अभिप्रत्यतयः तेभ्यः अभिप्रत्यतिभ्यः।

**सरलार्थः** - अभिप्रत्यतिभ्यः क्षिप्धातोः परस्मैपदं स्यात्।

**विशेषार्थः** - क्षिप्-धातुः पाणिनीयधातुपाठे तुदादिगणे स्वरितेत् वर्तते। क्रियाफलस्य कर्तृगामिन्यां स्वरितञितः.... इत्यनेन आत्मनेपदं प्राप्नोति। अभि-प्रति-अति एतेभ्यः उपसर्गेभ्यः क्षिप् धातोः परस्मैपदं स्यात्।

**रूपसिद्धिः** - **अभिक्षिपति** अभिउपसर्गपूर्वकक्षिप् धातोः परस्मैपदे लटि, तिपि **तुदादिभ्यः शः** इत्यनेन शप्रत्यये अनुबन्धलोपे अभि क्षिप् + अ + ति संयोगे अभिक्षिपति।

**28. पदपरिचयः** - प्रात् (प.ए.व.), वहः (प.ए.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः -शेषात् कर्तरि परस्मैपदम्** इत्यस्मात् परस्मैपदमित्यस्यानुवृत्तिः।

**29. परेर्मृषः | 1 | 3 | 82 ||**

परिमृष्यति।

**30. व्याङ्परिभ्यो रमः | 1 | 3 | 83 ||**

रमु क्रीडायाम्। विरमति

**31. उपाच्च | 1 | 3 | 84 ||**

यज्ञदत्तमुपरमति। उपरमयतीत्यर्थः। अन्तर्भावितण्यर्थोऽयम्।

---

**सरलार्थः** – प्रपूर्वक वह् प्रापणे धातोः परस्मैपदं स्यात्।

**विशेषार्थः** – वह् प्रापणे धातुः भ्वादिगणे स्वरितेत् निर्दिष्टः। अतः कर्त्रभिप्राये क्रियाफले स्वरितञितः.... इत्यनेन आत्मनेपदं प्राप्नोति। तदपवादत्वेन प्रकृतसूत्रेण परस्मैपदं विहितम्।

**29. पदपरिचयः** – परेः (प.ए.व.), मृषः (प.ए.व.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** –**शेषात् कर्तरि परस्मैपदम्** इत्यस्मात् परस्मैपदमित्यस्यानुवृत्तिः।

**सरलार्थः** – परि उपसर्गपूर्वक्मृष् धातोः परस्मैपदं स्यात्।

**विशेषार्थः** – ''मृष तितिक्षायाम्'' इति धातुः दिवादिगणे स्वरितेत् निर्दिष्टः। अतः स्वरितञितः.... इत्यनेन आत्मनेपदं प्राप्नोति। प्रकृतसूत्रेण परि उपसर्गपूर्वकमृष् धातोः आत्मनेपदं स्यात्। यथा परिमृष्यति। परि + मृष् + श्यन्। अत्र 'दिवादिभ्यः श्यन्' इत्यनेन श्यन् प्रत्ययः।

**रूपसिद्धिः** – **अभिक्षिपति** अभि उपसर्गपूर्वक्षिप् धातोः परस्मैपदे लटि, तिपि **तुदादिभ्यः शः** इत्यनेन शप्रत्यये अनुबन्धलोपे अभि क्षिप् + अ + ति संयोगे अभिक्षिपति।

**30. पदपरिचयः** – व्याङ्परिभ्यः (प.ब.व.), रमः (प.ए.व.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** –**शेषात् कर्तरि परस्मैपदम्** इत्यस्मात् परस्मैपदमित्यस्यानुवृत्तिः।

**सूत्रसमासः** – विश्च आङ्च परिश्च तेषामितरेतरद्वन्द्वे–व्याङ्परयः तेभ्यः व्याङ्परिभ्यः।

**सरलार्थः** – वि आङ् परि उपसर्गपूर्वकरम् धातोः परस्मैपदं स्यात्।

**विशेषार्थः** – भ्वादिगणे 'रमु–क्रीडायाम्' इति धातुः अनुदात्तेत् वर्तते। अतः **अनुदात्तङित आत्मनेपदम्**।

इत्यनेन नित्यमात्मनेपदं प्राप्नोति। अस्मिन् सूत्रे वि आङ् परिभ्यः रम् धातोः परस्मैपदं स्यात्।

**रूपसिद्धिः** – **विरमति** – वि उपसर्गपूर्वक रम् धातोः **व्याङ्परिभ्यो रमः** इत्यनेन सूत्रेण परस्मैपदे लटि प्रथमपुरुषैकवचने तिपि अनुबन्धलोपे शपि वि + रम् + अ + ति संयोगे कृते विरमति इति रूपम्।

**31. पदपरिचयः** – उपात् (प.ए.व.), च इत्यव्ययपदम्

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** –**व्याङ्परिभ्यो रमः** इत्यस्मात् रमः इत्यस्यानुवृत्तिः

**सरलार्थः** – उपपूर्वकरम् धातुरपि परस्मैपदी स्यात्।

**विशेषार्थः** – अष्टाध्यायां **विभाषाऽकर्मकात्** (1/3/8) इत्यनेन सूत्रेण उपपूर्वक अकर्मक रम् धातोः विकल्पेन परस्मैपदं विधीयते। यथा अध्ययनात् उपरमति उपरमते वा। यद्यपि उपपूर्वकरम् धातुः अकर्मकत्वेन गृह्यते तथापि प्रकृतसूत्रे रम् धातोः अन्तर्भावितण्यन्तार्थस्य ग्रहणम्। अन्तर्भावितः ण्यन्तस्यार्थो येन सः। यथा यज्ञदत्तमुपरमति। अत्र प्रयुक्तस्य उपरमति इत्यस्य उपरमयति इत्यर्थः।

## स्वाध्यायः

**1. विकल्पं चित्वा रिक्तस्थानं पूरयत।**

(1) अनवन शब्दस्य ....... अर्थः। (भोजनम्, पालनम्, रक्षणम्)

(2) प्रवहति इत्यस्य ....... सूत्रेण परस्मैपदम्। (उपाच्च, परेर्मृषः, प्राद्वहः)

(3) प्राद्वहः ....... सूत्रम्। (विधि, संज्ञा, अतिदेश)

(4) रमुधातो ....... अर्थः। (क्रिडायां, निद्रायं, लज्जायाम्)

(5) मृषधातोः ....... अर्थः। (तितिक्षायाम्, जुगुप्सयाम्, हिंसायाम्)

**2. लधूत्तरं प्रदेयं।**

(1) क्षिपधातोः कोऽर्थः ?

(2) परेर्मृषः इत्यस्य किमुदाहरणम् ?

(3) उपरमति इत्यस्य कोऽर्थः ?

(4) हलन्ताच्च इति सूत्रस्य कोऽर्थः ?

(5) अभिक्षिपति इत्यत्र कः धातुः ?

**3. अधोनिर्दिष्टानि रूपाणि साधयत।**

(1) अनुकरोति।

(2) अभिक्षिपति।

(3) प्रवहति।

(4) उपरमति

(5) विरमति।

**4. अधोनिर्दिष्टनां सूत्राणां सोदाहरणमर्थं लिखत।**

(1) व्याङ्परिभ्यो रमः।

(2) प्राद्वहः।

(3) उपाच्च।

(4) अभिप्रत्यतिभ्यः क्षिपः।

•

# ८ भावकर्मप्रकरणम्

**प्रस्तावना**

"लः कर्मणि च भावे चाकर्मकेभ्यः" इति सूत्रेण कर्त्रर्थे कर्मार्थे भावार्थे च लकाराः विधीयन्ते। सकर्मकेभ्यो धातुभ्यः कर्त्रर्थे कर्मार्थे च लकारः विधीयन्ते तथा अकर्मकेभ्यो धातुभ्यः कर्त्रर्थे भावार्थे च लकाराः विधीयन्ते। प्रकरणेऽस्मिन् भावार्थे कर्मार्थे च लकाराः विधीयन्ते। अस्यां स्थितौ तिङन्तरूपेषु यद् यद् वैलक्षण्यं दृश्यते, तत्कथनाय प्रकरणस्याऽस्य आरम्भः भवति। प्रकरणमिदम् अनुवादकर्मसौकर्याय अतितराम् उपयुज्यते।

---

**32. भावकर्मणोः || 1 | 3 | 13 ||**

लस्यात्मनेपदम्।

**33. सार्वधातुके यक् || 3 | 1 | 67 ||**

धातोर्यक, भावकर्मवाचिनि सार्वधातुके। भावः क्रिया। सा च भावार्थकलकारेणानूद्यते। युष्मदस्मद्भ्यां सामानाधिकरण्याभावात् प्रथमः पुरुषः। तिङ्वाच्यक्रियाया अद्रव्यरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि किन्तु एकवचनमेवोत्सर्गतः। त्वया मया अन्यैश्च भूयते। बभूवे।

**34. स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च || 6 | 4 | 62 ||**

उपदेशे योऽच् तदन्तानां हनादीनाञ्च चिणीवाङ्गकार्यं वा स्यात् स्यादिषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च चिण्वद्भावपक्षेऽयमिट्। चिण्वद्भावाद् वृद्धिः। भाविता, भविता, भाविष्यते। भविष्यते। भूयताम्। अभूयत। भाविषीष्ट, भविषीष्ट॥

---

**32. पदपरिचयः** – भावकर्मणोः (ष.द्वि.व.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः – तङानावात्मनेपदम् इत्यतः आत्मनेपदम्।**

**सरलार्थः** – भावेकर्मणि च धातोः आत्मनेपदं भवति।

**विशेषार्थः** – भावे कर्मणि च यो लकारः तस्यात्मनेपदं भवति इत्यर्थः।

**33. पदपरिचयः** – सार्वधातुके (स.ए.व.), यक् (प्र.ए.व.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** –**चिण्भावकर्मणोः** इत्यस्मात् भावकर्मणोः अनुवृत्तिः।

**सरलार्थः** – भाववाचिनि कर्मवाचिनि च सार्वधातुके परे धातोः यक् स्यात्।

**विशेषार्थः** – भावः अर्थात् भावना, उत्पादना, क्रिया। सा क्रिया धातुत्वेन सकलधातुवाच्या। क्रियायाः भावार्थकलकारेणानूद्यते। भाववाच्ये लकारस्य युष्मदस्मद्भ्यां सह असमानाधिकरणत्वम्। अतः प्रथमपुरुषस्य प्रयोगः। भावे द्वित्वाभावात् द्विवचनस्य बहुवचनस्य च अभावः, किन्तु औत्सर्गिकमेकवचनम्। अर्थात् भाववाच्ये लकाराः प्रथमपुरुषैकवचने प्रयुज्यन्ते। यथा त्वया, मया, अन्यैश्च भूयते।

**रूपसिद्धिः – भूयते** – भू धातोः भाववाच्ये प्रयोगात् लटि प.पु.ए.व. आत्मनेपदे त प्रत्यये भू + य + त इति जाते टेः एत्वे भूयते इति साधुः।

**34. पदपरिचयः** – स्य-सिच्-सीयुट्-तासिषु (स.ब.व.), भावकर्मणोः (स.द्वि.व.), उपदेशे (स.ए.व.),

**35. चिण् भावकर्मणोः | 3 | 1 | 66 ||**

च्लेशिच्ण् स्याद् भावकर्मवाचिनि तशब्दे परे। अभावि। अभाविष्यत, अभविष्यत।

अकर्मकोऽप्युपसर्गवशात् सकर्मकः। अनुभूयते आनन्दश्चैत्रेण त्वया मया च। अनुभूयेते। अनुभूयन्ते। त्वमनुभूयसे। अहमनुभूये। अन्वभावि। अन्वभाविषाताम्, अन्वभविषाताम्। णिलोपः। भाव्यते। भावयाञ्चक्रे। भावयाम्बभूवे। भावयामासे। चिण्वदिट्। आभीयत्वेनासिद्धत्वाण्णिलोपः। भाविता, भावयिता। भाविष्यते, भावयिष्यते। अभाव्यत। भाव्येत। भाविषीष्ट, भावयिषीष्ट। अभावि। अभाविषाताम्। अभावयिषाताम्। बुभूष्यते। बुभूषाञ्चक्रे। बुभूषिता बुभूषिष्यते। बोभूय्यते। बोभूयते। **अकृत्सार्वधातुकयोर्दीर्घः**। स्तूयते विष्णुः। स्ताविता, स्तोता। स्ताविष्यते, स्तोष्यते। अस्तावि। अस्ताविषाताम्, अस्तोषाताम्। **ऋ गतौ। गुणोऽर्तीति** गुणः। अर्यते। **स्मृ स्मरणे।** स्मर्यते। सस्मरे। उपदेशग्रहणाच्चिण्वदिट्। अरिता, अर्ता। स्मारिता, स्मर्ता। **अनिदितामिति** न लोपः। स्रस्यते। इदितस्तु नन्धते। सम्प्रसारणम् - इज्यते।

**36. तनोतेर्यकि | 6 | 4 | 44 ||**

आकरोऽन्तादेशो वा स्यात्। तायते, तन्यते।

---

अज्झनग्रहदृशाम् (ष.ब.व.) वा इत्यव्ययपदम्। चिण्वत् इत्यव्ययपदम्। इट् (प्र.ए.व.)। च इत्यव्ययपदम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सूत्रसमासः** - स्यश्च सिच्च सीयुट् च तासिश्च तेषामितरेतरयोगद्वन्द्वे स्यसिच्सीयुट्तासयः, तेषु स्यसिच्सीयुट्तासिषु। भावश्च कर्म च, भावकर्मणी, तयोर्भावकर्मणोः। अच्च, हनश्च ग्रहश्च दृश् च तेषामतरेतरद्वन्द्वे अज्झनग्रहदृशस्तेषामज्झनग्रहदृशाम्। चिणि इव चिण्वत्।

**सरलार्थः** - भावविषये कर्मविषये च स्य-सिच्-सीयुट्-तास्-प्रत्ययेषु परेषु सत्सु उपदेशावस्थायाम् अजन्तधातूनां तथा हन्-ग्रह्-दृश् धातूनां च विकल्पेन चिण्वत् अङ्गकार्यम्। किञ्च स्यादीनाम् ईडागमश्च स्यात्।

**विशेषार्थः** - सूत्रे उपदेशम् अचः वाचकम्। अङ्गस्याधिकारेण तदन्तविधिना उपदेशे योऽच् तदन्तानाम् अङ्गानां धातूनामित्यर्थः। चिणि इव चिण्वत् सप्तम्यन्तात् वतिः। भावकर्मणोः स्य-सिच्-सीयुट्-तासिषु उपदेशे अजन्तधातुनां हन्-ग्रह-दृश् धातूनां च स्थाने चिण्वत् अङ्गकार्यं विकल्पेन भवति। तथा स्यादीनाम् ईडागमोऽपि भवति। अर्थात् स्यादीनाम् ईडागमः चिण्वद्भावश्च स्यात्। चिण्वद्भावे - **अचो ञ्णिति** अथवा **अत उपधायाः** इत्यनेन णिन्निमित्तकवृद्धिः यथा - भाविष्यते, ग्रहिष्यते। **आतो युक् चिण्कृतोः** इत्यनेन आदन्तधातूनां युगागमः। **हो हन्तेर्ञ्णिन्नेषु** इत्यनेन स्यादीनामपि घत्वम्। यथा - घानिष्यते।

**रूपसिद्धिः - भविता** - भू सत्तायाम् इत्यस्माद् भ्वादिगणस्थाद् धातोः भावकर्मणोः इत्यनेन आत्मनेपदे भाववाच्ये लुटि प्र.पु.ए.व. त प्रत्यये **स्यतासी लृलुटोः** सू. तासि **''लुटः प्रथमस्य...''** इत्यनेन त स्थाने विकल्पेन चिण्वद्भावे इटि च कृते चिण्वद्भावाद् वृद्धौ आव् आदेशे भाव् + इ + त् + आ इति जाते संयोगे च भाविता इति रूपं साधु।

**35. पदपरिचयः** - चिण् (प्र.ए.व.), भावकर्मणोः (स.द्वि.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** -**चिण् ते पदः** इत्यस्मात् ते तथा **च्लेः सिच्** इत्यस्मात् च्लेः इत्यस्यानुवृत्तिः।

**सूत्रसमासः** - भावश्च कर्म च, भावकर्मणी, तयोर्भावकर्मणोः।

**सरलार्थः** - भाववाचिनि कर्मवाचिनि च तशब्दे परे च्लि इत्यस्य स्थाने चिण् इत्यादेशः भवति।

**रूपसिद्धिः - अभावि** - भू सत्तायाम् इत्यस्माद् भ्वादिगणस्थाद् धातोः **भावकर्मणोः** सूत्रेण आत्मनेपदे लुङि प्र.पु.ए.व. त प्रत्यये, अडागमे, अनुबन्धलोपे अ + भू + इ + त इति जाते **चिणो लुक्** सूत्रेण तकारस्य लोपे **अचोञ्णिति** इत्यनेन वृद्धौ आवादेशे च अभावि इति रूपं सिद्धम्।

**37. तपोऽनुतापे च | 3 | 1 | 65 ||**

तपश्चलेश्चिण् न स्यात् कर्मकर्तर्यनुतापे च। अन्वतप्त पापेन। **घुमास्थे**तीत्वम्। धीयते। ददे।

**38. आतो युक् चिण्कृतोः | 7 | 3 | 33 ||**

आदन्तनां युगागमः स्यात् चिणि ञ्णिति कृति च। दायिता, दाता। दायिषीष्ट, दासीष्ट। अदायि। अदायिषातम्। भज्यते।

**39. भञ्जेश्च चिणि | 6 | 4 | 33 ||**

नलोपो वा स्यात्। अभाजि, अभञ्जि। लभ्यते।

---

**36. पदपरिचयः** - तनोतेः (ष.ए.व.), यकि (स.ए.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** -**विड्वनोरनुनासिकस्यात्** इत्यस्मात् आत् इत्यस्य, **ये विभाषा** इत्यस्मात् विभाषा इत्यस्यानुवृत्तिः।

**सरलार्थः** - यकि परे तन् धातोः स्थाने विकल्पेन आकारान्तादेशः स्यात्।

**विशेषार्थः** - **सूत्रेऽस्मिन् अलोन्त्यस्य** - इत्यस्य सूत्रस्य उपस्थितिः। अतः अन्त्यस्य तनः नकारस्य स्थाने आकारादेशः स्यात्।

**37. पदपरिचयः** - तपः (प.ए.व.), अनुतापे (स.ए.व.) च इत्यव्ययपदम्।

**सूत्रप्रकारः** - निषेध-विधिसूत्रम्।

**अनुवृत्तिः** -**च्लेः सिच्** इत्यस्मात् च्लेः, **चिण् ते पदः** इत्यस्मात् चिण्, न रुधः इत्यस्मात् न, अचः कर्मकर्तरि इत्यस्मात् कर्मकर्तरि इत्येतेषामनुवृत्तिः।

**सरलार्थः** - कर्मकर्तरि पश्चात्तापार्थे च तप् धातोः स्थाने च्लेः चिणादेशः न स्यात्।

**विशेषार्थः** - अन्वतप्त इत्यत्र अतप् च्लि त इत्यवस्थायां **चिण् भावकर्मणोः** इत्यनेन सूत्रेण च्लेः चिण् प्राप्नोति। प्रकृतसूत्रेण कर्मकर्तृप्रक्रियायामस्ति। अत्र तु पश्चात्तापस्योदाहरणं प्रदत्तम्।

**रूपसिद्धिः** - **अन्वतप्त** - अनुपूर्वात् तप अनुतापे धातोः कर्मणि लुङि **भावकर्मणोः** अनेन सूत्रेण आत्मनेपदे प्र.पु.ए.व. त प्रत्यये अट् आगमे, च्लौ, **चिण् भाव॰** सूत्रेण चिणि प्राप्ते तपोऽनुतापे सूत्रेण तन्निषेधे च्लेः सिचि अनुबन्धलोपे **झलो झलि** इत्यनेन सिचो लोपे यणादेशे च अन्वतप्त।

**38. पदपरिचयः** - आतः (ष.द्वि.व.), युक् (प्र.ए.व.), चिण्कृतोः (स.द्विव.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** -**अचो ञ्णिति** इत्यस्मात् ञ्णिति इत्यस्यानुवृत्तिः।

**सूत्रसमासः** -चिण् कृत् च तयोरितरेतरद्वन्द्वः चिण्कृतौ तयोः चिण्कृतोः।

**सरलार्थः** - आदन्तस्य अङ्गस्य युगागमः स्यात्। चिणि, ञिति, णिति, कृति च परे।

**विशेषार्थः** - आतः इति अङ्गस्य विशेषणम्। तदन्तविधिना आदन्तस्य अङ्गस्य इत्यर्थो जायते। **आद्यन्तौ टकितौ** इत्यनेन आदन्ताङ्गस्य अन्तावयवो भवति। ञ् इत् यस्य सः ञित् तस्मिन् ञिति। एवमेव णिति।

**रूपसिद्धिः** - **दायिता** - दा धातोः आत्मनेपदे त प्रत्यये, डात्वे, तासि, चिण्वद्भावे कृते दा + त् + आ + इट् आगमे आतो युक् सूत्रेण आकारन्ताङ्गस्य युकि अनुबन्धलोपे संयोगे दायिता।

**39. पदपरिचयः** - भञ्जेः (ष.ए.व.) च इत्यव्ययपदम्। चिणि (स.ए.व.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**40. विभाषा चिण्णमुलोः | 7 | 1 | 69 ||**

लभेर्नुमागमो वा स्यात्। अलम्भि, अलाभि।

---

**अनुवृत्तिः** – **जान्तनशां विभाषा** इत्यस्मात् विभाषा, ''**श्नान्नलोपः**'' इत्यस्मात् न लोपः इत्यनयोः अनुवृत्ति।

**सरलार्थः** – चिण्परे सति भञ्जधातोः नकारस्य विकल्पेन लोपः स्यात्।

**रूपसिद्धिः – अभाजि** – भञ्ज धातोः कर्मवाच्ये लुङि आत्मनेपदे प्र.पु.ए.व. त प्रत्यये च्लिप्रत्यये, णिचि, अट् आगमे **भञ्जेश्च चिणि** इति सूत्रेण नकारलोपे उपधावृद्धौ अभाजि।

**40. पदपरिचयः** – विभाषा (प्र.ए.व.), चिण्णमुलोः (स.द्वि.व.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** –**लभेश्च** इत्यस्मात् लभेः। **इदिता नुम् धातोः** इत्यस्मात् नुमः अनुवृत्तिः।

**सूत्रसमासः** – चिण् च णमुल् च इतरेतरद्वन्द्वे चिण्मुलौ, तयोः चिण्णमुलोः।

**सरलार्थः** – चिण्णमुलोः परस्य लभ् धातोः विकल्पेन नुमागमः स्यात्।

**रूपसिद्धिः – अलम्भि** – लभ् धातोः कर्मवाच्ये आत्मनेपदे अलभ् प्र.पु.ए.व. त प्रत्यये च्लि प्रत्यये च्लेः चिणादेशे, अट् आगमे अलभ् + इ + च चिण् इत्यस्य परत्वात् विभाषा चिण्णमुलोः सूत्रेण नुमागमे अनुबन्धलोपे अ + ल + न् + भ् + इ त इति जाते अनुस्वारे परसवर्णे तलोपे च अलम्भि।

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत।**

(1) सार्वधातुकेभ्यः ....... प्रत्ययो भवति। (यक्, यत्, सन्)

(2) चिण्वद्भावस्य ....... फलम्। (वृद्धिः, इडागमः, संप्रसारणम्)

(3) तनोतेर्यकि ....... प्रकारकं सूत्रम्। (विधि, संज्ञा, परिभाषा)

(4) लभेः ....... आगमः भवति । (नुप्, शप्, श्नप्)

(5) दायिता इत्यत्र ....... प्रत्ययः। (शय्, युक्, युग्)

**2. लघूत्तराणि देयानि –**

(1) भावः नाम किम् ?

(2) ''अभावि'' इत्यत्र कः लकारः ?

(3) लभ्धातोः लुङि किम् रूपम् ?

(4) ऋधातोः कः अर्थः ?

**3. अधोनिर्दिष्ठानि रूपाणि साधयत।**

(1) भूयते (3) अभावि

(2) भाविता (4) दायिता

**4. अधोनिर्दिष्ठाना सूत्राणां सार्थानि लेख्यानि।**

(1) स्यसिच्साषीयुट्तासिषु...। (3) चिण् भावकर्मणोः

(2) सार्वधातुके यक् (4) भम्जेश्च चिणि

●

# ९ कर्मकर्तुप्रकरणम्

**प्रस्तावना**

महाभाष्ये वाक्यमेकं श्रूयते – ''विवक्षातः कारकाणि भवन्ति।'' अर्थात् कारकाणां प्रयोगः वक्तुः इच्छाधीनो भवति। एकमेव वाक्यं वक्ता नानाप्रकारैः प्रस्तौति। यथा ''अहं काष्ठं भिनद्मि'' इत्ययं कर्तृवाच्यप्रयोगः। ''मया काष्ठं भिद्यते'' इत्येवं रूपेणापि वक्तुं शक्यते। तृतीयप्रयोगः योऽस्ति, सः कर्मकर्तृप्रयोगः विद्यते। यत्र कर्मपदस्य वाक्ये प्रयोगः कर्तृरूपेण भवति, तद्वाक्यं ''कर्मकर्तृवाच्यम्'' उच्यते।

यदा कर्मैव कर्तृत्वेन विवक्षितं तदा सकर्मकाणामप्यकर्मकत्वात् कर्तरि भावे च लकारः।

---

**41. कर्मवत् कर्मणा तुल्यक्रियः | 3 | 1 | 87 ||**

कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत् स्यात्। कार्यातिदेशोऽयम् तेन यगात्मनेपदचिण्चिण्वदिटः स्युः। पच्यते फलम्। भिद्यते काष्ठम्। अपाचि। अभेदि। भावे-भिद्यते काष्ठेन।

---

**41. पदपरिचयः** – कर्मवत् इत्यव्ययपदम्, कर्मणा (तृ.ए.व.), तुल्यक्रियः (प्र.ए.व.)।

**सूत्रप्रकारः** – अतिदेशसूत्रम्

**अनुवृत्तिः** – **कर्तरि शप्** इत्यस्मात् शप् अनुवर्तते।

**सूत्रसमासः** – तुल्य क्रिया यस्य सः तुल्यक्रियः, कर्मण इव, कर्मणि इव वा कर्मवत्।

**सरलार्थः** – कर्मकर्तृत्वेन जातेऽपि कर्मस्था इव क्रिया लक्षिता भवति, सः कर्ता कर्मवत् भवति।

**विशेषार्थः** – अकर्मक धातोः 'लः कर्मणि...' इत्यनेन लकाराः कर्तरि भावे च स्युः। अतः अत्रापि लकाराः तथैव विधीयन्ते। प्रथमं लकाराः कर्तरि विधातुमुच्यते। ''कर्मवत् कर्मणा तुल्यक्रियः'' इति। कर्मणा इति शब्दात् कर्मस्थक्रियायाः ग्रहणम्। तुल्य क्रिया यस्य सः तुल्य क्रियः। कर्मणा तुल्यक्रियः कर्मवत् भवति। इति सूत्रार्थः।

**रूपसिद्धिः**: – पच्यते फलम् – फलरूपस्य कर्मणः एव कर्तृत्वेन विवक्षायाम् अपि पच् धातोः कर्तरि लटि लट्लकारेण कर्तुः उक्तत्वात् प्रथमायां **कर्मवत् कर्मणा तुल्यक्रियः** सूत्रेण फलस्य इति कर्तुः कर्मवद्भावात् **भावकर्मणोः** सूत्रेण आत्मनेपदे लस्य तप्रत्यये यकि, टेः एत्वे संयोगे च पच्यते फलम्।

## स्वाध्यायः

1. **योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत।**

   (1) कर्मवत् ....... तुल्यक्रियः। (भाववत्, कर्मवत्, कर्तृवत्)

   (2) ....... कारकाणि भवन्ति (विवक्षातः, धातुतः, कर्मतः)

   (3) ....... काष्ठं भिद्यते। (अहम्, मया, सः)

2. कर्मकर्तृवाच्यम् अर्थात् किम् ?

3. पच्यते फलम् इति रूपं साधयत।

•

# १० लकारार्थ-प्रकरणम्

**प्रस्तावना**

लडादयः दशलकाराः सन्ति। केषु केष्वर्थेषु कः कः लकारः विधीयते ? इत्यस्मिन् सन्दर्भे भ्वादौ ''**वर्तमाने लट्**'' इत्यादिभिः सूत्रैः सर्वसाधारणनिर्णयः प्रोक्तः। किन्तु एतावन्मात्रेणैव लकारज्ञानं पर्याप्तं नास्त्येव। ते चार्थाः सामान्याः सन्ति। प्रकरणेऽस्मिन् उत्सर्गापवादरीत्या परस्परम् अन्येषु अर्थेषु लकाराः विधीयन्ते इति प्रतिपाद्यविषयोऽस्ति। तदर्थं पार्थक्येनैव कौमुद्यां लकारार्थप्रक्रिया निरूपिता।

---

**42. अभिज्ञानवचने लृट् | 3 | 2 | 112 ||**

स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट्। लङोपवादः। वस निवासे। स्मरसि कृष्ण गोकुले वत्स्यामः। एवं बुध्यसे, चेतयसे इत्यादिप्रयोगेऽपि।

**43. न यदि | 3 | 2 | 113 ||**

यद्योगे उक्तं न। अभिजानासि कृष्ण यद्वने अभुञ्जमहि।

**44. लट् स्मे | 3 | 2 | 118 ||**

लिटोऽपवादः। यजति स्म युधिष्ठिरः।

---

**42. पदपरिचयः** - अभिज्ञावचने (स.ए.व.), लृट् (प्र.ए.व.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** - **अनद्यतने लङ्** इत्यस्मात् लङ् इत्यस्यानुवृत्तिः।

**सूत्रसमासः** - अभिज्ञा = स्मृतिः, सा उच्यते अनेन इति अभिज्ञावचनम् तस्मिन् अभिज्ञावचने।

**सरलार्थः** - स्मृतिबोधकानि पदानि यथा - अभिजानासि, स्मरसि, बुध्यसे, चेतयसे इत्यादयः उपपदे भवन्ति तदा अनद्यतने भूतेऽर्थे धातोः लृट् स्यात्।

**विशेषार्थः** - अभिज्ञा स्मृतिः, सा उच्यते अनेनेति अभिज्ञावचनम्। अत्र करणे ल्युट् प्रत्ययः सतिसप्तम्यन्तं पदम्। स्मृतिबोधकपदानि उपपदे सति भूते अनद्यतनार्थे धातोः लृट् स्यात्। ''अनद्यतने लङ्'' इत्यनेन प्राप्तस्य लङः अपवादमिदं सूत्रम्।

**रूपसिद्धिः** - **स्मरसि कृष्ण गोकुले वत्स्यामः** - अत्र स्मरसि इत्यस्य अभिज्ञाबोधकोपपदे वस निवासे धातोः लृटि उ.पु.ब.व. मस् प्रत्यये **सस्य आर्धधातुके** सूत्रेण तकारे, दीर्धे सस्य रुत्वे विसर्गे वत्स्यामः।

**43. पदपरिचयः** - न इत्यव्ययपदम्, यदि (अव्ययपदम्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**अनुवृत्तिः** -**अभिज्ञावचने लृट्** इत्यस्यानुवर्तनम्।

**सरलार्थः** - **यत्** इत्यस्य योगे स्मृतिबोधकानि पदानि उपपदे भवन्ति, तदा अनद्यतने भूतेऽर्थे धातोः लृट् न भवति। **अभिज्ञावचने** लृट् इत्यस्य अपवादसूत्रम्।

**विशेषार्थः** - यदीति भावसप्तम्यन्तम्। यद् शब्देन योगे अभिज्ञावचने भूते अनद्यतने धातोः लृट् न स्यात्। अत्र पूर्वसूत्रस्य निषेधः। अतः पुनः औत्सर्गिकात् ''अनद्यतने लङ्'' इत्यनेन लङ्लकारः। यथा - अभिजानासि कृष्ण यद्वने अभुञ्जमहि।

**रूपसिद्धिः** - **अभुञ्जमहि** - भुजो पालनाभ्यवहारयोः वङि, महिङ अट् आगमे अभुज् मह **रूधादिभ्यः श्नम्** इति श्नम् प्रत्यये नकारान्तवर्तिनः अकारस्य श्चुत्वे, अभुञ्जमहि।

**45. वर्तमानसामीप्ये वर्तमानवद्वा | 3 | 3 | 131 ||**

वर्तमाने ये प्रत्यया उक्तास्ते वर्तमानसामीप्ये भूते भविष्यति च वा स्युः। कदागतोऽसि। अयमागच्छामि, अयमागमं वा। कदा गमिष्यसि। एष गच्छामि, गमिष्यामि वा।

**46. हेतुहेतुमतोर्लिङ् | 3 | 3 | 156 ||**

वा स्यात् कृष्णं नमेच्चेत्सुखं यायात्। कृष्णं नंस्यति चेत्सुखं यास्यति। **भविष्यत्येवेष्यते।** नेह। हन्तीति पलायते। विधिनिमन्त्रणेति लिङ्। विधिः प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनम्। यजेत्। निमन्त्रणं नियोगकरणम्। आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्। इह भुञ्जीत। आमन्त्रणं कामचारानुज्ञा। इहासीत। अधीष्टं सत्कारपूर्वको व्यापारः। पुत्रमध्यापयेद्भवान्। सम्प्रश्नः सम्प्रसारणम्। किं भो वेदमधीयीय उत तर्कम्। प्रार्थनं याच्ञा। भो भोजनं लभेय। एवं लोट्।

---

**44. पदपरिचयः** – लट् (प्र.ए.व.), स्मे (स.ए.व.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** –**अनद्यतने लङ्** इत्यस्मात् अनद्यतने, **परोक्षे लिट्** इत्यस्मात् परोक्षे इत्यस्यानुवृत्तिः।

**सरलार्थः** – **स्म** इत्युपपदे विद्यमाने सति अनद्यतने भूतेऽर्थे धातोः लट् लकारो भवति। **लट् स्मे** इति **परोक्षे लिट्** इत्यस्य अपवादसूत्रम्।

**विशेषार्थः** – स्मशब्दयोगे भूते अनद्यते परोक्षार्थे धातोः लट् स्यात्। भूतानद्यतनपरोक्षार्थे ''परोक्षे लिट्'' इत्यनेन सूत्रेण प्राप्तस्य लिटः अपवादोऽयम्।

**रूपसिद्धिः** – **यजति स्म युधिष्ठिरः** – यज् धातोः परोक्षे अनद्यतने भूतेऽर्थे **स्म** इत्युपपदे सति लटि प्र.पु.ए.व. यजति स्म इति सिद्ध्यति।

**45. पदपरिचयः** – वर्तमानसामीप्ये (स.ए.व.), वर्तमानवत् इत्यव्ययपदम्, वा इत्यव्ययपदम्।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रसमासः** – समीपम् एव सामीप्यम्। वर्तमानस्य सामीप्यं वर्तमानसामीप्यं तस्मिन् वर्तमानसामीप्ये।

**सरलार्थः** – ये प्रत्ययाः वर्तमानस्यार्थे भवन्ति ते वर्तमानस्य समीपवर्तिनः भूतकालस्य भविष्यकालस्य च अर्थे विकल्पेन भवन्ति।

**विशेषार्थः** – समीपमेव सामीप्यम्। वर्तमानकालस्य समीपवर्ती भूते भविष्यत्काले च वर्तमानकालवत् प्रत्ययाः विकल्पेन भवन्ति। यथा कदा आगतोऽसि-भूतकाले प्रश्नः। अयम् आगच्छामि। वर्तमानकाले उत्तरम्।

**46. पदपरिचयः** – हेतुहेतुमतोः (स.द्वि.व.), लिङ् (प्र.ए.व.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** –**विभाषा धातौ सम्भावन...** इत्यस्मात् विभाषा इत्यस्यानुवृत्तिः।

**सूत्रसमासः** – हेतुरस्यास्तीति हेतुमान्। हेतुश्च हेतुमान् च तयोः इतरेतरद्वन्द्वे हेतुहेतुमन्तौ, तयोः हेतुहेतुमतोः।

**सरलार्थः** – हेतौ हेतुमति अर्थे च लिङ्लकारः भवति। लिङ्गाभावे यथाप्राप्तः लृट् भवति।

**रूपसिद्धिः** – **कृष्णं नमेच्चेत् सुखं यायात्** – अत्र नमस्कारः हेतुहेतुमद्भावः अर्थः। नम् धातोः, या धातोः च भविष्यकाले लृट् प्राप्तः तं प्रबाध्य **हेतुहेतुमतोर्लिङ्** सूत्रेण लिङि तिबादिकार्ये नमेत्, यायात् रुपद्वयं सिद्ध्यति।

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा रिक्तस्थानं पूरयत।**

(1) तुल्यक्रियः इत्यत्र ....... समासः। (अष्य, बहु, तत्)

(2) अभिज्ञावचने ....... लकारः। (लट्, लृट्, लोट्)

(3) लट् स्मै इति ....... अपवादः। (लिटः, लटः, लुटः)

(4) विवक्षातः ....... भवन्ति। (कारकाणि, समासाः, तद्धिताः)

(5) न यदि ....... सूत्रम्। (विधि, संज्ञा, अतिदेशः)

**2. लघूत्तराणि प्रदेयानि।**

(1) अभिज्ञावचने कः लकारः ?

(2) हेतुहेतुमतोः कः लकारः ?

(3) वर्तमानसामीप्ये वर्तमानवद्वा इत्यस्योदाहरणं किम् ?

**3. निम्नाङ्कितानि रूपाणि साधयत।**

(1) अभुञ्जमहि।

(2) यजति स्म युधिष्ठिरः।

(3) कृष्ण नमेच्चेत् सुखं यायात्।

**3. निम्नाङ्कितानां सूत्राणां व्याख्यासहितमर्थं लिखत।**

(1) कर्मवत् कर्मणा तुल्यक्रियः।

(2) अभिज्ञावचने लृट्।

(3) वर्तमान सामीप्ये......॥

•

# ११ कृत्यप्रकरणम्

**प्रस्तावना**

तिङ्भिन्नः प्रत्ययः कृत्संज्ञकः भवति। कृदन्तस्य ज्ञानं छात्राणां कृते महदुपयोगी अस्ति। अस्य ज्ञानेन अनुवादे भाषणे च वैविध्यम् आगच्छति। यथा – सोऽगमत् सोऽपश्यत् इत्यादौ तिङन्तस्य स्थाने सः गतः सः गतवान्, तेन दृष्टम् सः दृष्टवान् आदयः प्रयोगाः सुन्दराः, प्रतीयन्ते भवन्ति। हितोपदेशः, पञ्चतन्त्रम्, संस्कृतनाटकादिशास्त्राणि कृदन्तप्रयोगैः परिपूर्णानि सन्ति। तेषां शास्त्राणां सरलावबोधाय अत्र कृत्यप्रकरणं निरूप्यते।

---

**47. धातोः | 3 | 1 | 91 ||**

आतृतीयाध्यायसमाप्तेर्ये प्रत्ययास्ते धातोः परे स्युः। कृदतिङिति कृत्संज्ञा।

**48. वाऽसरूपोऽस्त्रियाम् | 3 | 1 | 94 ||**

अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य बाधको वा स्यात् स्त्र्यधिकारोक्तं विना।

**49. कृत्याः | 3 | 1 | 95 ||**

ण्वुल्तृचावित्यतः प्राक् कृत्यसंज्ञाः स्युः।

**50. कर्तरि कृत् | 3 | 4 | 67 ||**

कृत्प्रत्ययः कर्तरि स्यात्। इति प्राप्ते –

---

**47. पदपरिचयः** – ''धातोः'' (प.ए.व.)

**सूत्रप्रकारः** – अधिकारसूत्रम्।

**सरलार्थः** – अस्मिन् धातोरधिकारे आतृतीयाध्यायसमाप्तेः विहितप्रत्ययाः धातोः परे स्युः। अतिङ्कृत्संज्ञको भवति।

**विशेषार्थः** – कृत्संज्ञायाः प्रयोजनं 'कर्तरिकृत्' इत्यादिषु सूत्रेषु कृत्प्रत्ययानामर्थनिर्देशः स्यात् तथा 'कृत्तद्धितसमासाश्च' इत्येनन कृदन्तानां प्रातिपदिकसंज्ञा भवेदिति।

**48. पदपरिचयः** – वा (अव्य), असरूपः (प्र.ए.व.), अस्त्रियाम् (स.ए.व.)

**अनुवृत्तिः** –'धातोः' 3/11/91 इत्यस्मात् अधिकारस्य अनुवृत्तिः।

**सूत्रप्रकारः** – परिभाषासूत्रम्।

**सूत्रसमासः** – समानं रूपं यस्य स सरुपः। न सरूपः–असरूपः नञ्समासः। न स्त्री इति अस्त्री।

**सरलार्थः** – धातोरित्यधिकारे विहितः असरूप-विशेषविधिः अर्थात् अपवादः। विशेषः सामान्यस्य बाधको भवति। सामान्यविधिः विशेषविधिं त्यक्त्वा अन्यत्र प्रवृत्तः भवति। यथोक्तं प्रकल्प्य चापवादविषयं तत् उत्सर्गोऽभिनिविशते॥ यथा लोके-ब्राह्मणेभ्यो दधि दीयतां तक्रं कौण्डिन्याय।

**49. पदपरिचयः** – 'कृत्याः' (तृ.ब.व.)

**सूत्रप्रकारः** – संज्ञासूत्रम्।

**सरलार्थः** – ण्वुल्तृचौ सूत्रात् प्रागुक्ताः प्रत्ययाः कृत्यसंज्ञकाः भवन्ति।

**विशेषार्थः** – **तव्यं च तव्यतश्चैवानीयर्केलिमरौ तथा।**

**यतं ण्यन्तं क्यपं चापि कृत्यान् सप्त प्रचक्षते॥**

**50. पदपरिचयः** – 'कर्तरि' (स.ए.व.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**51. तयोरेव कृत्यक्तखलर्थाः | 3 | 4 | 70 ||**

एते भावकर्मणोरेव स्युः।

**52. तव्यत्तव्यानीयरः | 3 | 1 | 96 ||**

धातोरेते प्रत्ययाः स्यु। एधितव्यम्, एधनीयंत्वया। भावे औत्सर्गिकमेकवचनं क्लीबत्वं च। चेतव्यश्चयनीयो वा धर्मष्त्वया। (केलिमर उपसंख्यानम्) पचेलिमा माषाः पक्तव्या इत्यर्थः। भिदेलिमाः सरलाः। भेत्तव्या इत्यर्थः। कर्मणि प्रत्ययः।

---

**सरलार्थः** – अस्मिन् धात्वधिकारे कृत्संज्ञकाः प्रत्यया कर्तरि कारके भवन्ति।

**विशेषार्थः** – 'कृत्या' इत्यनेन कृत्यसंज्ञा क्रियते ते कृत्संज्ञकाः प्रत्ययाः कर्तरि भवन्ति। किन्तु अग्रिमसूत्रेण (तयोरेव कृत्यक्तखलर्थाः) अपवादो भवति।

**51. पदपरिचयः** – तयो (स.द्वि.व.), कृत्यक्तखलर्थाः (प्र.ब.व.)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** –लः कर्मणि 3/1/61 इत्येनन 'कर्मणि' एवं भावे इत्यनुवर्तते।

**सूत्रसमासः** – कृत्याश्च क्तश्च खलर्थाश्च ते कृत्यक्तखलर्थाः (इतरेतरद्वन्द्वः), खलोऽर्थः खलर्थः खलर्थ एवार्थो येषां ते खलर्थाः॥

**सरलार्थः** – कृत्यप्रत्ययाः क्तप्रत्ययाः खलर्थकप्रत्याश्च सकर्मकधातुभ्यः कर्मणि तथा च अकर्मकधातुभ्यः भावे एव भवन्ति।

**विशेषार्थः** – ''प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च'' अर्थात् प्रैषः, अतिसर्गः प्राप्तकालः इत्यर्थेषु गम्यमानेषु कृत्यप्रत्ययाः प्रयुज्यन्ते।

**52. पदपरिचयः** – 'तव्यत्तव्यानीयरः' (तृ.ब.व.)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रसमासः** – तव्यत् च तव्यश्च अनीयर् च तव्यत्तव्यानीयरः। (इतरेतरद्वन्द्वः)

**सरलार्थः** – तव्यत्, तव्य, अनीयर्, प्रत्ययाः धातोः भवन्ति।

**विशेषार्थः** – तव्यत् इत्यस्य अन्त्यस्य तकारस्य तथा अनीयर् इत्यस्य रेफस्य ''**हलन्त्यम्**'' इत्यनेन इत्संज्ञायां ततः लोपो भवति। तव्यत् तव्ययोः रूपसिद्धिषु भेदः नास्ति किन्तु स्वरव्यवस्थायै तव्यत् इत्यत्र तलोपो भवति।

**रूपसिद्धिः** – एध वृद्धौ इत्यस्माद् भ्वादिगणस्थाद् धातोः '**कर्तरिकृत्**' इति सूत्रं प्रबाध्य '**तयोरेव कृत्यक्तखलार्थाः**' इत्यनेन भावे '**तव्यत्तव्यानीयरः** इत्यनेन तव्य-प्रत्यये एध् + तव्य इति जाते' **आर्धधातुकं शेषः** इत्यनेन आर्धधातुकसंज्ञायां '**आर्धधातुकस्येऽवलादेः**' इत्यनेन इडागमे अनुबन्धलोपे संयोगे एधितव्य इति जाते **कृदतिङ्** इत्यनेन तव्यस्य कृत्संज्ञायां **कृत्तद्धिसमासाश्च** इत्यनेन प्रातिपदिकसंज्ञायां सौ भावे औत्सर्गिकं क्लीबत्वम् इति नपुंसकलिङ्गत्वे **अतोऽम्** इत्यनेन सोरमि एधितव्य + अम् इति जाते सवर्णदीर्धे प्राप्ते किन्तु **अमिपूर्वः** इत्यनेन पूर्वरूपे एधितव्यम् इति सिद्धम्।

**वार्तिकार्थः** – **(केलिमर उपसंख्यानम्)** धातोः केलिमर प्रत्ययः भवति। यथा पचोलिमाः माषाः इत्यत्र डुपचष् पाके धातोः केलिमर्-प्रत्यये कृते पचेलिमाः इति रूपं सिद्ध्यति।

**53. कृत्यल्युटो बहुलम् | 3 | 3 | 113 ||**

क्लचित्प्रवृत्तिः क्वचिदप्रवृत्तिः

क्वचिद्विभाषा क्वचदन्यदेव।

विधेर्विधानं बहुधा समीक्ष्य

चतुर्विधिं बाहुलकं वदन्ति।

स्नात्यनेनेति स्नानीयं चूर्णम्। दीयतेऽस्मै दानीयो विप्रः।

**54. अचो यत् | 3 | 1 | 97 ||**

अजन्ताद्धातोर्यत् स्यात्। चेयम्।

**55. ईद्यति | 6 | 4 | 65 ||**

यति परे आत ईत्स्यात्। देयम्। ग्लेयम्।

---

**53. पदपरिचयः** - कृत्यलुटः (प्र.ब.व.) बहुलम् (प्र.ए.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सूत्रसमासः** - कृत्याश्च ल्युट् च कृत्यल्युटः (इतरेतरद्वन्द्वः)

**सरलार्थः** - कृत्यप्रत्ययाः ल्युट् च बहुलं प्रवृत्ताः भवन्ति। न केवलं भावकर्मणोः।

**विशेषार्थः** - बहून् अर्थान् लाति इति बहुलम्। बहुलकतायाः चत्वारः भेदाः सन्ति - (१) क्वचित्प्रवृत्तिः (२) क्वचिदप्रवृत्तिः (३) क्वचिद्विभाषा (४) क्वचिदन्यदेव॥

**रूपसिद्धिः - दानीयः विप्रः** - दीयतेऽस्मै इति विग्रहे डुदाञ् दाने इत्यस्माद् जुहोत्यादिगणस्थाद् धातोः अनुबन्धलोपे **कृत्यल्युटो बहुलम्** इत्यनेन सम्प्रदानेऽभिधेये **तव्यत्तव्यानीयरः** इत्यनेन अनीयर् प्रत्यये अनुबन्धलोपे दा + अनीय इति जाते सवर्णदीर्घे दानीय इति जाते कृदन्तत्वात् प्रातिपदिकत्वे सौ अनुबन्धलोपे सस्य रुत्वे विसर्गे च दानीयः इति सिद्धम्।

**54. पदपरिचयः** - 'अचः' (प.ए.व.) यत् (प्र.ए.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अजन्तधातोः यत् प्रत्ययो भवति।

**रूपसिद्धिः - चेयम्** - चेतुं योग्यम् इत्यस्मिन् विग्रहे चिञ् इत्यस्माद् धातोः भावे **'अचोयत्'** इत्यनेन यत् प्रत्यये अनुबन्धलोपे, इकारस्य स्थाने गुणे एकारे चे + य इति जाते नपुंसके स्वादिकार्ये चेयम् इति सिद्धम्।

**55. पदपरिचयः** - 'ईत्' (प्र.ए.व.) यति (स.ए.व.)

**सूत्रप्रकारः** - अतिदेशसूत्रम्

**अनुवृत्तिः - आतो लोप इटि** च। इत्यस्मात् आत इत्यस्य अनुवृत्तिः।

**सरलार्थः** - यति प्रत्यये परे आकारान्तधातोः ईत् भवति।

**रूपसिद्धिः - ग्लेयम्** - ग्लातुं योग्यम् इत्यऽस्मिन् विग्रहे ग्लै हर्षक्षये इत्यस्माद् भ्वादिगणस्थाद् धातोः भावे 'अचोयत्' इत्यनेन यत् प्रत्यये अनुबन्धलोपे **आदेच उपदेशेऽशिति** इत्यनेन ऐकारस्य स्थाने आत्वे ग्ला = य इति जाते ईद्यति इत्यनेन अकारस्य इकारे **सार्वधातुकार्धधातुकायोः** इत्यनेन गुणे **'कृदतिङ'** इत्यनेन कृत्संज्ञायां प्रातिपदिकत्वे भावे सोरम् पूर्वरूपे च ग्लेयम् इति सिद्धम्।

**56. पोरदुपधात् | 3 | 1 | 98 ||**

पवर्गान्तादुपधाद्यत्स्यात्। ण्यतोऽपवादः। शप्यम्। लभ्यम्।

**57. एतिस्तुशास्वृदृजुषः क्यप् | 3 | 1 | 109 ||**

एभ्यः क्यप् स्यात्।

**58. ह्रस्वस्य पिति कृति तुक् | 6 | 1 | 71 ||**

इत्यः। स्तुत्यः। शासु अनुशिष्टौ

**59. शास इदङ्हलोः | 6 | 4 | 34 ||**

शास उपधाया इत्स्यादङि हलादौ क्ङिति। शिष्यः। वृत्यः। आदृत्य। जुष्यः।

---

**56. पदपरिचयः** – पोः (प.ए.व.), अदुपधात् (प.ए.व.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सूत्रसमासः** – अत् उपधा यस्य सः अदुपधः तस्माद् आदुपधात् (बहुव्रीहिः)

**विशेषार्थः** – ऋहलोर्ण्यत् इत्यनेन प्राप्तस्य ण्यस्यापवादः अनेन सूत्रेण भवति।

**रूपसिद्धिः** – **शप्यम्** शप आक्रोशे इत्यस्मात् भ्वादिगणस्थाद् धातोः **'पोरदुपधात'** इत्यनेन यत्-प्रत्यये अनुबन्धलोपे शप् + य इति जाते संयोगे शप्य इति जाते कृदन्तत्वात् प्रातिपदिकसंज्ञायां भावे औत्सर्गिकं क्लीबत्वम् इति नियमात् नपुसंकलिङ्गे सौ सोरमि पूर्वरूपे च शप्यम् इति सिद्धम्।

**57. पदपरिचयः** – एतिस्तुशास्वृदृजुषः (प.ए.व.) क्यप् (प्र.ए.व.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – इण्, शास्, स्तु, वृ, दृ, जुष् धातुभ्यः क्यप् स्यात्।

**विशेषार्थः** – इण गतौ-इत्यः।

ष्टुञ् स्तुतौ-स्तुत्यः।

वृञ् वरणे-वृत्यः।

दृङ् आदरे-दृत्यः।

जुषी प्रीतिसेवनयोः-जुष्यः।

**58. पदपरिचयः** – ह्रस्वस्य (ष.ए.व.), पिति (स.ए.व.), कृति (स.ए.व.) तुक् (प्र.ए.व.)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – ह्रस्वस्य तुक् भवति पिति कृति परे।

**विशेषार्थः** – अत्र तुकागमः कित् अस्ति अतः **आद्यन्तौ टकितौ** इति सूत्रनियमात् ह्रस्वानन्तरं तुगागमः कर्तव्यः।

**रूपसिद्धिः** – **इत्यः** एतुं योग्यः इति विग्रहे इण् गतौ इत्यस्माददादिगणस्थाद् धातोः **एतिस्तुशास्वृदृजुषः क्यप्** इत्यनेन क्यप् प्रत्यये अनुबन्धलोपे इ + य इति जाते **ह्रस्वस्य पिति कृति तुक्** इत्यनेन तुकि अनुबन्धलोपे संयोगे इत्य इति जाते कृदन्तत्वात् प्रतिपदिकत्वे सो अनुबन्धलोपे सस्य रूत्वे विसर्गे च इत्यः इति सिद्धम्। तथैव स्तोतुं योग्यः स्तुत्यः।

**59. पदपरिचयः** – शासः (ष.ए.व.), इत् (प्र.ए.व.), अङ्हलोः (स.द्वि.व.)

**सूत्रप्रकारः** – अतिदेशसूत्रम्।

**60. मृजेर्विभाषा | 3 | 1 | 113 ||**

मृजेः क्यब्वा स्यात्। मृज्यः।

**61. ऋहलोर्ण्यत् | 3 | 1 | 124 ||**

ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत्। कार्यम्। हार्यम्। धार्यम्।

**62. चजोः कुघिण्ण्यतोः | 7 | 3 | 52 ||**

चजोः कुत्वं स्याद्घिति ण्यति च परे।

---

**सूत्रसमासः** - अङ् **च हल् च अङ्हलौ तयोः अङ्हलोः ( इतरेतरद्वन्द्वः )**

**सरलार्थः** - शास उपाध्यायाः इत् स्यात् - हलादि-ङ्किति च परे।

**विशेषार्थः** - शासु अनुशिष्टौ इत्यत्र शकारोत्तरवर्ती आकारस्य स्थाने इकारः भवति। अत्र शिष्यः इति हलादेः उदाहरणम्।

**रूपसिद्धिः - शिष्यः** - शासितुं योग्यः इति विग्रहे शासु अनुशिष्टौ इत्यस्माददादिगणस्थाद् धातोः **एतिस्तुशास्** इत्यनेन क्यप्-प्रत्येय अनुबन्धलोपे शास् + य इति स्थिते **शास इदङ्हलोः** इत्यनेन उपाधायाः इत्वे **शासिवसिधसीनाञ्च** इत्यनेन मूर्धन्यषकारे शिष् + य इति जाते कृदन्तत्वात् प्रातिपदिकत्वे सौ अनुबन्धलोपे सस्य रूत्वे विसर्गे च शिष्यः इति सिद्धम्।

**60. पदपरिचयः** - मृजेः (प.ए.व.) विभाषा (प्र.ए.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - मृज्धातोः क्यप् वा स्यात्।

**विशेषार्थः** - मृज्धातुः ऋदुपधः अस्ति अतः ऋदुपधाच्चाक्लृपिचृतेः 3/1/110 इत्यनेन नित्यं क्यप् भवति किन्तु अत्र मृजेर्विभाषा इत्यनेन विकल्पेन क्यप् क्रियते।

**रूपसिद्धिः - मृज्यः** मार्ष्टुं योग्यः इति विग्रहे मृजू शुद्ध इत्यस्याददादिगणस्थाद् धातोः मुजेर्विभाषा इत्यनेन विकल्पे क्यपि अनुबन्धलोपे मृज् + य इति जाते स्वादिकार्ये मृज्यः सिद्धिम्। क्यप् प्रत्ययाभावे ऋहलोर्ण्यत् इत्यनेन ण्यत्प्रत्यये आदिवृद्धौ स्वादिकार्ये च मार्ग्यः इति रूपम्।

**61. पदपरिचयः** - ऋहलोः (ष.द्वि.व.) ण्यत् (प्र.ए.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ऋवर्णान्तधातोः हलन्ताच्च धातोः ण्यत् भवति।

**विशेषार्थः** - ऋहलोः इत्यत्र पञ्चम्यर्थे षष्ठयाः प्रयोगः छान्दसः अस्ति। ऋहलोः इति धातोः विशेषणमस्ति। विशेषणाच्च तदन्तविधौ कृते सति ऋवेर्णान्ताद् हलन्ताच्च धातोः इत्येवं ज्ञेयम्।

**रूपसिद्धिः - कार्यम्** - कर्तुं योग्यम् इति विग्रहे डुकृञ् करणे इत्यस्मात् तनादिगणस्थाद् धातोः **ऋहलोर्ण्यत्** इत्यनेन ण्यत् प्रत्यये अनुबन्धलोपे कृ + प इति जाते अचोऽञ्णिति इत्यनेन ऋकारस्य वृद्धौ आकारे रपरत्वे च कार्य इति जाते कृदन्तत्वात् प्रातिपदिकत्वे सौ अतोऽम् इत्यनेन सोरमि कार्य + अम् इति जाते अमि पूर्वः इत्यनेन पूर्वरूपे कार्यम् इति सिद्धम्।

**62. पदपरिचयः** - चजोः (ष.द्वि.व.) कु (प्र.ए.व.) धिण्ण्यतोः (स.द्वि.व.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सूत्रसमासः** - चश्च, ज् च-चजौ तयोः (इतरेतरद्वन्द्व) घ् इद् यस्य सः घित्, घ्यत् च ण्यत् च घिण्ण्यतौ तयोः घिण्ण्यतोः (इतरेतरद्वन्द्वः)

**63. मृजेर्वृद्धिः | 7 | 2 | 114 ||**

मृजेरिको वृद्धिः स्यात्सार्वधातुकार्धधातुकयोः। मार्ग्यः।

**64. भोज्यं भक्ष्ये | 7 | 3 | 69 ||**

भोग्यमन्यत्।

---

**सरलार्थः** – चस्य जस्य च कुत्वं भवति घिति ण्यति च परे।

**विशेषार्थः** – घित् + ण्यतोः इत्यत्र झलां जशोऽन्ते इत्यनेन तकारस्य दकारे यरोऽनुनासिकेऽनुनासिको वा इत्यनेन दकारस्य नकारे घिन् + ण्यतोः ष्टुना ष्टुः इत्यनेन नकारस्य ष्टुत्वे णकारे घिण्ण्यतोः इति ज्ञेयम्।

**63. पदपरिचयः** – मृजेः (ष.द्वि.व.) वृद्धिः (प्र.ए.व.)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**अनुवृत्तिः** – इको गुणवृद्धि 1/1/3 इत्यनेन इकः इत्यनुवर्तते।

**सरलार्थः** – मृज् धातोः इकः वृद्धिर्भवति सार्वधातुकार्धधातुकयोः परे।

**विशेषार्थः** – धातोः कार्यमुच्यमानं तत्प्रत्यये भवति इति परिभाषया मृज् इत्यस्मात् धातोः विहितेभ्यः प्रत्ययेभ्यः वृद्धिरूपं कार्यं भवति।

**रूपसिद्धिः** – **मार्ग्यः** मार्ष्टुं योग्यः इति विग्रहे ऋहलोर्ण्यत् इत्यनेन ण्यत्प्रत्यये अनुबन्धलोपे मृज् + य इति जाते **चजोः कु घिण्ण्यतोः** इत्यनेन जस्य गकारे मृग् + य इति जाते **मृजेर्विभाषा** इत्यनेन वृद्धौ रपरत्वे संयोगे स्वादिकार्ये च मार्ग्यः इति सिद्धम्।

**64. पदपरिचयः** – भोज्यम् (प्र.ए.व.) भक्ष्ये (स.ए.व.)।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – भक्ष्यार्थे भोज्यशब्दस्य प्रयोगो भवति।

**रूपसिद्धिः** – **भोग्यम्** – भोक्तुं योग्यम् इति विग्रहे **भुज पालनाभ्यवहारयोः** इत्यस्माद् रूधादिगणस्थाद् धातोः **ऋहलोर्ण्यत्** इत्यनेन ण्यत्–प्रत्यये अनुबन्धलोपे भुज् + य इति जाते **आर्धधातुकं शेषः** इत्यनेन आर्धधातुकसंज्ञायां **पुगन्तलघूपधस्य** च इत्यनेन उपधागुणे **भोज्यं भक्ष्ये** इत्यनेन कुत्वाभावे निपातिते **चजोः कुघिण्ण्यतोः** इत्यस्याप्रवृतौ संयोगे स्वादिकार्ये च भोज्यमिति सिद्धम्। भक्ष्यार्थभावे **चजोः कु घिण्ण्यतोः** इत्यनेन कुत्वेन गकारे उपधागुणे भोग्य इति जाते प्रातिपदिकत्वे सौ सोरमि पूर्वरूपे च भोग्यम् इति जायते।

## स्वाध्यायः

**1. विकल्पं चित्वा रित्कस्थानं पूरयत।**

(1) 'धातोः' इति किदृशं सूत्रम् ....... ? (विधिसूत्रम्, परिभाषासूत्रम्, अधिकारसूत्रम्)

(2) कृदन्ते केन सूत्रेण प्रातिपदिकसंज्ञा क्रियते ....... ?

(अर्थवदधातुरप्रत्ययः, वाऽसरूपोऽस्त्रियाम्, कृत्तद्धितसमासाश्च)

(3) कृत्प्रत्ययः ....... भवति ? (भावे कर्तरि, कर्मणि)

(4) भृज्धातो इकः वृद्धिः केन सूत्रेण भवति ....... ? (वृद्धरादैच्, तद्धितेष्वचामादेः, भृजेवृद्धिः)

(5) एतुं योग्यः इति विग्रहे ....... रूपम् ? (एत्यः, इतः, इत्यः)

(6) भक्ष्यार्थे ....... शब्दस्य प्रयोगो भवति ? (भोग्यम्, भोज्यम्, मृज्यः)

(7) शिष्यः इत्यत्र ....... धातुः ? (शासु अनुशिष्टौ, शाख् व्याप्तौ, शाङ् श्लाघायाम्)

**2. लघूत्तरं प्रदेयं।**

(1) कृत्संज्ञाविधायकं सूत्रं किम् ?

(2) पचेलिमाः माषाः इत्यत्र कः प्रत्ययः ?

(3) चेतुं योग्यम् इत्यस्मिन् विग्रहे किं रूपम् ?

(4) 'पोरदुपधात्' इत्यनेन कः प्रत्ययो भवति ?

(5) स्तुत्यः इत्यस्य विग्रहः कः ?

**3. अधोनिर्दिष्टानि रूपाणि साधयत।**

(1) एधितव्यम्।

(2) ग्लेयम्।

(3) शप्यम्।

(4) कार्यम्।

(5) भोग्यम्।

**4. अधोनिर्दिष्टानां सूत्राणां सोदाहरणमर्थं लिखत।**

(1) वाऽसरूपोऽस्त्रियाम्।

(2) तयोरेव कृत्यक्तखलर्थाः।

(3) एतिस्तुशास्वृदृजुषः क्यप्।

(4) ह्रस्वस्य पिति कृति तुक्।

(5) चजोः कुघिण्ण्यतोः।

**5. अधोनिर्दिष्टानां प्रश्नानां सविस्तरमुत्तरं यच्छत।**

(1) कृत्प्रत्ययाः केषु अर्थेषु प्रयुज्यन्ते इति लिखत।

(2) क्वचित्प्रवृत्तिः इति श्लोकं प्रपूर्य बहुलस्य प्रकारान् लिखत।

(3) एतिस्तुशास्वृदृजुषः क्यप् इत्यत्र पठितान् धातून् विलिख्य रूपनिर्देशं कुरुत।

•

# १२ पूर्वकृदन्तप्रकरणम्

**प्रस्तावना**

धातुभ्यः द्विधाः प्रत्ययाः भवन्ति। तत्र प्रथमप्रकारकाः प्रत्ययाः तिङ्प्रत्ययाः, द्वितीयप्रकारकाः प्रत्ययाः कृत्प्रत्ययाश्च। तिप्-तः प्रारभ्य महिङ् पर्यन्तं ये प्रत्ययाः सन्ति, ते प्रत्ययाः धातुभ्यः लकाराणां स्थाने प्रवर्तन्ते। कृत्प्रत्ययाः नाम **कृदतिङ्** अनेन सूत्रेण येषां कृत्संज्ञा क्रियते। तिङ्-प्रत्ययान् विहाय सर्वे प्रत्ययाः कृत्संज्ञकाः भवन्ति। शब्दनिर्माणाय प्रप्रथमं धातुभ्यः कृत्प्रत्ययाः विधीयन्ते, तदा **कृत्तद्धितसमासाश्च** अनेन सूत्रेण तस्य धातोः प्रातिपदिकसंज्ञा सम्पद्यते।

कृदन्तप्रकरणं प्रधानतया द्वयोः भागयोः विभज्येते, प्रथमः पूर्वकृदन्तः द्वितीयः उत्तरकृदन्तश्च। सूत्राष्टाध्याय्याः तृतीयाध्यायस्य प्रथमपादस्थं सूत्रं **धातोः** (3.1.91) अधिकारसूत्रात् प्रारभ्य तृतीयाध्यायस्य द्वितीयपादस्य समाप्तिं यावत् पूर्वकृदन्तप्रकरणं तथा **उणादयो बहुलम्** (3.3.1) सूत्रात् प्रारभ्य सम्पूर्णं कृत्प्रकरणम् उत्तरकृदन्तप्रकरणं मन्यते। अन्येषु प्रक्रियाकौमुदीरूपावतारप्रक्रियासर्वस्वमादिषु ग्रन्थेषु पूर्वकृदन्तोत्तरकृदन्तस्याभिधानं न कृतं किन्तु विषयविभाजनस्य सरलतायै भट्टोजिदीक्षितेन स्वकल्पिता रेखा संस्थापितात्र। इदानीं पूर्वकृदन्तप्रकणस्य प्रारम्भः क्रियते, यत्र धातोः, प्रत्ययः, परश्चेति त्रयाणां सूत्राणाम् अधिकारोऽस्ति।

---

**65. ण्वुलतृचौ | 3 | 1 | 113 ||**

धातोरेतौ स्तः। कर्तरि कृदिति कर्त्रर्थे।

**66. युवोरनाकौ | 7 | 1 | 1 ||**

यु वु एतयोरनाकौ स्तः। कारकः, कर्ता॥

---

**65. पदपरिचयः** - ण्वुल्तृचौ (प्र.द्वि.)

**समासः** - ण्वुल् च तृच् च ण्वुल्तृचौ, इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - धातुभ्यः एतौ ण्वुल्तृच्प्रत्ययौ भवतः, कर्तरि अर्थे।

**विशेषार्थः** - ण्वुल्-तृच् एतौ द्वौ प्रत्ययो धातुभ्यः स्तः, कर्तरि कृत् अनेन सूत्रेण कर्तरि अर्थे ण्वुल्- तृच् एतौ द्वौ प्रत्ययौ क्रियेते।

**66. पदपरिचयः** - युवोः (ष.ए.), अनाकौ (प्र.द्वि.)

**समासः** - युश्च वुश्च युवू, तस्य युवोः, समाहारद्वन्द्वः। अनश्च अकश्च, अनाकौ, इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यु-वु इत्यनयोः क्रमेण अन-अक आदेशौ स्तः।

**विशेषार्थः** - सूत्रेण क्रियमाणौ अन-अक आदेशौ अनेकालत्वात् सम्पूर्णयोः स्थानिनोः भवतः।

**रूपसिद्धिः - कारकः** - कृ धातोः ण्वुल् प्रत्यये णलावितौ कृ वु **युवोरनाकौ** अनेन अकादेशे णत्वात् **अचोञ्णिति** इति वृद्धौ स्वादिकार्ये च कारकः। कर्त्ता - कृ धातोः कर्त्रर्थे **ण्वुलतृचौ** इति तृच् प्रत्यये चकारस्येत्संज्ञालोपे सति कृ तृ इत्यस्य आर्धधातुकसंज्ञत्वात् **सार्वधातुकार्धधातुकयोरिति** गुणे रपरत्वे कर्तृ शब्दः ततः विभक्तिकार्ये कर्त्ता इति साधुः।

**67. नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः | 7 | 1 | 134 ||**

नन्द्यादेर्ल्युः, ग्रह्यादेर्णिनिः, पचादेरच् स्यात्। नन्दयतीति नन्दनः। जनमर्दयतीति जनार्दनः। लवणः। ग्राही। स्थायी। मन्त्री। पचादिराकृतिगणः॥

**68. इगुपधज्ञाप्रीकिरः क | 3 | 1 | 135 ||**

एभ्यः कः स्यात्। कधः। कृशः। ज्ञः। प्रियः। किरः॥

**69. आतश्चोपसर्गे | 3 | 1 | 136 ||**

प्रज्ञः। सुग्लः॥

**70. गेहे कः | 3 | 1 | 144 ||**

गेहे कर्तरि ग्रहेः कः स्यात्। गृहम्॥

**71. कर्मण्यण् | 3 | 2 | 1 ||**

कर्मण्युपपदे धातोरण् प्रत्ययः स्यात्। कुम्भं करोतीति कुम्भकारः॥

---

**67. पदपरिचयः** - नन्दिग्रहपचादिभ्यः (प.ब.), ल्युणिन्यचः (प्र.ब.)।

**समासः** - नन्दि-ग्रहि-पच् आदिर्येषान्ते नन्दिग्रहिपचादयः, तेभ्यः = नन्दिग्रहिपचादिभ्यः द्वन्द्वगर्भबहुव्रीहिसमासः। ल्युश्च णिनिश्च अच्च ल्युणिन्यचः, इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - नन्द्यादिभ्यः ल्युप्रत्ययः, ग्रह्यादिभ्यः णिनि तथा पचादिभ्यः अच्प्रत्ययः विधीयते।

**विशेषार्थः** - अत्र नन्दादिग्रह्यादिपचादयश्च त्रयः गणाः सन्ति, तेषां गणानां यथासंख्यमनुदेशः समानाम् अनेन सूत्रेण यथाक्रमं त्रयः प्रत्ययाः क्रियन्ते, तद्यथा-ल्यु, णिनि, अच्च इति॥

**रूपसिद्धिः - नन्दनः** - नन्दयति इति विग्रहे नन्दि इति ण्यन्ताद् धातोः ल्यु प्रत्यये णेरनिटि इति णिलोपे वर्णसम्मेलने विभक्तिकार्ये नन्दनः साधु। ग्रहोपादाने इति णिनि उपधा वृद्धौ विभक्तिकार्ये ग्राही। स्थाधातोः स्थायी।

**68. पदपरिचयः** - इगुपध-ज्ञा-प्री-किरः (प.ए.), कः (प्र.ए.)।

**समासः** - इक् उपधा यस्य स इगुपधः, बहुव्रीहिसमासः। इगुपधश्च ज्ञा च प्री च कु च, इगुपध-ज्ञा-प्री-किर्, तस्मात् इगुपध-ज्ञा-प्री-किरः, समाहारद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - येषां धातूनाम् उपधायाम् "इक्" प्रत्यहारः स्यात् तेभ्यः तथा ज्ञा-प्री-कृ एतेभ्यः धातुभ्यः कप्रत्ययः भवति।

**विशेषार्थः** - अवधेयमत्र यत्-दिव्, चुर् इत्यादयः केचित् इगुपधधातूनाम् उल्लेखः पचादिगणे कृतः, अतः तत्र कप्रत्ययो न कृत्वा अच्प्रत्यय एव कर्तव्यः।

**रूपसिद्धः** - बुध् क (अ) बुध् अ प्रातिपदिकत्वात् स्वादिविभक्तिकार्ये बुधः अर्थात् पण्डितः।

ज्ञ धातोः क प्रत्यये आतो.... इति आलोपे ज्ञः। प्रीञ् तर्पणे धातोः क प्रत्यये अनुबन्धलोपे इयङादेशे प्रियः विभक्तिकार्ये सिद्ध्यति। कृ धातोः किरः इत्यपि सिद्धम् विक्षेपकः अस्यार्थः।

**69. पदपरिचयः** - आतः (प.ए.), च (अव्ययपदम्), उपसर्गे (स.ए.)।

**अनुवृत्तिः - कः,** इगुपधज्ञाप्रीकिरः कः

**72. आतोऽनुपसर्गे कः |3|2|3||**

आदन्ताद्धातोरनुपसर्गात्कर्मण्युपपदे कः स्यात्। अणोपवादः। आतो लोप इटि च। गोदः, धनदः, कम्बलदः, अनुपसर्गे किम् ? गोसन्दायः। **मूलविभूजादिभ्यः कः। (वार्तिकसूत्रम्)** मूलानि विभुजति मूलविभूजो रथः। आकृतिगणोऽयम्। महीध्रः। कुध्रः॥

**73. चरेष्टः |3|2|16||**

अधिकरणे उपपदे । कुरुचरः॥

**74. भिक्षासेनादायेषु च |3|2|17||**

भिक्षाचरः। सेनाचरः। आदायेति ल्यबन्तम् आदायचरः॥

**75. कृञो हेतुताच्छील्यानुलोम्येषु |3|2|17||**

एषु द्योत्येषु करोतेष्टः स्यात्।

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपसर्गे उपपदे सति आकारान्तधातोः कप्रत्ययः भवति।

**विशेषार्थः** - अत्र कप्रत्यये ककारस्य इत्संज्ञायां तथा आतो लोप इटि च सूत्रेण आकरास्य लोपो भवति।

**रूपसिद्धिः** - ग्लैहर्षक्षये धातोः अनेन क-प्रत्यये अनुबन्धलोपे आदेच उपदेशेऽशिति इति आत्वे आतो लोप इति आकारलोपे विभक्तिकार्ये सुग्लः। एवमेव प्र उपसर्गपूर्वक ज्ञा धातोः क प्रत्यये कित्वात् आकारलोपे कृदन्तत्वात् विभक्तिकार्ये च प्रज्ञः।

**70. पदपरिचयः** - गेहे (स.ए.), कः (प्र.ए.)।

**अनुवृत्तिः** - **ग्रहः,** विभाषा ग्रहः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कर्तरि ग्रह धातोः कप्रत्ययो भवति।

**विशेषार्थः** - सूत्रेऽस्मिन् उदाहरणम् अस्ति गृहम्, अस्य विग्रहो भवति गृह्णातीति गृहम् अत्र स्वयमेव गृहं यस्य कस्यापि वस्तुनः स्वीकारं करोति तस्माद् अत्र ग्रहणकर्तृरूपेण स्वयमेव गृहम्, अतः ग्रहधातोः कर्तरि अर्थे प्रयोगत्वात् अत्र कप्रत्ययः भवति।

**रूपसिद्धिः** - ग्रह उपादाने धातोः क प्रत्ययः अनुबन्धलोपे कित्वात् ग्रहिज्या-इत्यादिना सम्प्रसारणं पूर्वरूपं कृदन्तत्वात् विभक्त्यादिकार्ये गृहम्।

**71. पदपरिचयः** - कर्मणि (स.ए.), अण् (प्र.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कर्मकारकम् उपपदे सति धातोः परे अण्प्रत्ययः भवतिः।

**विशेषार्थः** - कर्मकारकरूपेण अत्र द्वितीयाविभक्तेः यस्य कस्यापि सुबन्तपदस्य उपस्थितिः आवश्यकी, तदा तस्य कारकस्य समीपस्थधातोः अनेनसूत्रेण अण्प्रत्ययः क्रियते।

**रूपसिद्धिः** - कुम्भं करोतीति विग्रहे कर्मण्यण् इति अण् प्रत्यये कुम्भ + अम् + कृ + अण् अत्र विग्रहदशायां कर्तृकर्मणोः कृति इति सूत्रबलात् अलौकिकविग्रहे षष्ठ्यन्तस्य समासः ततः विभक्तिलोपे णितत्वात् अचोञ्णिति इति वृद्धिकृते कुम्भकार विभक्त्यादकार्ये कुम्भकारः इति।

**72. पदपरिचयः** - आतः (प.ए.), अनुपसर्गे (स.ए.), कः (प्र.ए.)।

**समासः** - अविद्यमान उपसर्गो यस्यासौ - अनुपसर्गस्तस्मिन् अनुपसर्गे, बहुव्रीहिसमासः।

**76. अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य | 8 | 3 | 46 ||**

आदुत्तरस्यानवयवस्य विसर्गस्य समासे नित्यं सादेशः करोत्यादिषु परेषु। यशस्करी विद्या। श्राद्धकरः। वचनकरः।

**77. एजेः खश् | 3 | 2 | 28 ||**

ण्यन्तादेजेः खश् स्यात्॥

**78. अरुर्द्विषदजन्तस्य मुम् | 6 | 3 | 67 ||**

अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात्खिदन्ते परे न त्वव्ययस्यः शित्त्वाच्छबादिः। जनमेजयतीति जनमेजयः॥

**79. प्रियवशे वदः खच् | 3 | 2 | 39 ||**

प्रियंवदः। वशंवदः॥

---

**अनुवृत्तिः** - **कर्मणि,** कर्मण्यण् इत्यतः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कर्मणि उपपदे सति उपसर्गस्य रहितस्य धातोः कप्रत्ययो भवति।

**विशेषार्थः** - सूत्रमिदम् अण्प्रत्ययस्यापवादमस्ति, कर्मण्यण् सूत्रेण अण्प्रत्ययस्य विधानम् अत्र भवत्येव, किन्तु सूत्रेऽस्मिन् आकारान्त इति विशेषणेन तथा उपसर्गरहितस्य धातोः इति विशेषणेन सर्वत्रास्य सूत्रस्याप्राप्तिः तस्मात् विशेषणबीजेन उत्सर्गसूत्रस्य कर्मण्यण् अस्य सूत्रस्य बाधं करोति सूत्रमिदम्।

**पदपरिचयः** - मूलविभूजादिभ्यः (प.ब.), अनुपसर्गे (प्र.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - मूलाविभूजादि शब्दानां सिद्धिर्भवेत्, तदर्थं कप्रत्ययस्य विधानं कर्तव्यम्।

**विशेषार्थः** - मूलविभूजादि आकृतिगणरूपेण स्वीकर्तव्यः।

**रूपसिद्धिः** - **गोदः** - गां ददाति इति विग्रहे गो अम् दा अनेन क प्रत्यये अनुबन्धलोपे आते लोपः इति आकारलोपे वर्मसम्मेलने गोदः। अनुपसर्गग्रहणाभावे गो सन्दाय अत्र क प्रत्ययः। गो अम् उपपदे सम् उपसर्गक दा धातोः अण् युगागमे च गोसन्दायः।

यथा मूलानि विभूजति इति विग्रहे मूल शस् वि उपसर्गकपूर्वकः भुज् धातोः क प्रत्ययः अनुबन्धलोपः वर्मसम्मेलने विभक्तिकार्ये मूलविभुजः रथः। एवं महिं धरतीति विग्रहे क प्रत्यये महीध्रः।

**73. पदपरिचयः** - चरेः (प.ए.), टः (प्र.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अधिकरणे उपपदे सति चर्-धातोः ट प्रत्ययो भवति।

**विशेषार्थः** - टप्रत्ययः कृत्संज्ञत्वात् प्रत्ययोऽयं कर्त्रर्थे भवति।

**रूपसिद्धिः** - **कुरूचरः** - कुरूषु चरति इति विग्रहे करू ङि चर् ट प्रत्ययः अनेन धातोः ट प्रत्ययः अतः भिक्षाचरः सेनाचरः आदायचरः इति प्रयागाः पूर्ववत् सिद्ध्यन्ति।

**74. पदपरिचयः** - भिक्षासेनादायेषु (स.ए.), च (अव्ययपदम्)।

**समासः** - भिक्षा च सेना च आदायश्च तेषामितरेतरद्वन्द्वो भिक्षासेनादायाः, तेषु भिक्षासेनादायेषु।

**अनुवृत्तिः** - चरेः - टः (चरेष्टः), सुप्सु (सुपि स्थः)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**80. अन्येभ्योऽपि दृश्यन्ते |3|2|75||**

मनिन् क्वनिप् वनिप् विच् एते प्रत्यया धातोः स्युः।

**81. नेड्वशि कृति |7|2|8||**

वशादेः कृत इण् न स्यात्। शृ हिंसायाम्॥ सुशर्मा प्रातरित्वा॥

**82. विड्वनोरनुनासिकस्याऽऽत् |6|4|41||**

अनुनासिकस्याऽऽत्स्यात्। विजायत इति विजावा॥ ओणृ अपनयने। अवावा। विच्॥ रुष् रिष् हिंसायाम्॥ रोट्। रेट्। सुगण्॥

---

**सरलार्थः** - भिक्षा, सेना तथा आदाय इत्यादयानि सुबन्तानि उपपदानि स्युः, तदा अपि चर्-धातोः ट प्रत्ययो भवति।

**रूपसिद्धिः** - भिक्षासेनाआदायत्रिषु शब्देषु उपपदेषु चर् धातोः टप्रत्ययः अतः भिक्षाचरः सेनाचरः अदायचरः इति प्रयोगाः पूर्ववत् सिद्ध्यन्ति।

**75. पदपरिचयः** - कृञः (प.ए.), होतु-ताच्छील्यानुलोम्येषु (स.ब.)।

**समासः** - हेतुश्च ताच्छील्यश्च आनुलोम्यं च हेतु-ताच्छील्यानुलोम्यानि, तेषु = हेतुताच्छील्यानुलोम्येषु, इतरेतरद्वन्द्वः।

**अनुवृत्तिः - टः ( चरेष्टः )**

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हेतुः (कारणम्), ताच्छील्य (तत्स्वभावता), आनुलोम्य (आज्ञापालनत्वार्थः) एतेषाम् अर्थानां यदा प्रतीतिः भवति, तदा कर्मणः उपपदे सति डुकृञ् धातोः टप्रत्ययो भवति।

**विशेषार्थः** - कर्तरि अर्थे एव अत्र टप्रत्ययस्य विधानम् अस्ति, किन्तु अत्र हेतुः (कारणम्), ताच्छील्य (तत्स्वभावता), आनुलोम्य (आज्ञापालनत्वार्थः) एतेषाम्, अर्थानाम् उपस्थितिः स्युः।

**76. पदपरिचयः** - अतः (प.ए.), कृ-कमि-कंस-कुम्भ-पात्र-कुशा-कर्णीषु (स.ब.), अनव्ययस्य (ष.ए.),

**समासः** - कृ च कमिश्च कंसश्च कुम्भश्च पात्रञ्च कुशा च कर्णी च, तेषु इतरेतरद्वन्द्व। न अव्ययस्य इति अनव्ययस्य, इति नञ्तत्पुरुषः।

**अनुवृत्तिः** - विसर्जनीयस्य (विसर्जनीयस्य सः), सः (सोऽपदादौ), नित्यं (नित्यं समासेऽनुत्तरपदस्थस्य)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ह्रस्वाकारात् परे अनव्ययस्य विसर्गस्य समासे नित्यं सकारादेशः भवति, तस्मात् विसर्गात् परे कृ, कम्, कंस, कुम्भ, पात्र, कुशा तथा कर्णी च एतेषु कश्चित् परे स्यात्।

**विशेषार्थः** - अनेन सूत्रेण चत्वारः नियमाः मुख्यरूपेण स्मरणीयाः।

**तत्र प्रथमः** - विसर्गोऽयम् अनव्ययः नाम अव्ययं विहाय अन्यस्य स्यात्।

**द्वितीयः** - अकारात् परे स्थितस्य विसर्गस्य स्थाने एव सकारः स्यात्।

**तृतीयः** - विसर्गात् परे कृ, कम्, कंस, कुम्भ, पात्र, कुशा तथा कर्णी च एतेषाम् उपस्थितिः आवश्यकी एव।

**चतुर्थः** - अस्य सूत्रस्य प्रवृत्तिः नित्यं समासे एव भवति।

**रूपसिद्धिः - यशस्करी विद्या** - यशः कर्तुं शीलं यस्याः सा इति विग्रहे यशः उपपदे कृ धातोः ताच्छील्यर्थे मत्वा ट प्रत्ययः उपपदसमासे विभक्तिलोपे कृदन्तत्वात् प्रातिपदिकत्वं यशस्करस्य पदान्तत्वात् रूत्वे विसर्गे अतः कृकमि - इति सूत्रेण सत्वे विभक्त्यादिकार्ये यशस्करी विद्या साधु। विद्यायाः स्वभावः यशःप्रदायिका। एवं आनुलोम्ये अर्थे श्राद्धकरः वचनकरः श्राद्धं करोति इति विग्रहे पुत्रस्य धर्मः यः स पितुराराधनं कुर्यात् आज्ञाकारी भूयात् तदेव आराध्यचित्तानुवर्तनम्। एवं वचनं करोति इति विग्रहे वचनकरः शिष्यः उभयत्र ट प्रत्ययेन रूपद्वयं सिद्ध्यति।

**83. क्विप् च |3|2|76||**

अयमपि दृश्यते। उखास्रत्। पर्णध्वत्। वाहभ्रट्।

**84. सुप्यजातौ णिनिस्ताच्छील्ये |3|2|78||**

अजात्यर्थे सुपि धातोर्णिनिस्ताच्छील्ये द्योत्ये। उष्णभोजी॥

**85. मनः |3|2|82||**

सुपि मन्यतेर्णिनिः स्यात्। दर्शनीयमानि।

**86. आत्ममाने खश्च |3|2|93||**

स्वकर्मके मनने वर्त्तमानान्मन्यतेः सुपि खश् स्यात् चाण्णिनिः। पण्डितमात्मानं मन्यते पण्डितम्मन्यः। पण्डितमानी।

---

**77. पदपरिचयः** – एजेः (प.ए.), खश् (प्र.ए.)।

**अनुवृत्तिः** – कर्मणि (कर्मण्यण्)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – कर्मणि उपपदे सति ण्यन्तात् एजधातोः खश् प्रत्ययो भवति।

**विशेषार्थः** – ण्यन्तेन पदेन णिच्प्रत्ययस्य ग्रहणं कर्तव्यम्, खशप्रत्ययः कृत्संज्ञकोऽस्ति तस्मात् प्रत्ययोऽयम् कर्तरि अर्थे प्रयुज्यते।

**78. पदपरिचयः** – अरुर्द्विषदजन्तस्य (ष.ए.), मुम् (प्र.ए.)।

**समासः** – अच् अन्तो यस्य सोऽजन्तः, बहुव्रीहिसमासः। अरुश्च द्विषच्च अजन्तश्च अरुर्द्विषदजन्तं यस्य अरुर्द्विषदजन्तस्य, समाहारद्वन्द्वः। ख् इद् यस्य स खित्, तस्मिन् = खिति, बहुव्रीहिसमासः।

**अनुवृत्तिः** – **खित** – अनव्ययस्य (खित्यनव्ययस्य)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – अरुष्, द्विषत् तथा अजन्तशब्दानां मुमागमः भवति, खिदन्तपदं परे स्यात्, परन्तु अव्ययस्य मुमागमः न भवति।

**विशेषार्थः** – अरुष् अर्थात् मर्मस्थानम्,द्विषत् अर्थात् शत्रु इत्यर्थः ज्ञातव्यः।

**रूपसिद्धिः – जनमेजयः** – जनं एजयति इति विग्रहे एजृ कम्पने धातोः जनमुपपदे ण्यन्ताद् एजेः खश् प्रत्ययः अनुबन्धलोपे शित्वात् सार्वधातुकसंज्ञायां पुनः शपि गुणे अयादेशः पररूपं सुपो लुकि अरूर्द्विषदजन्तस्य मुम् इति मुमागमः विभक्त्यादि कार्ये जनमेजयः।

**79. पदपरिचयः** – प्रियवशे (स.ए.), वदः (प.ए.), खच् (प्र.ए.)।

**समासः** – प्रियश्च वशश्च प्रियवशम्, तस्मिन् = प्रियवशे, समाहारद्वन्द्वः।

**अनुवृत्तिः** – **कर्मणि** (कर्मण्यण्)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – प्रियवशौ कर्मणोः उपपदयोः वदधातोः खच्-प्रत्ययो भवति।

**विशेषार्थः** – खच्-प्रत्ययः कृत्संज्ञकः तस्मात् कर्तरि अर्थे प्रयोक्तव्यः।

**प्रियंवदः** – प्रियं वदति इति विग्रहे प्रिय अम् वद् खच् उपपदसमासे विभक्तिलोपे शपागमे पूर्वरूपे मुमागमे अनुस्वारे च कृते प्रियंवदः। एवमेव वशं वदति इति विग्रहे वशंवदः।

**80. पदपरिचयः** – अन्येभ्यः (प.ब.), अपि (अव्ययमपदम्), दृश्यन्ते (क्रियापदम्)

**87. खित्यनव्ययस्य |6|3|65||**

खिदन्ते परे पूर्वपदस्य ह्रस्वः। ततो मुम्। कालिम्मन्या॥

**88. करणे यजः।**

करणे उपपदे भूतार्थे यजेर्णिनिः कर्तरि। सोमेनेष्टवान् सोमयाजी। अग्निष्टोमयाजी।

**89. दृशेः क्वनिप्। |3|2|94||**

कर्मणि भूते। पारं दृष्टवान् पारदृश्वा॥

**90. राजनि युधि कृञः |3|2|94||**

क्वनिप्स्यात्। युधिरन्तर्भावितण्यर्थः। राजानं योधितवान् राजयुध्वा। राजकृत्वा॥

---

**समासः** - प्रियश्च वशश्च प्रियवशम्, तस्मिन् = प्रियवशे, समाहारद्वन्द्वः।

**अनुवृत्तिः** - मनिन् क्वनिप् वनिप् (आतो मनिन्क्वनिब्वनिपश्च), विच् (विजुपे छन्दसि)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - धातोः मनिन्, क्वनिप्, वनिप् तथा विच् प्रत्ययाः भवन्ति।

**विशेषार्थः** - मनिन् इत्यस्मिन् मन्, क्वनिप् इत्यत्र वन्, वनिप् इत्यत्र वन्, विच् इत्यत्र व् अवशिष्यते तस्य वेरपृक्तस्य सूत्रेण लोपं कृत्वा प्रातिपदिकत्वात् स्वादीनां प्रत्ययानाम् उत्पत्तिः।

**81. पदपरिचयः** - न (अव्ययपदम्), इट् (प्र.ए.), वशि (स.ए.), कृति (स.ए.)

**सूत्रप्रकारः** - निषेधविधिसूत्रम्।

**सरलार्थः** - यस्य कृत्प्रत्ययस्य अग्रे वश्प्रत्याहारः भवति, तस्य प्रत्ययस्य इट् आगमो न स्यात्।

**विशेषार्थः** - वशादिप्रत्ययाः यथा - वरच्, र, नङ् मनिन् इत्यादिप्रत्ययाः सन्ति।

**रूपसिद्धिः - सुशर्मा** - सुष्ठु शृणाति इति विग्रहे सु शृ मनिन् उपपदसमासः मनिनः इनः इत्संज्ञालोपे च आर्धधातुकत्वात् गुणः वलादिलक्षणः इट् प्राप्तः नेड्वशि कृति अनेन वशादित्वात् इट् निषेधे विभक्तिकार्ये उपधादीर्घे न लोपे च सुशर्मा इति सिद्धम्।

**प्रातरित्वा** - प्रातः उपपदे इण् धातोः क्वनिप् प्रत्यये वन् इति शेषे कित्वात् तुगागमे वशादि कृत्वात् नेड्वशि कृति इति इट्-निषेधे विभक्तिकार्ये प्रातरित्वा इति साधु।

**82. पदपरिचयः** - विड्वनोः (स.द्वि.), अनुनासिकस्य (ष.ए.), आत् (प्र.ए.)।

**समासः** - विट् च वन् च वड्वनौ, तयोः विड्वनोः, इतरेतरद्वन्द्व :।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - विट् तथा वन् प्रत्ययौ परे स्यातां तदा अनुनासिकवर्णानां स्थाने आकारादेशः स्यात्।

**विशेषार्थः** - विशेषरूपेण विट् परे स्यात् तादृशानि उदाहरणानि वेदे प्राप्यन्ते।

यथा-गोजाः, अब्जाः, गोषाः, विलखाः, कूपखा इत्यादीनि।

**रूपसिद्धिः - विजावा** विजायत इति विजवा - वि जन् इत्यत्र अन्येभ्योऽपि. सूत्रेण विप्, इट्प्राप्तस्य नेड्वशि. सूत्रेण निषेधे। विजन् वन् इति स्थिते, विड्वनोरनु... सूत्रेण नकारस्य आकारे तथा सवर्णे दीर्घे कृते विजावन् इति स्थिते, उपधादीर्घे कृते नकारस्य लोपे कृते विजावा।

तथैव ओणृ अपनयने इत्यत्र ओ आ वन् इत्यत्र एचोऽयवायावः अनेन अवादेशे अव् आ वन् उपधादीर्घे नकारस्य लोपे च कृते आवावा।

**91. सहे च | 3 | 2 | 96 ||**

कर्मणीति निवृत्तम्। सह योधितवान् सहयुध्वा। सहकृत्वा॥

**92. सप्तम्यां जनेर्डः | 3 | 2 | 97 ||**

**93. तत्पुरुषे कृति बहुलम् | 6 | 3 | 14 ||**

ङेरलुक्। सरसिजम्, सरोजम्॥

---

**रेट्-रोट्** - रिष्, रुष् इत्यत्र विच् प्रत्ययः, तस्य सर्वपहारलोपे, विच् तत्र मत्वा पुगन्तलघु... सूत्रेण गुणे एकारे तथा ओकारे रेष् तथा रोष् इत्यत्र सुप्रत्यये कृते तस्य प्रत्ययस्य लोपे ततः झलां जशोऽन्ते अनेन सूत्रेण जश्त्वे कृते रेट्-रोट् प्रयोगौ साधू।

सुगण् - सुगणि इत्यत्र विच् तथा सर्वपहारलोपे णेरनिटि सूत्रेण इकारे लोपे सुगण् अत्र प्रातिपदिकसंज्ञायां सुप्रत्ययः तथा तस्य लोपे कृते सुगण् सिद्ध्यति।

**83. पदपरिचयः** - क्विप् (प्र.ए.), च (अव्ययमपदम्), वचनपरिमाणं कृत्वा अन्येभ्योऽपि दृश्यन्ते अनेन दृश्यते इति पदं समायाति।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - धातोः परे क्विप् प्रत्ययोऽपि भवति।

**विशेषार्थः** - क्विप् प्रत्यये सर्वेषां वर्णानां लोपः क्रियते। तत्र इत्संज्ञकेषु पकारककारयोः फलरूपेण यथाक्रमं तुकागमः तथा गुणवृद्धिनिषेधकार्यञ्च स्यात्।

**रूपसिद्धिः - उखास्रत्** - उखायाः स्रंसते, स्रसु अवस्रंसने धातोः क्विप् च सूत्रेण क्विप्प्रत्यये कृते सर्वप्रहारलोपे, उखास्रंस् इत्यत्र क्विप् प्रत्ययं मत्वा अनिदितां हल उपधाया... सूत्रेण अनुस्वारस्य लोपे उखास्रस्। अत्र प्रातिपदिकसंज्ञायाम्, सकारस्य लोपे च कृते वसुस्रंसुध्वं... सूत्रेण अन्त्यसकारस्य दकारे कृते उखास्रद् तथा वाऽवसाने सूत्रेण चर्त्वे कृते उखास्रत् सिद्ध्यति। तथैव पर्णध्वत्, वाहभ्रट्।

**84. पदपरिचयः** - सुपि (स.ए.), अजातौ (स.ए.), णिनिः (प्र.ए.), ताच्छील्ये (स.ए.)

**समासः** - तच्छीलस्य भावः = ताच्छील्यम्, तस्मिन् = ताच्छील्ये, न जातिः अजातिः, तस्याम् = अजातौ, नञ्तत्पुरुषः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कर्तुः शीलं (चरित्रम्) अर्थः प्रतीयमाने सति, यदा जात्यर्थेन भिन्नः सुबन्त उपपदं स्यात्, तदा धातोः परे णिनि प्रत्ययः भवति।

**रूपसद्धिः - उष्णभोजी** - उष्णं भुङ्क्ते तच्छीलम् अस्य इति विग्रहे उष्ण अम् भुज् धातोः णिनि प्रत्यये लघूपधगगुणे कर्मणि षष्ठ्यामुपपदसमासे कृदन्तत्वात् सौ दीर्घे सुलोपे न लोपे च उष्णभोजी एवं शीतं भुङ्क्ते तच्छीलमस्य इति विग्रहे शीतभोजी पूर्ववत्।

**85. पदपरिचयः** - मनः (प.ए.)।

**अनुवृत्तिः** - सुपि - णिनिः (सुप्यजातौ णिनिस्ताच्छिल्ये)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सुबन्तपदे उपपदे सति मन् धातोः णिनिप्रत्ययः स्यात्।

**विशेषार्थः** - सूत्रे अत्र दर्शनीयम् इति भावः आत्मनः कृते नास्ति, अपि तु परस्मै अस्ति।

**रूपसिद्धः - दर्शनीयमानी** - दर्शनीयं मन्यते इति विग्रहे दर्शनीय अम् मन् णिनि उपपदसमासः विभक्तिलोपः कृदन्तत्वात् स्वादिकार्ये दर्शनीयमानी।

**94. उपसर्गे च संज्ञायाम् | 3 | 2 | 99 ||**

प्रजा स्यात्संततौ जने।

**95. क्तक्तवतू निष्ठा | 1 | 1 | 25 ||**

एतौ निष्ठासंज्ञौ स्तः।

**96. निष्ठा | 3 | 2 | 102 ||**

भूतार्थवृत्तेर्धातोर्निष्ठा स्यात्। तत्र तयोरेवेति भावकर्मणोः क्तः। कर्तरि कृदिति कर्तरि क्तवतुः। उकावितौ। स्नातं मया। स्तुतस्त्वया विष्णुः। विश्वं कृतवान् विष्णुः॥

---

**86. पदपरिचयः** – आत्ममाने (स.ए.), खश् (प्र.ए.), च (अव्ययपदम्)

**समासः** – आत्मनः मानः आत्ममानः, तस्मिन् इति आत्ममाने, सप्तमीतत्पुरुषः।

**अनुवृत्तिः** – सुप्-णिनि (सुप्यजातौ णिनिस्ताच्छिल्ये), मनः (मनः)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – यदि मन्धातोः कर्ता कर्म अपि स्यात्, तदा सुबन्ते उपपदे सति मन्धातोः परे खश्प्रत्ययः तथा णिनिप्रत्ययोऽपि प्रवर्तते।

**विशेषार्थः** –

स्वमाने परमाने चोभयत्रापि स्मृतो णिनिः।

परं खशो विधानं तु स्वभाव एव केवलम्॥

**उदाहरणम् – पण्डितमन्यः** – पण्डितम् आत्मानं मन्यते इति विग्रहे पण्डित अम् मन् धातोः खश् खित्वात् मुमागमे शित्वात् श्यनि अनुबन्धलोपे अनुस्वारे परसवर्णे विभक्तिकार्ये पण्डितमन्यः। णिनि पक्षे पण्डितमानी इति।

**87. पदपरिचयः** – खिति (स.ए.), अनव्ययस्य (ष.ए.)

**समासः** – ख् इद् यस्यासौ खित् तस्मिन् खिति, बहुव्रीहिसमासः। न अव्ययस्य इति अनव्ययस्य नञ्तत्पुरुषः।

**अनुवृत्तिः** – ह्रस्वः (इको ह्रस्वोऽङ्यो गालवस्य)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – खिदन्तपदे परे सति पूर्वपदस्य स्थाने ह्रस्वादेशः भवति, किन्तु आदेशोऽयम् अव्ययस्य स्थाने न स्यात्।

**विशेषार्थः** – ह्रस्वादेशो अत्र अलोऽन्त्यस्य सूत्रेण पूर्वपदस्य अन्त्यस्य अचः स्यात्।

**रूपसिद्धः – कालिम्मन्या** – कालिम् आत्मानं मन्यते इत्यर्थे आत्ममाने खश्च इति खशि खित्यनव्ययस्य इति मुमागमे श्यनि च काली इत्यस्य ह्रस्वे कालिम्मन्या।

**88. पदपरिचयः** – यजे (स.ए.), यजः (प्र.ए.)

**अनुवृत्तिः – णिनिः** (सुप्यजातौ णिनिस्ताच्छिल्ये)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – करणे उपपदे भूतकालस्य क्रियायाः वाचकः यज्-धातोः कर्तरि अर्थे णिनि प्रत्ययः स्यात्।

**रूपसिद्धिः – सोमयाजी** – सोमेन इष्टवान् इति विग्रहे सोम टा यज् अनेन णिनि उपपदसमासे विभक्तिलोपे विभक्तिकार्ये सोमयाजी एवं अग्निष्टोमेन इष्टवान् इति विग्रहे पूर्ववत् अग्निष्टोमयाजी।

**89. पदपरिचयः** – दृशेः (प.ए.), क्वनिप् (प्र.ए.)

**97. रदाभ्यां निष्ठातो नः पूर्वस्य च दः | 8 | 2 | 42 ||**

रदाभ्यां परस्य निष्ठातस्य नः स्यात्, निष्ठापेक्षया पूर्वस्य धातोर्दस्य च। श्रॄ हिंसायाम्॥ ॠत इत्। रपरः। णत्वम्। शीर्णः। भिन्नः। छिन्नः।

**98. संयोगादेरातो धातोर्यण्वतः। | 8 | 2 | 43 ||**

निष्ठातस्य नः स्यात्। द्राणः। ग्लानः॥

**99. ल्वादिभ्यः | 8 | 2 | 44 ||**

एकविंशतेर्लूञादिभ्यः प्राग्वत्। लूनः। ज्या धातुः॥ ग्रहिज्येति संप्रसारणम्॥

---

**अनुवृत्तिः - कर्मणि** (7.1)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कर्मणः उपपदे सति भूतकालवाचिनी क्रियायां वर्तमाने दृश्-धातोः क्वनिप् प्रत्ययः प्रयुज्यते।

**विशेषार्थः** - क्विनिप् इत्यत्र केवलं वन् अवशिष्यते, कित्पितयोः फलम् गुणवृद्धिनिषेधः तथा तुकागमो अस्ति।

**रूपसिद्धः - पारदृश्वा** - पारं दृष्टवान् इति विग्रहे पार अम् दृश् क्वनिप् अनुबन्धलोपे उपपदसमासे विभक्तिलोपे कृदन्तत्वात् विभक्तिकार्ये पारदृश्वा।

**90. पदपरिचयः** - राजनि (स.ए.), युधि कृञः (प.ए.)

**समासः** - युधिश्च कृञ् च युधकृञ्. तस्मात् = युधिकृञः, समाहारद्वन्द्वसमासः।

**अनुवृत्तिः** - क्वनिप् (दृशेः क्वनिप्), कर्मणि (कर्मणि हनः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - राजन् इति पदे उपपदे सति युध् तथा कृञ्धातोः भूतकालार्थे क्वनिप् प्रत्ययः भवति।

**विशेषार्थः** - क्विनिप् इत्यत्र केवलं वन् अवशिष्यते, कित्पितयोः फलं गुणवृद्धिनिषेधः तथा तुकागमोऽस्ति।

**रूपसिद्धिः - राजयुध्वा** - राजानं योधितवान् राजन् अम् युधि क्वनिप् उपपदसमासः विभक्तिलोपः क्विपि, णि-लोपे, न-लोपे, विभक्तिकार्ये, वनो उपधादीर्घे, नकारस्य लोपे राजयुध्वा। एवं राजानं कृतवान् इति राजकृत्वा राजन् अम् उपपदे वनिप् प्रत्ययः तुकि कृते विभक्तिलोपे नलोपे सति राजकृत्वा।

**91. पदपरिचयः** - सहे (स.ए.), च (अव्ययपदम्)

**अनुवृत्तिः** - क्वनिप् (राजनि युधि कृञः), क्वनिप् (1.1)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सह इत्यस्य यदा उपपदत्वं भवति तदा भूतकालस्य क्रियायां वर्तमाने युध् तथा कृञ्धातोः क्वनिप् प्रत्ययो भवति।

**रूपसिद्धिः - सहयुध्वा** - सह योधितवान् इति विग्रहे क्वनिपि अनुबन्धलोपे सह युध् वन् कृदन्तत्वात् विभक्तिकार्ये न लोपे सहयुध्वा एवं सह कृतवान् इति सहकृत्वा। अत्र तुगागमः

**92. पदपरिचयः** - सप्तम्यां (स.ए.), जनेः (प.ए.), डः (प्र.ए.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सप्तम्यन्ते उपपदे सति भूतकालवाच्यार्थे वर्तमाने जन्-धातोः डप्रत्ययो भवति।

**विशेषार्थः** - सूत्रे डकारस्य इत्संज्ञत्वात् भसंज्ञा न भवेत् तथापि डित्वसामर्थ्यादभस्यापिटेर्लोपः नियम् अनुसृत्य टिलोपः क्रियते।

**100. हलः | 6 | 4 | 2 ||**

अङ्गावयवाद्धलः परं यत्संप्रसारणं तदन्तस्य दीर्घः। जीनः॥

**101. ओदितश्च | 8 | 2 | 45 ||**

भुजो भुग्नः। टुओश्वि, उच्छूनः।

**102. शुषः कः | 8 | 2 | 51 ||**

निष्ठातस्य कः॥ शुष्कः॥

**103. पचो वः | 8 | 2 | 52 ||**

पक्वः। क्षै क्षये।

---

**93. पदपरिचयः** - तत्पुरुषे (स.ए.), कृति (स.ए.), बहुलम् (प्र.ए.)

**समासः** - न लुक् इति अलुक्।

**अनुवृत्तिः** - सप्तम्याः (हलन्तात् सप्तम्याः संज्ञायाम्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तत्पुरुषसमासे कृदन्तोतरपदस्य परे सति सप्तम्याः बहुलेन अलुक्कार्यं स्यात्।

**विशेषार्थः** - बहुलप्रयोगात् अत्र अलुक्कार्यं तथा लुक्कार्यं भविष्यति।

**रूपसिद्धिः - सरसिजम्** - सरसि जातम् इति सरसिजम्, सरम् ङि शब्दात् जनी प्रादूर्भावे इत्यस्मात्, सप्तम्यां जनेर्डः अनेन सूत्रेण डप्रत्यये कृते अनुबन्धलोपः, सरस् जन् अ इत्यत्र अन् इत्यस्य टिसंज्ञा, तस्य लोपे कृते सरसि ङि ज् अ, इत्यत्र सुपो धातुप्रातिपदिकयोः सूत्रेण विभक्तलोपे प्राप्ते तत्पुरुषे कृति बहुलम् सूत्रेण विभक्तिलोपे निषेधे कृते सरसिज। प्रातिपदिकत्वात् सु तस्य अमादेशे सरसिजम् इति सिद्ध्यति। सरोजम् इत्यत्र विभक्तलोपे कृते तस्य निषेधः न क्रियते तदा सरस् ज इति भवति, अत्र हशि च सूत्रेण सकारस्य उकारे कृते सर उ ज इति भवति। अत्र गुणे कृते सरोज अनन्तरं विभक्तिकार्ये कृते सरोजम् इति सिद्ध्यति।

**94. पदपरिचयः** - उपसर्गे (स.ए.), च (अव्ययपदम्), संज्ञायाम् (स.ए.)।

**अनुवृत्तिः** - जनेः - डः (सप्तम्यां जनेर्डः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपसर्गे उपपदे सति भूतकाले जन्-धातोः परे ड-प्रत्ययः स्यात्, संज्ञायां विषये।

**विशेषार्थः** - प्रकृतिप्रत्ययात् यस्याः कस्याचित्संज्ञायाः अर्थः अभिप्रेतः भवितव्यः, तस्मात् संज्ञायां विषये इति उक्तम्।

**95. पदपरिचयः** - क्तक्तवतू (प्र.द्वि.), निष्ठा (प्र.ए.)।

**समासः** - क्तश्च क्तवतुश्च क्त-क्तवतू, इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - क्त तथा क्तवतु एतौ द्वौ प्रत्ययौ निष्ठासंज्ञकौ स्तः।

**96. पदपरिचयः** - निष्ठा (प्र.ए.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - भूतार्थे धातोः परे निष्ठासंज्ञकौ प्रत्ययौ स्तः।

**विशेषार्थः** - क्तप्रत्ययः भावकर्मणोः स्यात् तथा क्तवतुप्रत्ययः कर्तरि अर्थे भवति।

**रूपसिद्धः - स्नातं मया** - ष्णा शौचे इत्यत्र, धात्वादेः षः सः सूत्रेण सत्वे तथा णकारस्य नकारे स्ना, निष्ठा अनेन

**104. क्षायो मः | 8 | 2 | 53 ||**

क्षामः।

**105. निष्ठायां सेटि | 6 | 4 | 52 ||**

णेर्लोपः। भावितः। भावितवान्। दृह हिंसायाम्॥

**106. दृढः स्थूलबलयोः | 7 | 2 | 20 ||**

स्थूले बलवति च निपात्यते।

**107. दधातेर्हिः।**

तादौ किति। हितम्।

---

सूत्रेण क्त प्रत्यये कृते स्ना त अत्र विभक्तिकार्ये अमादेशे च स्नातं मया इति सिद्ध्यति। तथैव ष्टुञ् स्तुतौ अत्र स्तुतः सिद्ध्यति।

विश्वं कृतवान् विष्णुः - डुकृञ् करणे निष्ठासंज्ञक क्तवतु प्रत्यये कृते, अनुबन्धलोपे कृतवत् अत्र उगिदचां सर्वनामस्थानेऽधातोः सूत्रेण नुमागमे कृतवन् त् इत्यत्र अत्वसन्तस्य चाधातोः सूत्रेण आकारे दीर्घे कृतवान् त् इत्यत्र सुप्रत्ययं कृत्वा तस्य लोपकार्यं तथा संयोगान्तस्य लोपः सूत्रेण तकारस्य लोपे कृते कृतवान् इति रूपं साधुः।

**97. पदपरिचयः** - रदाभ्याम् (प.द्वि.), निष्ठातः (ष.ए.), नः (प्र.ए.), पूर्वस्य (ष.ए.), च (अव्ययपदम्), दः (ष.ए.)।

**समासः** - रश्च दश्च रदौ, ताभ्यां रदाभ्याम्, इतरेतरद्वन्द्वः। निष्ठायां तस्य निष्ठातः, षष्ठीतत्पुरुषः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - रेफदकाराभ्यां परस्य निष्ठातकारस्य नः स्यात्। निष्ठात् अपेक्षया पूर्वस्य धातोः दकारस्य अपि न भवति।

**रूपसिद्धिः - शीर्णः** - शॄ धातोः कर्मणि क्त-प्रत्यये निष्ठा सूत्रेण निष्ठासंज्ञायाम् ॠत इद्धधातोः इति इत्वे रपरत्वे हलि च इति दीर्घे रदाभ्यां--- इति सूत्रेण निष्ठा तकारस्य नत्वे णत्वे च विभक्तिकार्ये शीर्णः।

**छिन्नः भिन्नः** - छिदिर्द्वैधीकरणे भिदिर्विदारणे उभयत्र इर् इत्संज्ञालोपश्च ततः निष्ठायां क्त प्रत्ययः रदाभ्यां-- इति सूत्रेण निष्ठा तकारस्य नः धातोः दकारस्य च नत्वे विभक्तिकार्ये छिन्नः भिन्नः।

**98. पदपरिचयः** - संयोगादेः (प.ए.), आतः (प.ए.), धातोः (प.ए.), यण्वतः (प.ए.), निष्ठातः (ष.ए.), नः (प्र.ए.)।

**समासः** - संयोग आदिर्यस्य स संयोगादिस्तस्मात् संयोगादेः, बहुव्रीहिसमासः।

**अनुवृत्तिः** - निष्ठातः - नः (रदभ्यां निष्ठातो नः पूर्वस्य च दः। 8.2.42)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - आकारान्तः संयोगादि यण्वतः धातोः निष्ठातकारस्य नकारः स्यात्।

**रूपसिद्धिः - द्राणः** - द्राक् उत्सायं। गतौ इति धातोः निष्ठायाम् क्त प्रत्यये अनुबन्धलोपे संयोगादेः धातोः कारणात् यण्वानपि अस्ति अतः तकारस्य नकारे रेफात् परत्वात् रषाभ्यां णोनः समानपदे इति णत्वे द्राणः।

**99. पदपरिचयः** - ल्वादिभ्यः (प.ए.)।

**समासः** - लू आदिर्येषां ते ल्वादिभ्यस्तेभ्यो ल्वादिभ्यः, तद्गुणसंज्ञाविज्ञानबहुव्रीहिसमासः।

**अनुवृत्तिः** - निष्ठातः - नः (रदाभ्यां निष्ठातो नः पूर्वस्य च दः। 8.2.42)

**सूत्रप्रकारः** - विधिसूत्रम्।

**108. दो दद् घोः।**

घुसंज्ञकस्य दा इत्यस्य दथ् स्यात् तादौ किति। चर्त्वम्। दत्तः।

**109. लिटः कानज्वा। | 3 | 2 | 106 ||**

**110. क्वसुश्च। | 3 | 2 | 101 ||**

लिटः कानच् क्वसुश्च वा स्तः। तङानावात्मनेपदम्। चक्राणः॥

**111. म्वोश्च। | 8 | 2 | 65 ||**

मान्तस्य धातोर्नत्वं म्वोः परतः। जगन्वान्।

---

**सरलार्थः** - ल्वादिभ्यः एकविंशतेः निष्ठातकारस्य नकारः भवति।

**रूपसिद्धिः - लूनः** - इत्यत्र लूञ् छेदने इत्यास्मात्, निष्ठा सूत्रेण क्तप्रत्ये लू त इत्यत्र ल्वादिभ्यः अनेन तकारस्य नकारे लून अत्र सु तस्य विसर्गे कृते लूनः सिद्ध्यति। क्तवतु प्रत्ययः क्रियते तदा लूनवान् सिद्ध्यति।

**100. पदपरिचयः** - हलः (प.ए.)

**समासः** - संयोग आदिर्यस्य स संयोगादिस्तस्मात् संयोगादेः, बहुव्रीहिसमासः।

**अनुवृत्तिः** - सम्प्रसारणस्य (सम्प्रसारणस्य। 6.3.139), दीर्घः (ढ्रलोपे पूर्वस्यदीर्घोऽणः। 6.3.111)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अङ्गस्यावयवः हल् तस्मात् यः सम्प्रसारणः, तदन्ताङ्गस्य दीर्घः भवति।

**रूपसिद्धिः - जीनः** - ज्या धातोः क्त प्रत्यये ग्रहिज्या--- इत्यादिना सम्प्रसारणे पूर्वरूपे ल्वादिभ्यः इति तकारस्य नकारे हलः इति दीर्घे विभक्तिकार्ये जीनः।

**101. पदपरिचयः** - ओदितः (प.ए.), च (अव्ययपदम्), निष्ठातः (ष.ए.), नः (प्र.ए)

**समासः** - ओत् इत् यस्य स ओदित्, बहुव्रीहिः।

**अनुवृत्तिः** - नः रदाभ्यां निष्ठातो नः पूर्वस्य च दः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ओकारः इत् यस्य असौ ओदितः धातोः तस्मात् परस्य निष्ठातकारस्य नकारः स्यात्।

**रूपसिद्धिः - भुजो भुग्नः** - भुजो इति धातोः जकारस्य कुत्वे निष्ठा तकारस्य ओदितश्च इति नकारे विभक्तिकार्ये भुग्नः इति।

**उच्छूनः** - उत्पूर्वक टु ओ श्वि इति धातोः क्त प्रत्यये वचिष्वपियजादीनां किति इति सम्प्रसारणे पूर्वरूपे श्वीदितोनिष्ठायाम् इति इट् निषेधे हलश्च इति दीर्घे निष्ठा तकारस्य नकारे सन्धिकार्ये उच्छूनः।

**102. पदपरिचयः** - शुषः (प.ए.), कः (प्र.ए)।

**अनुवृत्तिः** - निष्ठातः रदाभ्यां निष्ठातो नः पूर्वस्य च दः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - शुषधातोः निष्ठातकारस्य ककारादेशो भवति।

**रूपसिद्धिः - शुष्कः** - शुषेः क्त प्रत्ययः शुषः कः इति कुत्वे विभक्तिकार्ये शुष्कः।

**103. पदपरिचयः** - पचः (प.ए), वः (प्र.ए)।

**अनुवृत्तिः** - निष्ठातः रदाभ्यां निष्ठातो नः पूर्वस्य च दः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**112. लटः शतृशानचावप्रथमासमानाधिकरणे। |3|2|124||**

अप्रथमान्तेन समानाधिकरणे लट एतौ वा स्तः। शबादि। पचन्तं चैत्रं पश्य॥

**113. आने मुक्। |7|2|65||**

अदन्ताङ्गस्य मुमागमः स्यादाने परे। पचमानं चैत्रं पश्य। लडित्यनुवर्तमाने पुनर्लड्ग्रहणात्प्रथमासामानाधिकरण्येऽपि क्वचित्। सन् द्विजः।

**114. विदेः शतुर्वसुः। |7|1|36||**

वेत्तेः परस्य शतुर्वसुरादेशो वा। विदन्। विद्वान्॥

**115. तौ सत्। |3|2|127||**

तौ शतृशानचौ सत्संज्ञौ स्तः।

---

**सरलार्थः** - पचे क्त पचो वः इति तकारस्य वकारः करोति।

**रूपसिद्धिः - पक्वः** - पचेः क्त पचो वः इति तकारस्य वकारे चोः कुः इति कुत्वे विभक्तिकार्ये पक्वः।

**104. पदपरिचयः** - क्षायः (प.ए.), मः (प्र.ए)।

**अनुवृत्तिः** - निष्ठातः रदाभ्यां निष्ठातो नः पूर्वस्य च दः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - क्षयि धातोः क्त प्रत्यये क्षायो मः इति तकारस्य मकारो भवति।

**रूपसिद्धिः - क्षामः** - क्षयि धातोः क्त प्रत्यये आदेच उपदेशेऽशिति इति आत्वे क्षायो मः इति तकारस्य मकारे विभक्तिकार्ये क्षामः।

**105. पदपरिचयः** - निष्ठायाम् (स.ए.), सेटि (स.ए.), णेः (ष.ए.)

**समासः** - इटा सह वर्त्तत इति सेट्, तस्मिन् सेटि, बहुव्रीहिसमासः।

**अनुवृत्तिः** - णेः (णेरनिटि), लोपः

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - निष्ठार्थके प्रत्यये इड् सहिते पदे णि लोपः भवति।

**रूपसिद्धिः - भावितः** - भू धातोः णिच् प्रत्यये निष्ठायां क्त प्रत्यये क्तवतु प्रत्यये च उदुपधादि सूत्रेण विकल्पेन कित् कृते निष्ठायां सेटि इत्यनेन णि लोपः भावितः। क्तवतु प्रत्यये कृते भावितवान्।

**106. पदपरिचयः** - दृढः (प्र.ए.), स्थूलबलयोः (स.द्वि)

**समासः** - स्थूलश्च बलश्च स्थूलबलौ, तयोः स्थूलबलयोः, इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - स्थूल तथा बलवान् अर्थे दृढशब्दः निपातनात् सिद्ध्यति।

**107. पदपरिचयः** - दधातेः (ष.ए.), हि (प्र.ए.)।

**अनुवृत्तिः** - ति, किति (द्यतिस्यतिमास्थामितिकिति च)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तादौ किति प्रत्यये परे दध् धातोः हि आदेशः भवति।

**रूपसिद्धिः - हितम्** - दध् धातोः निष्ठायां क्त प्रत्यये दधातेर्हिः इत्यनेन हि इत्यादेशे हितम्।

**116. लृटः सद्वा | 3 | 3 | 14 ||**

व्यवस्थितविभाषेयम्। तेनाप्रथमासामानाधिकरण्ये प्रत्ययोत्तरपदयोः सम्बोधने लक्षणहेत्वोश्च नित्यम्। करिष्यन्तं करिष्यमाणं पश्य।

**117. आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु | 3 | 2 | 34 ||**

क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छीलादिषु कर्तृषु बोध्याः॥

**118. तृन् | 3 | 2 | 135 ||**

कर्ता कटान्॥

**119. जल्पभिक्षकुट्टलुण्टवृङः षाकन् | 3 | 2 | 155 ||**

---

**108. पदपरिचयः** - दः (ष.ए.), दद् (प्र.ए.), घोः (ष.ए.)।

**सरलार्थः** - घुसंज्ञक धातोः दा इत्यस्य स्थाने दध् इत्यादेशः भवति तादौ किति प्रत्यये परे।

**अनुवृत्तिः** - ति, किति (द्यतिस्यतिमास्थामितिकिति च)

**सूत्रप्रकारः** - विधिसूत्रम्।

**रूपसिद्धिः - दत्तः** - दा धातोः क्त प्रत्यये दो दद्घोः इति सूत्रेण दध् आदेशे खरि च इति चर्त्वेन दत्तः।

**109. पदपरिचयः** - लिटः (ष.ए.), कानच् (प्र.ए.)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - लिटि परे धातोः कानच् प्रत्ययः विकल्पेन भवति।

**110. पदपरिचयः** - क्वसुः (प्र.ए.), च (अव्ययपदम्)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - भूतसामान्ये छन्दसि क्वसु प्रत्ययः अपि वेदे भवति, इति त्रिमुनिमतम्।

**रूपसिद्धिः - चक्राण** - इत्यत्र कृ धातोः लिट् अस्य स्थाने कानच् कृत्वा कृ आन भवति, अत्र स्थानिवद्भावेन आनं लिटम् मत्वा लिटि धातोरनभ्यास्य सूत्रेण कृ अस्य द्वित्वं कृत्वा कृ कृ आन अत्र उरत् अनेन अर् तथा रपरे हलादि शेषे सूत्रेण रलोपे कृते क कृ आन इत्यत्र अभ्यासे चर्च अनेन सूत्रेण चुत्वे कृते च कृ आन इत्यत्र इको यणचि अनेन सूत्रेण ऋकारस्य रकारे कृते चक्रान भवति, अट्कुप्वा... सूत्रेण नकारस्य णकारे कृते सति विभक्तिकार्ये सकारस्य रुत्वे कृते चक्राणः सिद्ध्यति।

**111. पदपरिचयः** - म्वोः (स.द्वि.), च (अव्ययपदम्), मः (ष.ए.), नः (प्र.ए.)।

**समासः** - म् च व् च म्वौ, तयोः - म्वोः, इतरेतरद्वन्द्व।

**अनुवृत्तिः** - धातोः (मो नो धातोः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - मकारान्तस्य धातोः मकारस्य स्थाने नकारः भवति, मकारे वकारे च परे सति।

**रूपसिद्धिः - जगन्वान्** - इत्यत्र गम् धातोः लिटः स्थाने क्वसुश्च सूत्रेण क्वसु आदेशे गम् वस् अत्र स्थानिवद्भावे द्वित्वे गम् गम् वस् इत्यत्र अभ्याससंज्ञा, हलादि शेषः, चुत्वं कृत्वा जगम् वस् इत्यत्र प्राप्तस्य इडः नेड् वशि कृति सूत्रेण निषेधे पुनः विभाषा गमहनविदिशाम् सूत्रेण विकल्पेन इडागमे कृते गमहनजनखनघसां... सूत्रेण उपधालोपे कृते जग्मिवस् अत्र जग्मिवान् सिद्ध्यति। इडागमस्य अभावे म्वोश्च सूत्रेण मकारस्य स्थाने नकारे कृते जगन्वस् भवति। अत्र उगिदचां सर्वनामस्थाने... सूत्रेण नुम् तथा सान्तमहतः संयोगस्य सूत्रेण दीर्घे कार्ये कृते सु स्वादिकार्ये जगन्वान् सिद्ध्यति।

**120. षः प्रत्ययस्य |1|3|6||**

प्रत्ययस्यादिः ष इत्संज्ञः स्यात्। जल्पाकः। कुट्टाकः। लुण्टाकः। वराकः। वराकी।

**121. सनाशंसभिक्ष उः |3|2|168||**

चिकीर्षुः। आशंसुः। भिक्षुः।

**122. भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् |3|2|177||**

विभ्राट्। भाः॥

**123. राल्लोपः |6|4|21||**

रेफाच्छ्वोर्लोपः क्वौ झलादौ क्ङिति। धूः। विद्युत्। ऊर्क्। पूः। दृशिग्रहणस्यापकर्षाज्जवतेदीर्घः। जूः। ग्रावस्तुत्॥

**वार्तिकम्**-क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च। वक्वतीति वाक्।

---

**112. पदपरिचयः** - लटः (ष.ए.), शतृ-शानचौ (प्र.द्वि.), अप्रथमासमानाधिकरणे (स.ए.)।

**समासः** - शता च शानच् शतृशानचौ, इतरेतरद्वन्द्वः। न प्रथमा इति अप्रथमा, नञ्समासः, पर्युदासप्रतिषेधः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - प्रथमान्तं विहाय द्वितीयन्तादिभिः सह समानाधिकरणभूते सति लटः स्थाने शतृ-शानच् प्रत्ययौ भवतः।

**रूपसिद्धिः** - अत्र प्रयोगे पच् धातोः शतृ प्रत्यये अनुबन्धलोपे - द्वितीयाविभक्तौ अम् प्रत्यये पचन्तम् चैत्रं पश्य इति साधुः।

**113. पदपरिचयः** - आने (स.ए.), मुक् (प्र.ए.), अतः (ष.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अकारान्तात् अङ्गात् मुमागमः स्यात्, आदाने परे। तेन पचधातोः शानच्प्रत्ययेन पचमानं सिद्ध्यति।

**विशेषार्थः** - सूत्रेऽस्मिन् लट्ग्रहणस्य अनुवर्तमाने पुनः लट्ग्रहणस्य प्रयोजनम् अधिकविधानार्थं तत् फलं अप्रथमायामपि अधिकरणेऽपि क्वचित् भवति। यथा - सन् द्विजः।

**रूपसिद्धः** - पच्-धातोः शानच्-प्रत्ययेन पचमान सिद्ध्यति। अत्र सूत्रे लट् ग्रहणस्य अनुवर्तमाने पुनः लट्ग्रहणस्य प्रयोजनं अधिकविधनार्थं तत् फलम् अप्रथमायामपि अधिकरणेऽपि क्वचित् भवति। यथा सन् ब्राह्मणः।

**114. पदपरिचयः** - विदेः (प.ए.), शतुः (ष.ए.), वसुः (प्र.ए.)।

**अनुवृत्तिः** - अन्यतरस्याम् (तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - विद्-धातोः परस्य शतृप्रत्ययस्य स्थाने वसुरादेशो भवति, विकल्पेन।

**रूपसिद्धः - विद्वान्** - इत्यत्र विद् ज्ञाने इत्यास्मात् लटः शतृशानचाव... सूत्रेण शतृप्रत्यये कृते विद् शतृ इत्यत्र विदेः शतुर्वसु सूत्रेण वसु आदेशे विद् वसु अनुबन्धलोपे विद् वस् प्रातिपदिकत्वात् सु, नुम्, दीर्घ, सुलोपः, विद्वान् सिद्ध्यति।

**115. पदपरिचयः** - तौ (प्र.ए.), सत् (प्र.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - शतृ - शानच् प्रत्यययोः सत्संज्ञा भवति।

**116. पदपरिचयः** - लृटः (ष.ए.), सत् (प्र.ए.), वा (अव्ययपदम्)।

**124. च्छ्वोः शूडनुनासिके च |6|4|19||**

सतुक्कस्य छस्य वस्य च क्रमात् श् उठ् इत्यादेशौ स्तोऽनुनासिके क्वौ झलादौ च क्ङिति। पृच्छतीति प्राट्। आयतं स्तौतीति आयतस्तूः। कटं प्रवते कटप्रूः। जूरुक्तः। श्रयति हरिं श्रीः।

**125. दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे |3|2|182||**

दाबादेः ष्ट्रन् स्यात् करणेऽर्थे। दात्यनेन दात्रम्। नेत्रम्।

**126. तितुत्रतथसिसुसरकसेषु च |7|1|9||**

एषां दशानां कृत्यप्रत्ययानामिण् न। शस्त्रम्। योत्रम्। योक्त्रम्। स्तोत्रम्। तोत्त्रम्। सेत्रम्। सेक्त्रम्। मेढ्रम्। पत्त्रम्। दंष्ट्रा। नद्ध्री॥

**127. अर्तिलूधूसूखनसहचर इत्रः |3|2|184||**

अरित्रम्। लवित्रम्। धुवित्रम्। सवित्रम्। खनित्रम्। सहित्रम्। चरित्रम्।

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - लृटः स्थाने सत्संज्ञौ शतृशानचौ वा भवतः।

**रूपसिद्धिः - करिष्यन्तम् - करिष्यमाणम्**

कृ उभयपदी धातुः अस्ति, तस्मात् लृट् लकारे तयोः परस्मैपदे शतृ आत्मनेपदे शानच् क्रियते, कृ अत्, कृ आन इत्यत्र सार्वधातुकसंज्ञा, इटागमे, स्यतासी लृलुटोः अनेन स्य कृ इस्य अत्, कृ इस्य आन इत्यत्र सार्वधातुकार्धधातुकयोः सूत्रेण गुणे अर् अतः कर् इस्य अत्, कर् इस्य आन अत्र सकारस्य षकारे अतो गुणे अनेन पररूपे करिष्यत्, करिष्य आन इत्यत्र अट्कुप्वा... सूत्रेण णकारे करिष्यत्, करिष्यमाण अत्र करिष्यत् इत्यत्र प्रथमाविभक्तौ करिष्यन् तथा करिष्यमाण एतौ द्वितायान्तं करिष्यन्तं, करिष्यमाणं पश्य सिद्ध्यति।

**117. पदपरिचयः** - आ (अव्ययपदम्), क्वेः (प.ए.), तच्छीलतद्धर्मतत्साधुकारिषु (स.ब.)।

**सूत्रप्रकारः** - अधिकारसूत्रम्।

**सरलार्थः** - स्वभावे द्योत्ये अर्थे यः साधुकारि तेषु कर्तृषु क्विपमभिव्याप्यप्रत्ययाः धातोः परे भवन्ति।

**विशेषार्थः** - क्रियायां प्रवृत्तिं तच्छील इति उच्यते। एते सोपसर्गाः न भवन्ति।

**118. पदपरिचयः** - तृन् (प्र.ए.)।

**अनुवृत्तिः** - तच्छीलतद्धर्मतत्साधुकारिषु (आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - तच्छीलादिषु कर्त्रर्थे तृन् प्रत्ययो भवति।

**रूपसिद्धिः - कर्ता कटान्** - करोति तच्छीलः, कृ इत्यस्मात् तृन् सूत्रेण तृन् प्रत्यये कृ तृ इत्यत्र सार्वधातुकार्ध... सूत्रेण गुणे कर् तृ इत्यत्र प्रातिपदिकसंज्ञायां सु विभक्ति कृते च ऋदुशनस्पुरु... सूत्रेण अनङादेशे कर्त् अन् स् इत्यत्र अप्तृन्तृच्... सूत्रेण दीर्घे कृते कर्तान् स् इत्यत्र हलाङ्याभ्यो... सूत्रेण सकारे लोपे न लोपे च कर्ता सिद्ध्यति।

**119. पदपरिचयः** - जल्पभिक्षकुट्टलुण्टवृङः (प.ए.), षाकन् (प्र.ए.)।

**अनुवृत्तिः** - तच्छीलतद्धर्मतत्साधुकारिकारिषु (आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - जल्पभिक्षकुट्टलुण्टवृङ्धातुभ्यः तच्छील, तद्धर्म, तत्साधुकारिषु एषु अर्थेषु षाकन् प्रत्ययः जायते।

**120.पदपरिचयः** - षः (प्र.ए.), प्रत्ययस्य (ष.ए.)।

**128. पुवः संज्ञायाम् | 3 | 2 | 185 ||**

पवित्रम्।

---

**अनुवृत्तिः** - आदिः (आदिर्ञिटुडवः), इत (उपदेशेऽजनुनासिक इत्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - प्रत्ययस्यादौ षकारः इत्संज्ञकः भवति।

**रूपसिद्धिः - जल्पाक** - जल्प व्यक्तायां वाचि धातोः अनेन षाकन् अनुबन्धलोपे जल्प आक दीर्घे सस्य रूत्वे विसर्गे जल्पाकः। एवमेव भिक्षधातोः भिक्षाकः कुट्ट धातोः कुट्टाकः वृङ् धातोः वराकः सर्वत्र षित्वात् स्त्रीलिङ्गे ङीष्-प्रत्ययः तेन जल्पाकी भिक्षाकी कुट्टाकी लुण्टाकी बराकी च रूपाणि सिद्ध्यन्ति।

**121. पदपरिचयः** - सनाशंसभिक्षः (प.ए.), उः (प्र.ए.)।

**समासः** - सन् च आशंसश्च भिक्ष च सनाशंसभिक्ष् तस्मात् = सनाशंसभिक्षः। समाहारद्वन्द्वः।

**अनुवृत्तिः** - तच्छीलतद्धर्मतत्साधुकारिषु (आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सनन्त, आ + शंस्, तथा भिक्ष् धातुभ्यः तच्छील-तद्धर्म-तत्साधुकारि कर्तरि अर्थे उ प्रत्ययः भवति।

**रूपसिद्धिः** - कृ धातोः सन्-प्रत्यये द्वित्वे अभ्यासकार्ये षत्वे चिकीर्ष इति सनन्तरूपम् सनासंसभिक्ष उ इति उ प्रत्यये स्वादिकार्ये च चिकीर्षुः इति रूपं साधु। **आशंसुः** - आङ्ः शसि इच्छायाम् सनासंसभिक्ष उ इति उ-प्रत्यये स्वादिकार्ये आशंसुः।

**122. पदपरिचयः** - भ्राज-भास-धुर्वि-द्युतोर्जि-पॄ-जु-ग्रावस्तुवः (प.ए.), क्विप् (प.ए.)।

**समासः** - भ्राजश्च भ्रासश्च धुर्विश्च द्युतश्च ऊर्जिश्च पॄ च जुश्च ग्रावस्तुश्च, तस्मात् = भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः, समाहारद्वन्द्वः॥

**अनुवृत्तिः** - तच्छीलतद्धर्मतत्साधुकारिषु (आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - भ्राज्, भास्, धुर्व, द्युत्, ऊर्ज्, पॄ, जु तथा ग्रावपूर्वक स्तु धातुभ्यः तच्छील-तद्धर्म-तत्साधुकारि अर्थे क्विप् प्रत्ययः भवति।

**रूपसिद्धिः - भाः** भासृ दीप्तौ धातोः क्विप् प्रत्यये सर्वापहारि लोपे कृदन्तत्वात् प्रातिपदिकत्वं ततः सौ हलङ्यादि लोपे सस्य रूत्वे विसर्गे भाः इति साधुः।

**123.पदपरिचयः** - रात् (प.ए.), लोपः (प्र.ए.)।

**वार्तिकपदपरिचयः** - क्विप् (प्र.ए.), वचि-प्रच्छ्यायस्तु-कटप्रु-जुश्रीणां (ष.ब.) दीर्घ (प्र.ए.), असम्प्रसारणम् (प्र.ए.), च (इत्यव्यपदम्)

**वार्तिकसमासः** - न सम्प्रसारणम् इति असम्प्रसारणम्, नञ्समासः।

**अनुवृत्तिः** - छवोः (छवोः शूडनुनासिके च)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - रेफात् परे छ वा वकारस्य लोपकार्यं भवति, यदि क्वौ तथा झलादि किति-ङिति परे स्यात्।

**वार्तिकसरलार्थः** - वच्, प्रच्छ, आयतपूर्वक स्तु, कट पूर्वक प्रु, जु तथा ज्र एते षड् धातवः तेभ्यः तच्छीलाद्यर्थे कर्तरि क्विप् भवति, एतेषां दीर्घकार्यम् अपि भवति तथा सम्प्रसारणस्य अभावः अपि भवति।

**रूपसिद्धिः - धूः** - धूर्वी हिंसायाम्, धुर्व् इत्यस्मात् भ्राजभास... सूत्रेण क्विप् सर्वापहारलोपः धुर्व्, राल्लोपः सूत्रेण वकारस्य लोपे धुर्, प्रातिपदिकसंज्ञायाम् तथा हलङ्या... सूत्रेण सकारस्य लोपे र्वोरुपधायाः दीर्घ इकः सूत्रेण दीर्घे कृते धूर् रेफस्य विसर्गे धूः सिद्ध्यति। विद्युत् अत्र क्विप् भूत्वा सर्वापहारलोपे सु कृते हल्ङ्याभ्यो... सूत्रेण सकारे लोपे विद्युत् सिद्ध्यति। तथैव उर्क् सिद्ध्यति। पृ पालनपूरणयोः अत्र उदोष्ठ्यपूर्वस्य सूत्रेण उत्वे रपरत्वे कृते पुर् भवति, प्रातिपदिकत्वात् सु कृते सकारस्य लोपे, र्वोरुपधायाः दीर्घ इकः सूत्रेण उकारे दीर्घे रेफस्य विसर्गे कृते पूः सिद्ध्यति।

**वाक्** - वच् अत्र क्विप् भवति अतः वार्तिकसूत्रेण सम्प्रसारणकार्यं बाधित्वा दीर्घकार्यं कृत्वा वाच् चोः कुः सूत्रेण कुत्वे वाक् भवति सुप्रत्यये लोपे च वाक् सिद्ध्यति।

**124. पदपरिचयः** - च्छ्वोः (ष.द्वि.), शूड् (प्र.ए.), अनुनासिके (स.ए.), च (अव्ययपदम्)।

**समासः** - च्छ च व् च इति च्छ्वौ: तयोः, इतरेतरद्वन्द्वः। श् च ऊठ् च तयोः समाहारद्वन्द्वः।

**अनुवृत्तिः** - क्विझलोः क्ङिति (अनुनासिकस्य क्विझलोः क्ङिति)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सतुक्कस्य छस्य वस्य च क्रमात् श् उठ् इत्यादेशौ भवतः, अनुनासिके क्वौ झलादौ किति, ङिति च प्रत्यये परतः।

**रूपसिद्धिः - पृच्छतीति प्राट्** - प्रच्छ ज्ञीप्सायाम् अत्र क्विब्वचिप्रच्छ्यायतस्तु... सूत्रेण क्विप् प्रत्यये प्रच्छ क्विप् अत्र ग्रहिज्यावयि... सूत्रेण सम्प्रसारणकार्यस्य अभावः तथा धातोः दीर्घे कार्ये कृते प्राच्छ अत्र च्छ्वोः शूड्... सूत्रेण शकारे प्राश् इति भवति, व्रश्चभ्रस्ज... सूत्रेण शकारस्य षकारे प्राष् अत्र जश्त्वम्, विकल्पेन चर्त्वे प्राट् प्राड् इति सिद्ध्यति। तथैव आयतं स्तौतीति आयतस्तूः। कटं प्रवते कटप्रूः। तथा श्रयति हरिं श्रीः।

**125. पदपरिचयः** - दाम्-नी-शस-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-दश-नहः (प.ए.), करणे (स.ए.)।

**समासः** - दाप् च नीश्च शसश्च युश्च युजश्च स्तुश्च तुदश्च सिश्च सिचश्च मिहश्च पतश्च दशश्च नह् च एषां समाहारः, तस्मात् = दाम्नीशसययुजस्तुतुदसिसिचमिहपतदशनहः, समाहारद्वन्द्वः।

**अनुवृत्तिः** - ष्ट्रन् (धः कर्मणि ष्ट्रन्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - द्वाप्-नी-शस्-यु-युज्-स्तु-तुद-सि-सिच्-मिट्-वत्-दश्-नट् एभ्यः परे करणार्थे ष्ट्रन् प्रत्ययः भवति।

**रूपसिद्धिः** -

**दात्रम्** दा धातोः अनेन ष्ट्रन् प्रत्यये अनुबन्धलोपे ततः सौ अमादेशे पूर्वरूपे दात्रम्। एवमेव नीयते अनेन इति विग्रहे ष्ट्रन् प्रत्यये नेत्रम्।

**126. पदपरिचयः** - ति-तु-त्र-त-थ-सि-सु-सर-क-सेषु (स.ब.), च (अव्ययपदम्)।

**समासः** - तिश्च तुश्च त्रश्च तश्च थश्च सिश्च सुश्च सरश्च कश्च सश्च एषामिति इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - कृत्सु, न, इट् (नेड् वशि कृति)

**सूत्रप्रकारः** - निषेधविधिसूत्रम्।

**सरलार्थः** - ति, तु, त्र, त, थ, सि, सु, सर, क तथा सादि प्रत्ययेभ्यः इडागमः न भवति।

**रूपसिद्धिः** -

**शस्त्रम्** - शसु हिंसायाम्, शम् इत्यस्मात् धातोः दाम्नीशस्... सूत्रेण ष्ट्रन् प्रत्यये अनुबन्धलोपः शस् त्र इत्यत्र इट्प्राप्ते सति तितुत्रतथसिसुर... सूत्रेण इण्निनषेधः प्रातिपदिकत्वात् सु तस्य स्थाने अमादेशे शस्त्रम् इति सिद्ध्यति। तथैव **योत्रम्** अत्र आर्धधातुकत्वात् गुणकार्यम्। योक्त्रम्। स्तोत्रम्। तोत्त्रम्। सेत्रम्। सेक्त्रम्। मेढ्रम्। पत्त्रम् इत्यादि सिद्ध्यति।

**127. पदपरिचयः** - अर्ति-लू-धू-सू-खन-सह-चरः (प.ए.), इत्रः (प्र.ए.)।

**समासः** - अर्तिश्च लूश्च धूश्च सूश्च खनश्च सहश्च चर् च एषां समाहारद्वन्द्वः।

**अनुवृत्तिः** - करणे (दाम्नीशसययुजस्तुतुदसिसिचमिहपतदशनहः करणे)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ऋ-लू-धू-सू-खन्-सट् तथा चर् धातुभ्यः करणार्थे इत्र प्रत्ययः भवति।

**रूपसिद्धिः - अरित्रम्** ऋच्छत्यनेन ऋ प्रापणयोः धातोः अर्तिलूधू इत्यनेन इत्र प्रत्यये आर्धधातुकत्वात् ऋकारस्य गुणे स्वादिकार्ये अरित्रम्। लूञ्-छेदने धातोः **लवित्रम्**। धू विधूनने **धवित्रम्**। सुवन्त्यनेन **सवित्रम्**। खनन्ति अनेन **खनित्रम्**। सहन्ते अनेन **सहित्रम्**। चरन्ति अनेन **चरित्रम्**।

**128. पदपरिचयः** - पुवः (प.ए.), संज्ञायाम् (स.ए.), इत्रः (प्र.ए.)।

**अनुवृत्तिः** - करणे (अर्तिलूधूसूखनसहचर इत्रः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - पूधातोः करणे अर्थे प्रकृतिप्रत्यययोः समुदायात् संज्ञार्थः गम्यमानश्चेत् इत्र प्रत्ययः स्यात्।

**रूपसिद्धिः - पवित्रम्** पू धातोः करणे अर्थे प्रकृति प्रत्यययोः समुदायात् संज्ञार्थः गम्यमानश्च इत्र प्रत्ययः पवन्ते पुनन्ति वा अनेन पूङ् पवने धातोः पुवः संज्ञायाम् इति इत्र प्रत्यये आर्धधातुकत्वात् गुणे अवादेशे स्वादिकार्ये पवित्रम्।

## स्वाध्यायः

**1. विकल्पं चित्वा रित्कस्थानं पूरयत।**

(1) ण्वुल्तृचौ प्रत्ययौ कस्मिन् अर्थे भवतः ? (कर्तरि, भावे, कर्मणि)

(2) इगुपधज्ञाप्रीकिरः ......... ? (वः, नः, कः)

(3) कुम्भं करोति इति ......... ? (मीनकारः, कुम्भकारः, सिंहकारः)

(4) 'चरेष्टः' अस्य सूत्रस्योदाहरणं किम् ? (भिक्षाचरः, कुरुचरः, सेनाचरः)

(5) तौ सत् सूत्रेण का संज्ञा क्रियते ? (सत्संज्ञा, निष्ठसंज्ञा, कर्तासंज्ञा)

(6) 'षः प्रत्ययस्य' सूत्रस्य कार्यं किम् ? (षकारद्वित्वम्, षकारेत्संज्ञा, षस्य सकारः)

(7) पवित्रम् इत्यत्र कः प्रत्ययः ? (इत्र, ष्ट्रन्, घञ्)

**2. लघूत्तराणि देयानि -**

(1) कर्मणि उपपदे कः प्रत्ययः भवति ?

(2) अधिकरणे उपपदे कः प्रत्ययः प्रवर्तते ?

(3) प्रिय तथा वशम् उपपदे वदधातोः कः प्रत्ययः प्रयुज्यते ?

(4) अन्येभ्योऽपि दृश्यन्ते सूत्रे कति प्रत्ययाः सन्ति ?

(5) निष्ठासंज्ञकौ प्रत्ययौ कौ ?

**3. अधोनिर्दिष्टानि रूपाणि साधयत।**

(1) कारकः

(2) कुम्भकारः

(3) उष्णभोजी

(4) स्नातं मया

(5) चक्राणः

**4. अधोनिर्दिष्टनां सूत्राणां सोदाहरणमर्थं लिखत।**

(1) भिक्षासेनादायेषु च।

(2) राजनि युधि कृञः।

(3) निष्ठा।

(4) षः प्रत्ययस्य।

(5) सनाशंसभिक्ष उः।

**5. अधोलिखितानांप्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) 'अतः कृकमि...' इति प्रपूर्य तस्योदाहरणानि लिखत।

(2) 'रदाभ्यां नि...' इति प्रपूर्य तत्रत्यानि संज्ञा तथा उदाहरणानि लिखतु।

(3) 'लृटः सद्वा' सूत्रं सार्थोदाहरणं लिखत।

•

# १३ उत्तरकृदन्तप्रकरणम्

**प्रस्तावना**

अत्र लघुसिद्धान्तकौमुद्यां कृदन्तस्य अन्तिमप्रकरणम् उत्तरकृदन्तं प्रारभ्यते। अस्मिन् प्रकरणे मुख्यतया तुमुन्, ण्वुल्, घञ्, अच्, अप्, क्तिन्, क्त्वा तथा णमुलादि प्रत्ययानां निर्देशः प्राप्यते। उणादयो बहुलम् इत्यस्मात् पूर्वं प्रकरणं पूर्वकृदन्तप्रकरणं तथा तदनन्तरं उत्तरकृदन्तप्रकरणम् अस्ति। इदानीं तुमुनादिप्रत्ययानां निरुपणं क्रियते।

---

**129. तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् | 3 | 3 | 10 ||**

क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः। मान्तत्वादव्ययत्वम्। कृष्णं द्रष्टुं याति। कृष्णं दर्शको याति।

**130. कालसमयवेलासु तुमुन् | 3 | 3 | 167 ||**

कालार्थेषूपपदेषु तुमुन्। कालः समयो वेला वा भोक्तुम्।

**131. भावे | 3 | 3 | 18 ||**

सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्। पाकः॥

**132. अकर्तरि च कारके संज्ञायाम् | 3 | 3 | 19 ||**

कर्तृभिन्ने कारके घञ् स्यात्॥

---

**129. पदपरिचयः** - तुमुन्-ण्वुलौ (प्र.द्वि.), क्रियायाम् (स.ए.), क्रियार्थायाम् (स.ए.)।

**समासः** - तुमुन् च ण्वुल् च तुमुन्ण्वुलौ, इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - भविष्यति (भविष्यति गम्यादयः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - क्रियार्थकक्रियोपपदे सति भविष्यार्थे धातुभ्यः तुमुन्ण्वुलौ प्रत्ययौ स्तः।

**रूपसिद्धिः - कृष्णं द्रष्टुं याति** - दृश् धातोः तुमुन्ण्वुलौ क्रियायां... सूत्रेण तुमुन्-प्रत्यये दृश् तुमुन् अत्र आर्धधातुकसंज्ञा तथा इटागमस्य प्राप्तिः भवति, एकाच उपदेशेऽशिति सूत्रेण नेषेधे, सृजिदृशोझल्यमकिति... सूत्रेण अमागमे दृ अश् यण्कार्ये द्रश् तुम् अत्र व्रश्चभ्रस्ज... सूत्रेण षकारे द्रष् तुम् अत्र तकारस्य ष्टुत्वे द्रष्टुम् इति सिद्ध्यति।

**कृष्णं दर्शको याति** - दृश् धातोः तुमुन्ण्वुलौ क्रियायां... सूत्रेण ण्वुल्-प्रत्यये दृश् ण्वुल् अत्र अनुबन्धलोपे वु अत्र युवोरनाकौ सूत्रेण अकादेशे दृश् अक अत्र पुगन्तलघुपधस्य च सूत्रेण गुणे अर् दर्श् अक प्रातिपदिकत्वात् सु तथा सस्य रुत्वे दर्शकर् हशि च सूत्रेण रेफस्य उकारे दर्शक उ अत्र गुणे ओकारे दर्शको याति इति सिद्ध्यति।

**130. पदपरिचयः** - कालसमयवेलासु (स.ब.), तुमुन् (प्र.ए.)।

**समासः** - कालश्च समयश्च वेला च कालसमयवेलाः, तासु कालसमयवेलासु, इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कालार्थके उपपदे सति धातुभ्यः तुमुन् प्रत्ययः भवति।

**रूपसिद्धिः - कालः समयो वेला वा भोक्तुम्** - भुज पालनभ्यवहारयोः अत्र भुज् धातोः कालसमयवेलासु तुमुन् सूत्रेण तुमुन् प्रत्यये तस्य प्रत्ययस्य आर्धधातुकसंज्ञा तथा गुणे च कृते भोज् तुमुन् अत्र खरि च अनेन सूत्रेण चर्त्वे ककारे भोक् तुम् वर्णसम्मेलने भोक्तुम् इति रूपं साधु।

**131. पदपरिचयः** - भावे (स.ए.)।

**133. घञि च भावकरणयोः |6|4|27||**

रञ्जेर्नलोपः स्यात्। रागः। अनयोः किम् ? रज्यत्यस्मिन्निति रङ्गः॥

**134. निवासचितिशरीरोपसमाधानेष्वादेश्च कः |3|3|41||**

एषु चिनोतेर्घञ् आदेश्च ककारः। उपसमाधनं राशीकरणम्। निकायः। कायः। गोमनिकायः॥

**135. एरच् |3|3|56||**

इवर्णान्तादच्। चयः। जयः।

**136. ॠदोरप् |3|3|57||**

ॠवर्णान्तादुवर्णान्ताच्चाप्। करः। गरः। यवः। लवः। स्तवः। पवः। (घञर्थे कविधानाम्) प्रस्थः। विघ्नः।

---

**अनुवृत्तिः** - घञ् (पदरुजविशस्पृशो घञ्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सिद्धावस्थाप्राप्तधात्वर्थेभ्यः घञ्-प्रत्ययः भवति।

**रूपसिद्धिः - पाकः** - पचनं पाकः, डुपचष् पाके अत्र भावे सूत्रेण घञ् प्रत्यये पच् इत्यत्र णित्वात् उपधावृद्धिः पाच् अ इत्यत्र चजोः कु घिण्ण्यतोः सूत्रेण कुत्वे पाक् अ इत्यत्र प्रातिपदिकत्वात् सु तथा सस्य रुत्वे विसर्गे कृते पाकः सिद्ध्यति।

**132. पदपरिचयः** - अकर्तरि (स.ए.), च (अव्ययपदम्), कारके (स.ए.), संज्ञायाम् (स.ए.)।

**समासः** - न कर्तरि इति अकर्तरि, नञ्तत्पुरुषः।

**अनुवृत्तिः** - घञ् (पदरुजविशस्पृशो घञ्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - घञन्तात् पदात् संज्ञार्थे द्योत्ये कर्तृभिन्नकारकस्य घञ्-प्रत्ययो भवति।

**133. पदपरिचयः** - घञि (स.ए.), च (अव्ययपदम्), भावकरणयोः (स.द्वि.)।

**समासः** - भावश्च करणश्च भावकरणे, तयोः भावकरणयोः, इतरेतरद्वन्द्वसमासः।

**अनुवृत्तिः** - रञ्जेः (रञ्जेश्च), नलोपः (श्नान्नलोपः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - रञ्जधातोः उपधायाः नकारस्य लोपो भवति यदा भावकरणार्थे घञ्-प्रत्यये परे।

**रूपसिद्धिः - रागः** - रज्यते अनेन इति रागः, रञ्ज् रागे इत्यस्मात् धातोः अकर्तरि च कारके संज्ञायाम् अनेन सूत्रेण घञ् प्रत्यये कृते रञ्ज अ इत्यत्र घञि च भावकरणयोः सूत्रेण ञकारस्य लोपे कृते रज् अ इत्यत्र अत उपधायाः सूत्रेण उपधावृद्धौ राज् अ इत्यत्र चजोः कु घिण्ण्यतोः सूत्रेण जकारस्य कुत्वे कृते राग अत्र पुल्लिङ्गे रागः सिद्ध्यति।

**134. पदपरिचयः** - निवासचितिशरीरोपसमाधानेषु (स.ब.), आदेः (ष.ए.) च (अव्ययपदम्)।

**समासः** - निवासश्च चितिश्च शरीरं च उपसमाधनञ्च निवासचितिशरीरोपसमाधानानि, तेषु निवासचितशरीरोपसमाधानेषु, इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - चेः (हस्तादाने चेरस्तेये), घञ् (पदरुजविशस्पृशो घञ्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - निवासः, चिति, शरीरः तथा उपसमाधानार्थे चिञ्-धातोः घञ्-प्रत्ययः तथा चकारस्य स्थाने ककारादेशः भवति।

**137. ड्वितः क्त्रिः |3|3|88||**

**138. क्त्रेर्मम् नित्यम् |4|4|20||**

क्त्रिप्रत्ययान्तान्मप् निर्वृत्तेऽर्थे। पाकेन निर्वृत्तं पक्त्रिमम्। डुवप् उप्त्रिमम्॥

**139. ट्वितोऽथुच् |4|4|20||**

टुवेपृ कम्पने, वेपथुः॥

**140. यजयाचयतविच्छप्रच्छरक्षो नङ् |3|3|90||**

यज्ञः। याच्ञा। यत्नः। विश्नः। प्रश्नः। रक्ष्णः॥

---

**रूपसिद्धिः - निकायः** - नि पूर्वक चिञ् चयने धातोः निवासचिति... सूत्रेण घञ् प्रत्यये तथा धातोः आदि चकारस्य स्थाने ककारे नि काय भवति वृद्धि तथा आवादेशे निकाय प्रातिपदिकत्वात् सु तथा सस्य रुत्वविसर्गे निकायः सिद्ध्यति।

**135. पदपरिचयः** - एः (प.ए.), अच् (प्र.ए)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इवर्णान्तधातुभ्यः अच्-प्रत्ययः भवति।

**रूपसिद्धिः - चयः** - चयनं चयः, इत्यत्र चिञ् धातोः एरच् सूत्रेण अच्-प्रत्यये कृते चि अ अत्र अ इति आर्धधातुकं मत्वा सार्वधातुकार्धातुकयोः सूत्रेण गुणे कृते चे अ भवति, अयादेशे कृते चय भवति। अत्र प्रातिपदिकत्वात् सु तथा सस्य रुत्वविसर्गे कृते चयः सिद्ध्यति। तथैव जि जये जयः सिद्ध्यति।

**136. पदपरिचयः** - ॠदोः (प.ए.), अप् (प्र.ए)।

**समासः** - ॠच्च उश्च ॠदुः, तस्माद् ॠदोः। समाहारसन्द्वेऽपि सौत्रं पुस्त्वम्।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ॠवर्णान्तधातुभ्यः तथा उवर्णान्तधातुभ्यः अप्-प्रत्ययः भवति।

**वार्तिकपदपरिचय** - घञर्थे (स.ए.), कविधानम् (प्र.ए.)।

**वार्तिकसमासः** - घञर्थस्तस्मिन् घञर्थे, षष्ठीतत्पुरुषः।

**रूपसिद्धिः - करः** - कॄ विक्षेपे, ॠदोरप् अनेन सूत्रेण अप् प्रत्यये तस्य आर्धधातुकसंज्ञा तथा फलरूपेण तस्य गुणे कृते कर अत्र प्रातिपदिकत्वात् सु तस्य विसर्गे कृते करः इति प्रयोगः साधुः। तथैव पूञ् पवने पवः। लूञ् छेदने लवः।

विपत्तिः। आपत्तिः॥ **प्रस्थः** - प्रतिष्ठितेऽस्मिन् धान्यानि, ष्ठा गतिनिवृत्तौ प्रपूर्वक स्था धातोः घञर्थे कविधानम् सूत्रेण कप्रत्यये कृते

प्र स्था अ भवति, आतो लोप इटि च सूत्रेण आकारस्य लोपे प्र स्थ अ इत्यत्र प्रातिपदिकत्वात् सु प्रत्यये तथा तस्य विसर्गे च कृते प्रस्थः सिद्ध्यति।

**विघ्न** - विहन्यतेऽस्मिन्, हन् हिंसागत्योः, वि पूर्वक हन् धातोः घञर्थे कविधानम् वार्तिकेन कप्रत्यये अनुबन्धलोपः वि हन् अ इत्यत्र गमहनजन... सूत्रेण उपधायाः अकारे लोपे वि हन् अ इत्यत्र हो हन्तेर्ञ्णिन्नेषु सूत्रेण कुत्वे कृते विघ्न प्रातिपदिकत्वात् सु तस्य विसर्गे च कृते विघ्नः इति सिद्ध्यति।

**141.स्वपो नन् | 3 | 3 | 91 ||**

स्वप्नः ॥

**142. उपसर्गे घोः किः | 3 | 3 | 92 ||**

प्रधिः। उपधिः ॥

**143. स्त्रियां क्तिन् | 3 | 3 | 94 ||**

स्त्रीलिङ्गे भावे क्तिन् स्यात्। घञोऽपवादः। कृतिः। स्तुतिः। (ॠल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः)। तेन नत्वम्। कीर्णिः। लूनिः। धूनिः। पूनिः। (सम्पदादिभ्यः क्विप्)। सम्पत् विपत् आपत् (क्तिन्नपीष्यते)। सम्पतिः। विपत्तिः। आपत्तिः ॥

---

**प्रस्थः** - प्रतिष्ठितेऽस्मिन् धान्यानि, ष्ठा गतिनिवृत्तौ प्रपूर्वक स्था धातोः घञर्थे कविधानम् सूत्रेण कप्रत्यये कृते

प्र स्था अ भवति, आतो लोप इटि च सूत्रेण आकारस्य लोपे प्र स्थ अ इत्यत्र प्रातिपदिकत्वात् सु प्रत्यये तथा तस्य विसर्गे च कृते प्रस्थः सिद्ध्यति।

**विघ्न** - विहन्यतेऽस्मिन्, हन् हिंसागत्योः, वि पूर्वक हन् धातोः घञर्थे कविधानम् वार्तिकेन कप्रत्यये अनुबन्धलोपः वि हन् अ इत्यत्र गमहनजन... सूत्रेण उपधायाः अकारे लोपे वि हन् अ इत्यत्र हो हन्तेर्ञ्णिन्नेषु सूत्रेण कुत्वे कृते विघ्न प्रातिपदिकत्वात् सु तस्य विसर्गे च कृते विघ्नः इति सिद्ध्यति।

**137. पदपरिचयः** - ड्वितः (प.ए.), क्त्रिः (प्र.ए)।

**समासः** - डु इद् यस्य स ड्वित्, तस्मात् = ड्वितः, बहुव्रीहिसमासः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - डकारेत्संज्ञकेभ्यः धातुभ्यः क्त्रिप्रत्ययः भवति।

**138. पदपरिचयः** - क्त्रेः (प.ए.), मप् (प्र.ए)।

**अनुवृत्तिः** - निवृत्ते (निवृत्तेऽक्षद्यूतादिभ्यः), तेन (तेन दिव्यति खनति जयति जितम्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - क्त्रिप्रत्ययान्तेभ्यः धातुभ्यः मप्-प्रत्ययः भवति, निवृत्यर्थे।

**रूपसिद्धिः - पक्त्रिमम्** - पाकेन निर्वृत्तम् इति पक्त्रमम्, डुपचष् पाके धातोः ड्वितः क्त्रिः सूत्रेण क्त्रिप्रत्यये कृते पच् क्त्र इति स्थिते। क्त्रेर्मन्मित्यम् सूत्रेण मप् प्रत्यये कृते पच् त्र म इत्यत्र चकारस्य कुत्वे प्रातिपदिकत्वात् सु तस्य स्थाने अमादेशे कृते पक्त्रिमम् इति रूपं सिद्ध्यति। **उप्त्रिमम्** इत्यत्र डुवप् बीजसन्ताने धातोः वचिस्व... सूत्रेण सम्प्रसारणे उप्त्रिममं सिद्ध्यति।

**139. पदपरिचयः** - ट्वितः (प.ए.), अथुच् (प्र.ए)।

**समासः** - टु इद् यस्य स ट्वित्, तस्मात् = ट्वितः, बहुव्रीहिसमासः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - टु-इत्संज्ञकात् धातोः अथुच्प्रत्ययः भवति, भावार्थे।

**रूपसिद्धिः - वेपुथुः** - टुवेपृ कम्पने, वेप् धातोः ट्वितोऽथुच् सूत्रेण अथुच् प्रत्यये कृते वेप् अथु इत्यत्र प्रातिपदिकत्वात् सु तस्य विसर्गे च कृते वेपथुः सिद्ध्यति।

**140.पदपरिचयः** - यज-याच-यत-विच्छ-प्रच्छ-रक्षः (प.ए.), नङ् (प्र.ए)।

**समासः** - यजश्च याजश्च यतश्च विच्छश्च प्रच्छश्च रक्ष् चेति समाहारद्वन्द्वः। तस्मात् यजयाचयतविच्छप्रच्छरक्षः।

**144. ऊतियूतिजूतिसातिहेतिकिर्तयश्च | 3 | 3 | 97 ||**

एते निपात्यन्ते।

**145. ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च | 6 | 4 | 20 ||**

एषामुपधावकारयोरूठ् अनुनासिके क्वौ झलादौ क्ङिति। अतः क्विप्। जूः। तूः। स्रूः। ऊः। मूः॥

**146. इच्छा | 3 | 3 | 101 ||**

इषर्निपातोऽयम्।

**147. अ प्रत्ययात् | 3 | 3 | 102 ||**

प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारः प्रत्ययः स्यात्। चिकीर्षा। पुत्रकाम्या।

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यज-याच-यत-विच्छ-प्रच्छ-रक्ष् एभ्यः नङ्-प्रत्ययः भवति।

**रूपसिद्धिः - यज्ञः** - यजनं यज्ञः, यज देवपूजासङ्गतिकरणदानेषु, यज्-धातोः यजयाचयत... सूत्रेण नङ् प्रत्यये अनुबन्धलोपे

यज् न इत्यत्र स्तोः श्चुना श्चुः अनेन श्चुत्वे ञकारे यज् ञ वर्णसम्मेलने यज्ञ प्रातिपदिकत्वात् विभक्तकार्ये कृते यज्ञः सिद्ध्यति। याच्ञा, टुयाचृ याच्ञायाम् पूर्ववत्, यत्नः, यतनं यत्नः पूर्ववत्। विश्नः - विच्छ् गतौ, यजयाच... सूत्रेण नङ् विच्छ् न इत्यत्र च्छ्वोः शूडनुनासिके... सूत्रेण शकारादेशे विश् न इत्यत्र स्तोः श्चुना श्चुः सूत्रेण चुत्वे प्राप्ते किन्तु शात् इत्यनेन सूत्रेण निषेधे प्रातिपदिकत्वात् सु तस्य विसर्गे च विश्नः इति सिद्ध्यति। तथैन प्रश्नः, प्रच्छ ज्ञीप्सायाम्। तथैव रक्षणं रक्ष्णः सिद्ध्यति।

**141. पदपरिचयः** - स्वपः (प.ए.), नन् (प्र.ए)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - स्वप्-धातोः नन्-प्रत्ययः भवति।

**रूपसिद्धिः - स्वप्नः** - स्वपनं स्वप्नः, ञिष्वप् शये धातोः (स्वप्) स्वपो नन् अनेन सूत्रेण नन् प्रत्यये स्वप् न इत्यत्र प्रातिपदिकत्वात् सु तथा तस्य विसर्गे च कृते स्वप्नः सिद्ध्यति।

**142. पदपरिचयः** - उपसर्गे (स.ए.), घोः (प.ए), किः (प्र.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उपसर्गे उपपदे घुसंज्ञकधातुभ्यः कि-प्रत्ययः भवति, भावाद्यर्थे।

**रूपसिद्धिः - प्रधीः** - प्रधीयन्ते काष्ठानि अस्मिन्निति प्रधिः, प्र उपसर्गपूर्वकं डुधाञ् धारणपोषणयोः धातोः उपसर्गे घोः किः सूत्रेण किप्रत्यये ककास्य लोपे, प्र धा इ इत्यत्र आतो लोप इटि च सूत्रेण आकास्य लोपे प्र ध् इ इत्यत्र प्रातिपदिकत्वात् सु प्रत्यये तस्य विसर्गे च कृते प्रधिः इति रूपं साधु। तथैव उपधिः।

**143. पदपरिचयः** - स्त्रियाम् (स.ए.), क्तिन् (प्र.ए)।

**अनुवृत्तिः** - भावे (भावे)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - धातुभ्यः क्तिन्-प्रत्ययः भवति, स्त्रीलिङ्गे।

**वार्तिकार्थः** - ॠकारान्तेभ्यः तथा ल्वादिधातुभ्यः क्तिन्-प्रत्ययः निष्ठावत् भवति।

**148. गुरोश्च हलः | 3 | 3 | 103 ||**

गुरुमतो हलन्तात् स्त्रियामकारः प्रत्ययः स्यात्। ईहा।

**149. ण्यासश्रन्थो युच् | 3 | 3 | 107 ||**

अकारस्यापवादः। कारणा। हारणा॥

**150. नपुंसके भावे क्तः | 3 | 3 | 114 ||**

**151. ल्युट् च | 3 | 3 | 115 ||**

हसितम्। हसनम्।

---

**वार्तिकार्थः** - संपदादिभ्यः क्विप्-प्रत्ययः भवति।

**वार्तिकार्थः** - संपदादिभ्यः क्तिन् अपि भवति।

**रूपसिद्धिः - कृतिः** - करणं कृतिः, कृधातोः स्त्रियां क्तिन् सूत्रेण क्तिन् प्रत्यये अनुबन्धलोपे च कृ ति इत्यत्र प्रातिपदिकत्वात् सु प्रत्यये तस्य विसर्गे च कृते कृतिः इति सिद्ध्यति। तथैव स्तुतिः, स्तवनं स्तुतिः (ष्टुञ् स्तुतौ)।

**कीर्णिः** - कॄ विक्षेपे इत्यत्र स्त्रियां क्तिन् अनेन सूत्रेण क्तिन् प्रत्यये कृते कॄ ति इत्यत्र ॠत इद्धातोः सूत्रेण इर् आदेशे किर् ति इत्यत्र हलि च सूत्रेण दीर्घे कीर्ति इत्यत्र ॠत्वादिभ्यः... सूत्रेण निष्ठावद्भावेन ल्वादिभ्यः सूत्रेण नाकारेदेशे कीर्नि इत्यत्र अट्कूप्वाङ्नु... सूत्रेण नकारस्य णकारे कृते कीर्णि प्रातिपदिकत्वात् सु प्रत्यये तस्य विसर्गे च कृते कीर्णिः इति रूपं साधु। तथैव लूनिः, लवनं लूनिः। धूनिः, धूञ् कम्पने।

**सम्पद्, सम्पत्** - सम् पूर्वक पद गतौ धातोः सम्पदादिभ्यः क्विप् सूत्रेण क्विप्-प्रत्यये सम्पद् क्विप् इत्यस्य सर्वप्रहारलोपः, प्रातिपदिकत्वात् सु प्रत्ये तस्य हल्ङ्याभ्यो... सूत्रेण सकारे लोपे कृते सम्पद् वाऽवसाने सूत्रेण चर्त्वे कृते सम्पत् इति रूपद्वयं साधुः। क्तिन्-प्रत्यये सम्पत्तिः, विपत्तिः, आपत्तिः।

**144. पदपरिचयः** - ऊति-यूति-जूति-साति-हेति-कीर्त्तयः (प्र.ब.), च (अव्ययपदम्)।

**समासः** - ऊति-यूति-जूति-साति-हेति-कीर्तयः, इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - उदात्त (मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ऊति, यूति, जूति, साति, हेति, कीर्तिः इमे सर्वे निपातनात् सिद्ध्यन्ति।

**145. पदपरिचयः** - ज्वर-त्वर-स्रिव्यवि-मवाम् (ष.ए.) उपधायाः (ष.ए.), च (अव्ययपदम्)।

**समासः** - ज्वरश्च त्वरश्च स्रिविश्च अविश्च मव् च ज्वर-त्वर-स्रिव्यवि-मवः, तेषाम् ज्वर-त्वर-स्रिव्यविमवाम्, इतरेतरद्वन्द्वः।

**अनुवृत्तिः** - वः, ऊठ्, अनुनासिके (च्छ्वोः शूड् अनुनासिके च), क्विझलोः, क्ङिति (अनुनासिकस्य क्वि-झलोः क्ङिति)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ज्वरादीनां धातूनाम् उपधायाः तथा वकारस्य स्थाने ऊठागमो भवति, अनुनासिकः तथा झलादि कित्-ङित्प्रत्ययौ परे स्याताम्।

**रूपसिद्धिः - जूः** ज्वरणं जूः, ज्वर् इत्यस्मात् सम्पदादिभ्यः क्विप् सूत्रेण क्विप् प्रत्यये सर्वपहारलोपे ज्वरत्वरस्रिव्य... सूत्रेण व् तथा अकारस्य स्थाने ऊठादेशे जूर् भवति। प्रातिपदिकत्वात् सु प्रत्यये तस्य लोपे कृते च जूर् इत्यस्य रेफस्य विसर्गे कृते जूः इति सिद्ध्यति। तथैव तूः त्वरणं तूः, ञित्वरा सम्भ्रमे। तथैव स्रूः, स्रवणं स्रूः। तथैन ऊः, अवनम्। मूः मवनम्।

**152. पुंसि संज्ञायां घः प्रायेण |3|3|118||**

**153. छादेर्घेऽद्व्युपसर्गस्य |6|4|96||**

द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वो घे परे। दन्ताश्छाद्यन्तेऽनेनेति दन्तच्छन्दः। आकुर्वन्त्यस्मिन्नित्याकरः।

**154. अवे तॄस्त्रोर्घञ् |3|3|120||**

अवतारः कूपादेः। अवस्तारो जवनिका।

**155. हलश्च |3|3|121||**

हलन्ताद् घञ्। घापवादः। रमन्ते योगिनोऽस्मिन्निति रामः। अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः।

---

**146. पदपरिचयः** - इच्छा (प्र.ए.)।

**अनुवृत्तिः** - स्त्रियाम् (स्त्रियां क्तिन्) भावे (भावे)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इष्-धातोः भावे श-प्रत्ययः भवति, यगभावः निपातनात् भवति।

**147. पदपरिचयः** - अ (प्र.ए.), प्रत्ययात् (प.ए.)।

**अनुवृत्तिः** - स्त्रियाम् (स्त्रियां क्तिन्) भावे (भावे)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - प्रत्ययान्तात् धातोः अकारप्रत्ययः भवति, स्त्रीलिङ्गे।

**रूपसिद्धिः** - **चिकीर्षा** - कर्तुमिच्छा चिकीर्षा, डुकृञ् करणे, कृ धातोः सन् भूत्वा चिकीर्ष स्थिते, अ प्रत्ययात् सूत्रेण अप्रत्यये तथा आर्धधातुकं शेषः अनेन आर्धधातुकसंज्ञायाम्, आतो लोपः सूत्रेण अकारस्य लोपे चिकीर्ष् अ इत्यत्र स्त्रीत्वविवक्षायां आत्वे कृते चिकीर्षा सिद्ध्यति।

**पुत्रकाम्या** - आत्मनः पुत्रस्यैषणम्, पुत्रकाम्य शब्दात् पूर्ववत्।

**148. पदपरिचयः** - गुरोः (प.ए.), च (अव्ययपदम्), हलः (प.ए.)।

**अनुवृत्तिः** - अ (अ प्रत्ययात्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - गुरुमान्-हलन्तात् धातोः स्त्रियाम् अ-प्रत्ययो भवति।

**रूपसिद्धिः** - **ईहा** - ईह चेष्टायाम्, ईह् इत्यस्मात् गुरोश्च हलः सूत्रेण अप्रत्यये ईह भवति, स्त्रीत्वविवक्षायां प्रत्ययोऽयं नियुक्तः अतः टाप् इत्यस्य आ अवशिष्यते स्वादिकार्ये ईहा सिद्ध्यति।

**149. पदपरिचयः** - णि-आस-श्रन्थः (प.ए.), युच् (प्र.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ण्यन्त, आस्, श्रन्थ एभ्यः धातुभ्यः स्त्रियां युच्प्रत्ययः भवति।

**रूपसिद्धिः** - **कारणा** - कृ धातोः णिच् प्रत्यये कारि भवति, अतः अ प्रत्ययात् सूत्रं बाधित्वा ण्यासश्रन्थो युच् सूत्रेण युच् प्रत्यये युकारस्य स्थाने युवोरनाकौ सूत्रेण अनादेशे कारि अन इत्यत्र णेरनिटि: सूत्रेण इकारस्य लोपे कार् अन इत्यत्र रषाभ्यां नो णः समानपदे सूत्रेण णकारे कृते स्त्रीत्वविवक्षायां कारणा इति सिद्ध्यति। तथैव हृ धातोः णिच् कृत्वा हारि भवति शेषं पूर्ववत्।

**150. पदपरिचयः** - नपुंसके (स.ए.), भावे (स.ए.), क्तः (प्र.ए.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**156. ईषद्दुस्सुषुः कृच्छ्राकृच्छ्रार्थेषु खल् | 3 | 3 | 121 ॥**

करणाधिकरयोरिति निवृत्तम्। एषु दुःखसुखार्थेषूपपदेषु खल्। तयोरेवेति भावे कर्मणि च। कृच्छ्रेदुष्करः कटो भवता। अकृच्छ्रे-ईषत्करः। सुकरः।

**157. आतो युच् | 3 | 3 | 128 ॥**

खलोऽपवादः। ईषत्पानः सोमो भवता। दुष्पानः। सुपानः।

**158. अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा | 3 | 4 | 18 ॥**

प्रतिषेधार्थयोरलंखल्वोरूपपदयोः क्त्वा स्यात्। प्राचां ग्रहणं पूजार्थम्। अमैवाऽव्ययेन (2.2.2.) इति नियमान्नोपपदसमासः। दो दद् घोः (827) अलं दत्त्वा। घुमास्था (588) इतीत्त्वम् - पीत्वा खलु। अलंखल्वोः किम् ? मा कार्षीत्। प्रतिषेधयोः किम् ? अलंकारः॥

---

**सरलार्थः** - नपुंसकलिङ्गे भावे धातोः क्त-प्रत्ययो भवति।

**151. पदपरिचयः** - ल्युट् (प्र.ए.), च (अव्ययपदम्)।

**अनुवृत्तिः** - नपुंसके, भावे (नपुंसके भावे क्तः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - धातुभ्यः ल्युट्-प्रत्ययः भवति, नपुंसकलिङ्गे भावे।

**रूपसिद्धिः** - **हसितम्** - हस् धातोः नपुंसके भावे क्तः सूत्रेण क्त-प्रत्यये हस् त भवति अत्र तकारस्य आर्धधातुकसंज्ञांयाम् इडागमे कृते हस् इ त भवति, प्रातिपदिकत्वात् सु प्रत्यये तस्य अमादेशे कृते हसितम् सिद्ध्यति। हसनम् इत्यत्र ल्युट् अनेन ल्यु भूत्वा अनादेशे स्वादिकार्ये हसनम् सिद्ध्यति।

**152. पदपरिचयः** - पुंसि (स.ए.), संज्ञायाम् (स.ए.), घः (प्र.ए.), प्रायेण (तृ.ए.)।

**अनुवृत्तिः** - करणाधिकरणयोः (करणाधिकरणयोः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - धातुभ्यः घप्रत्ययः भवति, पुंल्लिङ्गे, संज्ञायां बहुलेन।

**153. पदपरिचयः** - छादेः (ष.ए.), घे (स.ए.), अद्व्युपसर्गस्य (ष.ए.)।

**समासः** - द्वौ उपसर्गो यस्य स द्व्युपसर्गः बहुव्रीहिः। न द्व्युपसर्गः, अद्व्युपसर्गः, नञ्समासः।

**अनुवृत्तिः** - खचि (खचि ह्रस्व), णौ (दोषो णौ), उपधायाः (उदुपधायाः गोहः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - द्विप्रभृत्युपसर्गरहितेभ्यः छादिधातोः ह्रस्वः भवति, घपरे स्यात् तदा।

**रूपसिद्धिः** - **दन्तच्छदः** - दन्ताश्छाद्यन्तेऽनेन। छद आवरणे ततः णिच् जाते छादि भवति, अस्य धातुसंज्ञा, पुंसि संज्ञायां घः प्रायेण सूत्रेण घप्रत्यये णेरनिटि सूत्रेण इकारलोपे छाद् अ इत्यत्र दन्तपूर्वप्रयोगे दन्तछाद छे च सूत्रेण तुकागमे कृते तकारस्य श्चुत्वे दन्तच्छाद इत्यत्र छादेर्घेद्व्युपसर्गस्य सूत्रेण आकारस्य अकारे दन्तच्छद प्रातिपदिकत्वात् सु प्रत्यये तस्य विसर्गे च कृते दन्तच्छदः इति रूपं साधु।

**आकरः** - आकुर्वन्त्यस्मिन्, आ पूर्वक कृ धातोः पुंसि संज्ञायां... सूत्रेण घप्रत्यये आ कृ अ इत्यत्र, आर्धधातुकसंज्ञा तथा ऋकारस्य गुणे आकर् अ इत्यत्र प्रातिपदिकत्वात् सु प्रत्यये तस्य विसर्गे च कृते आकरः इति रूपं साधु।

**154. पदपरिचयः** - अवे (स.ए.), तृ-स्त्रोः (ष.द्वि.)।

**समासः** - तृ च स्तृ च = तृस्त्रौ, तयो = तृस्त्रोः, इतरेतरद्वन्द्वः।

**159. समानकर्तृकयोः पूर्वकाले | 3 | 4 | 21 ||**

समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। भुक्त्वा व्रजति। द्वित्वमतन्त्रम्। भुक्त्वा पीत्वा व्रजति।

**160. न क्त्वा सेट् | 1 | 2 | 18 ||**

सेट् क्त्वा किन्न स्यात्। शयित्वा। सेट् किम् ? कृत्वा।

**161. रलो व्युपधाद्धलादेः सश्च | 1 | 2 | 26 ||**

इवर्णोवर्णोपधाद्धलादेः रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः। द्युतित्वा, द्योतित्वा। लिखित्वा, लेखित्वा। व्युपधात् किम् ? वर्तित्वा। रलः किम् ? सेवित्वा। हलादेः किम् ? एषित्वा। सेट् किम् ? भुक्त्वा।

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अवोपपदे सति तॄ तथा स्तॄ धातोः करणार्थे तथा अधिकरणार्थे घञ्-प्रत्ययः भवति, संज्ञायां पुंल्लिङ्गे।

**रूपसिद्धिः - अवतारः** - अवतरन्त्यनेन, तॄ प्लवनसन्तरणयोः, अव तॄ अवे तृस्त्रोर्घञ् प्रत्यये, अव तॄ घञ् इत्यत्र, अचो ञ्णिति सूत्रेण ऋकारस्य वृद्धौ आर् कृते अव तार् अ इत्यत्र प्रातिपदिकत्वात् सु प्रत्यये तस्य विसर्गे च कृते अवतारः इति रूपं साधु। तथैव अवस्तारः, अवस्तीर्यन्तेऽनेन, स्तृञ् आच्छादने।

**155. पदपरिचयः** - हलः (प.ए.), च (अव्ययपदम्)।

**अनुवृत्तिः** - करणाधिकरणयोः (करणाधिकरणयोश्च)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - हलन्तात् धातोः घञ्-प्रत्ययः भवति, करणार्थे तथा अधिकरणार्थे।

**रूपसिद्धिः - रामः** - रमन्ते योगिनोऽस्मिन् इति रामः, रमु क्रीडायाम्, इत्यत्र हलश्च सूत्रेण घञ् प्रत्यये कृते, रम् घ इत्यत्र अत उपधायाः सूत्रेण आदिवृद्धौ राम् अ इत्यत्र प्रातिपदिकत्वात् सु प्रत्यये तस्य विसर्गे च कृते रामः इति रूपं साधु।

**अपामार्गः** - अपमृज्यते व्याध्यादिरनेन इति अप उपसर्गपूर्वक मृज् शुद्धौ धातोः शेषं पूर्ववत्।

**156. पदपरिचयः** - ईषद्दुःसुषु (स.व.), कृच्छ्राऽकृच्छ्रार्थेषु (स.ब.) खल् (प्र.ए.)।

**समासः** - ईषत् च दुश्च सु ईषद्-दुः-सवः, तेषु = ईषद्दुःसुषु, इतरेतरद्वन्द्वः। न कृच्छ्रम् इति अकृच्छ्रम् नञ्तत्पुरुषः। कृच्छ्रञ्च अकृच्छ्रं च कृच्छ्राकृच्छ्रे, कृच्छ्राकृच्छ्रे अर्थौ येषां ते कृच्छ्राकृच्छ्रार्थाः, तेषु = कृच्छ्राकृच्छ्रेर्थेषु, द्वन्द्वगर्भबहुव्रीहिसमासः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - दुःखार्थकः तथा सुखार्थकः ईषत्-दुस्-सु उपपदे परे सति कृच्छ्र तथा अकृच्छ्रार्थे धातोः खल्-प्रत्ययः भवति।

**रूपसिद्धिः - दुष्करः** - दुस् पूर्वक कृधातोः ईषद्दुस्सुषु... सूत्रेण खल् प्रत्यये दुस् कृ खल्-इत्यत्र आर्धधातुकत्वात् गुणे कृते दुस् कर् अ इत्यत्र प्रातिपदिकत्वात् सु प्रत्यये तस्य विसर्गे च कृते दुष्करः सिद्ध्यति। तथैव ईषत्करः सुकरश्च सिद्ध्यतः।

**157. पदपरिचयः** - आतः (प.ए.), युच् (प्र.ए.)।

**अनुवृत्तिः** - ईषद्दुःसुषु, कृच्छ्राऽकृच्छ्रार्थेषु

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - आदन्तात् धातोः युच्-प्रत्ययः भवति, ईषदादिषु उपपदेषु।

**162. उदितो वा | 7 | 2 | 26 ||**

उदितः परस्य क्त्व इड् वा। शमित्वा, शान्त्वा। देवित्वा, द्यूत्वा। दधातेर्हिः, हित्वा।

**163. जहातेश्च क्त्वि | 7 | 4 | 43 ||**

हित्वा। हाङस्तु – हात्वा।

**164. समासेऽनञ्पूर्वे क्त्वो ल्यप् | 7 | 1 | 37 ||**

अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात्। तुक्। प्रकृत्य। अनञ् किम् ? अकृत्वा।

---

**रूपसिद्धिः – दुष्पानः** – दुःखेन पीयते इति दुष्पानः, दुस् उपसर्गपूर्वक पा पाने इत्यस्मात् धातोः, आतो युच् सूत्रेण युच् प्रत्यये कृते दुस् पा यु इत्यत्र युवोरनाकौ सूत्रेण अनादेशे दुस् पा अन इत्यत्र सवर्णे दीर्घे कृते दुष्पानः सिद्ध्यति। तथैव सुपानः।

**158. पदपरिचयः** – अलंखल्वोः (स.द्वि.), प्रतिषेधयोः (स.द्वि.), प्राचाम् (ष.ब.), क्त्वा (कृत्प्रत्ययः)।

**समासः** – अलं च खलु च अलंखलू, तयोः = अलंखल्वोः, इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – निषेधार्थक अलं तथा खलु उपपदे सति धातुभ्यः क्त्वा-प्रत्ययः भवति।

**रूपसिद्धिः – अलं दत्वा** – अलं पूर्वकं दा धातोः, अलंखल्वोः प्रतिषेधयोः... सूत्रेण क्त्वा प्रत्यये, अलम् दा क्त्वा इत्यत्र दो दद् घोः अनेन दा इत्यस्य स्थाने दद् आदेशे तथा दकारस्य स्थाने चर्त्वेन दत् त्वा भवति, अव्ययत्वात् अव्ययादाप्सुपः सूत्रेण सु इत्यस्य लोपं विधाय अलं दत्त्वा भवति। तथैव पीत्वा खलु।

**159. पदपरिचयः** – समानकर्तृकयोः (ष.द्वि.), पूर्वकाले (स.ए.), क्त्वा (प्र.ए.)।

**समासः** – समानः कर्ता ययोस्तौ समानकर्तृकौ, तयोः = समानकर्तृकयोः, बहुव्रीहिसमासः।

**अनुवृत्तिः** – क्त्वा (अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – समानकर्तृकधात्वर्थे पूर्वकालिकक्रियायां विद्यमानेभ्यः धातुभ्यः क्त्वा-प्रत्ययः भवति।

**रूपसिद्धिः – भुक्त्वा व्रजति** – भुज् धातोः समानकर्तृकयोः पूर्वकाले इति सूत्रेण क्त्वा प्रत्यये भुज् क्त्वा इत्यत्र चोः कुः सूत्रेण जकारस्य स्थाने गकारे भुग् त्वा इत्यत्र खरि च सूत्रेण चर्त्वे ककारे भुक्त्वा अव्ययत्वात् सु इत्यस्य लोपकार्यं कृत्वा भुक्त्वा व्रजति सिद्ध्यति। तथैव पीत्वा व्रजति।

**160. पदपरिचयः** – न (अव्ययपदम्), क्त्वा (प्र.ए.), सेट् (प्र.ए.)।

**समासः** – इटा सह वर्त्तत इति सेट्, बहुव्रीहिसमासः।

**अनुवृत्तिः** – कित् (असंयोगाल्लिट् कित्)

**सूत्रप्रकारः** – विधिसूत्रम्।

**सरलार्थः** – सेट् क्त्वा-प्रत्ययः, कित् न भवति।

**रूपसिद्धिः – शयित्वा** – शीङ् स्वप्ने, शी धातोः समानकर्तृकयोः पूर्वकाले सूत्रेण क्त्वा प्रत्यये, इडागमे च शी इत्वा इत्यत्र न क्त्वा सेट् अनेन सूत्रेण अकिद्वद्भावे अतः क्ङिति च सूत्रेण गुणस्य निषेधो न अतः सार्वधातुकार्धधातुकयोः अनेन गुणे एकारे अयादेशे कृते शय् इत्वा इत्यत्र वर्मसम्मेलने कृते शयित्वा इति रूपं सिद्धम्।

**161. पदपरिचयः** – रलः (प.ए.), व्युपधात् (प.ए.), हलादेः (प.ए.), सन् (प्र.ए.), च (अव्ययपदम्)।।

**अनुवृत्तिः** – क्त्वा (पूङः क्त्वा च), सेट् (न क्त्वा सेट्), वा (नोपधात्थफान्ताद्वा), कित् (असंयोगाल्लिट् कित्)।

**165. आभीक्ष्ण्ये णमुल् च |3|4|22||**

आभीक्ष्ण्ये द्योत्ये पूर्वविषये णमुल् स्यात्, क्त्वा च॥

**166. नित्यवीप्सयोः |8|1|4||**

आभीक्ष्ण्ये वीप्सायां च द्योत्ये पदस्य द्वित्वं स्यात्। आभीक्ष्ण्यं तिङन्तेषु अव्ययसंज्ञकेषु च कृदन्तेषु च। स्मारं स्मारं नमति शिवम्। स्मृत्वा स्मृत्वा वा। पायम्पायम्। भोजम्भोजम्। श्रावं श्रावम्।

**167. अन्यथैवंकत्थमित्थंसु सिद्धाप्रयोगश्चेत् |3|4|27||**

एषु कृञो णमुल् स्यात्, सिद्धोऽप्रयोगोऽस्य एवम्भूतश्चेत् कृञ्। व्यर्थत्वात्प्रयोगानर्ह इत्यर्थः। अन्यथाकारम्। एवङ्कारम्। कथङ्कारम्। इत्थङ्कारम् भुङ्क्ते सिद्धेति किम् ? शिरोऽन्यथा कृत्वा भुङ्कते।

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - इवर्णोपधात् उवर्णोपधात् तथा हलादिधातुभ्यः परे सेट् क्त्वा तथा सन् प्रत्ययः विकल्पेन कित् भवति।

**रूपसिद्धिः - द्युतित्वा, द्योतित्वा** - द्युत दीप्तौ, द्युत् अत्र क्त्वा भूत्वा इडागमश्च कृत्वा द्युत् इत्वा इत्यत्र रलो व्यपधाद्धलादे... सूत्रेण विकल्पेन क्त्वा-प्रत्ययस्य क्त्विवद्भावे ततः गुणाभावे च द्युतित्वा सिद्ध्यति। यत्र विकल्पेन कित्वद्भावो न क्रियते तदा पुगन्तलघुपधस्य च सूत्रेण गुणो भूत्वा द्योतित्वा सिद्ध्यति। तथैव लिखित्वा, लेखित्वा च। लिख अक्षरविन्यासे।

**162. पदपरिचयः** - उदितः (प.ए.), वा (इत्यव्ययपदम्)।

**समासः** - उत् इत् यस्य स उदित्, बहुव्रीहिसमासः।

**अनुवृत्तिः** - क्त्वः (जॄव्रश्च्योः क्त्वि सूत्रेण विभक्तिविपरीणामद्वारा), इट् (वसतिक्षुधोरिट्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - उदित्-धातोः परे क्त्वाप्रत्ययस्य इडागमो भवति, विकल्पेन।

**रूपसिद्धिः - शमित्वा, शान्त्वा** - शमु उपशमे धातोः, समानकर्तृकयोः पूर्वकाले सूत्रेण क्त्वा प्रत्यये उदितो वा सूत्रेण विकल्पेन इडागमे शम् इत्वा वर्णसम्मेलने शमित्वा भवति। शम् क्त्वा इत्यत्र अनुनासिकस्य क्विझलोः ङिति सूत्रेण उपधादीर्घे तथा मकारस्य परसवर्णानुस्वारे कृते शान्त्वा भवति। तथैव देवित्वा तथा द्यूत्वा अपि सिद्ध्यतः।

**163. पदपरिचयः** - जहातेः (ष.ए.), च (अव्ययपदम्), क्त्वि (स.ए.)।

**अनुवृत्तिः** - हि (दधातेर्हिः)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - ओहाक्-धातोः हि आदेशः भवति, क्त्वाप्रत्ययः परे स्यात् तदा।

**रूपसिद्धिः - हित्वा** - ओहाक् त्यागे, अनुबन्धलोपे हा अवशिष्यते, समानकर्तृ... सूत्रेण क्त्वा प्रत्यये कृते हा क्त्वा इत्यत्र जहातेश्च क्त्वि सूत्रेण हा इत्यस्य स्थाने हि आदेशे हित्वा सिद्ध्यति।

**164. पदपरिचयः** - समासे (स.ए.), अनञ्पूर्वे (स.ए.), क्त्वः (ष.ए.), ल्यप् (प्र.ए.)।

**समासः** - न नञ् अनञ्, अनञ् पूर्वं यस्मिन् स अनञ्पूर्वः, तस्मिन् नञ्तत्पुरुषसमासः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - यस्मिन् समासे पूर्वपदे नञ् एतस्मात् किमपि भिन्नम् अव्ययं भवति चेत्, तस्मिन् समासे धातोः परे क्त्वा इत्यस्य स्थाने ल्यप् भवति।

**रूपसिद्धिः - प्रकृत्य** - प्र पूर्वक कृ धातोः समानकर्तृकयोः पूर्वकाले सूत्रेण क्त्वा प्रत्यये प्र कृ त्वा इत्यत्र समासेऽनञ्पूर्वे क्त्वो ल्यप् सूत्रेण क्त्वा स्थाने ल्यबादेशे अनुबन्धेलोपे प्र कृ य इत्यत्र ह्रस्वस्य पिति कृति तुक् अनेन तुकागमे अनुबन्धलोपे च प्रकृत्य इति रूपं सिद्धम्।

**165. पदपरिचयः** - आभीक्ष्ण्ये (स.ए.), णमुल् (प्र.ए.), च (अव्ययपदम्)।

**अनुवृत्तिः** - पूर्वकाले (समानकर्तृकयोः पूर्वकाले), क्त्वा (अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - समानकर्तृकयोः द्वयोः क्रियापदयोः पूर्वकालिकधातोः णमुल् तथा क्त्वा प्रत्ययः भवति। क्रिया बहुवारं भवति तदा।

**166. पदपरिचयः** - नीत्यवीप्सयोः (स.द्वि.), पदस्य (ष.ए.)।

**समासः** - नित्यं च वीप्सा च नित्यवीप्से, तयोः = नित्यवीप्सयोः, इतरेतरद्वन्द्वः।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - आभीक्ष्ण्यं तथा वीप्सार्थयोः प्रतीमानत्वे सति पदस्य द्वित्वं भवति।

**रूपसिद्धिः - स्मारं स्मारं नमति शिवम्** - स्मृ चिन्तायाम्, आभीक्ष्ण्यं णमुल् च सूत्रेण णमुल् भूत्वा अनुबन्धलोपे कृते स्मृ अम् इत्यत्र अचो ञ्णिति सूत्रेण वृद्धौ स्मार् अम् इत्यत्र प्रातिपदिकत्वात् सु तस्य लोपे कृते नित्यवीप्सयोः सूत्रेण स्मारम् इत्यस्य द्वित्वे कृते स्मारं स्मारम् इति सिद्ध्यति। क्त्वा पक्षे तु स्मृत्वा स्मृत्वा भवति।

**167. पदपरिचयः** - अन्यथैवं-कत्थम्-इत्थंसु (स.ब.), सिद्धाप्रयोगः (प्र.ए.), चेत् (अव्ययपदम्)।

**समासः** - अन्यथा च एवं च कथं च इत्थं च तेषामितरेतरद्वन्द्वः।

**अनुवृत्ति** - कृञः (कर्मण्याक्रोशे कृञः खमुञ्), णमुल् (स्लादुमि णमुल्)

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अन्यथा, एवम्, कथम् उपपदेषु कृञ्धातोः णमुल्-प्रत्ययः भवति, कृञ्-प्रयोगस्य अर्थे।

**रूपसिद्धिः - अन्यथाकारं भुङ्क्ते** - कृ धातोः, अन्यथैवंकथमित्थंसु... सूत्रेण णमुल्प्रत्यये अन्यथा कृ अम् वृद्धौ कृते अन्यथा कारम् इत्यत्र मकारन्तः कृदन्तः अव्ययसंज्ञकः भवति तस्मात् कारणात् विभक्तिकार्ये तस्य लोपे च अन्यथाकारं भुङ्क्ते सिद्ध्यति। तथैव एवङ्कारः, कथङ्कारः, इत्थङ्कारः इत्यादीनि रूपाणि सिद्ध्यन्ति।

## स्वाध्यायः

**1. विकल्पं चित्वा रित्कस्थानं पूरयत।**

(1) कृष्णं ......... याति। (द्रष्टः, द्रष्टो, द्रष्टुम्)

(2) कालसमयवेलासु .........। (तुमुन्, णिच्, अच्)

(3) वेपथुः कस्य सूत्रस्योदाहरणम्। (स्वपो नन्, ट्वितोऽथुच्, एरच्)

(4) स्त्रिलिङ्गे ......... क्तिन् भवति। (कर्मणि, भावे, कर्तरि)

(5) हसनम् इत्यत्र कः प्रत्ययः। (ल्युट्, ण्वुल्, अच्)

(6) रामः इत्यत्र घञ्-प्रत्ययः केन भवति। (इच्छा, अ प्रत्ययात्, हलश्च)

(7) खलस्यापवादं किम् सूत्रम्। (आतो युच्, ल्युट् च, उदितो वा)

**2. लघूत्तराण देयानि।**

(1) चयः इत्यत्र मूलधातुः कः ?

(2) शयित्वा इत्यत्र कः प्रत्ययः ?

(3) स्तुतिः इत्यस्य विग्रहः कः ?

(4) प्रकृत्य इत्यत्र मूलप्रत्ययः कः ?

(5) चिकीर्षा अस्य विग्रहं लिखत।

**3. अधोनिर्दिष्टानि रूपाणि साधयत।**

(1) कृष्णं दर्शको याति।

(2) स्वप्नः।

(3) रामः।

(4) अवतारः।

(5) शयित्वा।

**4. अधोनिर्दिष्टनां सूत्राणां सोदाहरणमर्थं लिखत।**

(1) धञि च भावकरणयोः।

(2) जरत्वरस्त्रिव्यविमवामुपधायाश्च।

(3) ण्यासश्रन्थो युच्।

(4) आतो युच्।

(5) ल्युट् च।

**5. अधोलिखितानां प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) निवासचिति... इति सूत्रं प्रपूर्य सार्थोदाहरणानि लिखत।

(2) यजयाचयचविच्छ... इति सूत्रं प्रपूर्य उदाहरणानाम् अर्थं लिखत।

(3) अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा इति सूत्रस्य प्रयोगाणां सिद्धिं कुरुत।

●

# १४ विभक्त्यर्थप्रकरणम्

**प्रस्तावना**

क्रमवतां वर्णनां समूहः पदम्। पदसमूहः वाक्यम्। अभीप्सितम् अर्थं बोधयति, अतः शब्दप्रपञ्चे वाक्यमेव प्राधान्यम् आवहति। वाक्यादेव अर्थपरिसमाप्तेः दर्शनात्। किन्तु पदं विना वाक्यं न भवति। वर्णेभ्यः विना पदं नास्ति। अतः व्याकरणे वर्णनिमित्तानि कार्याणि पदनिमित्तानि कार्याणि च सन्ति। प्रायः सन्धिकार्याणि वर्णनिमित्तानि। समासादीनि कार्याणि पदनिमित्तानि। वाक्यम् अवलम्ब्य प्रवृत्तानि भवन्ति कारकाणि, कारकसम्बन्धीनि कार्याणि च। साक्षात् परम्परया वा वाक्यानि संस्कर्तुम् एव व्याकरणं प्रवृत्तम्।

---

**168. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा | 2 | 3 | 46 ||**

नियतोपस्थितिकः प्रातिपदिकार्थः। मात्रशब्दस्य प्रत्येकं योगः प्रातिपदिकार्थमात्रे लिङ्गमात्राद्याधिक्ये परिमाणमात्रे संख्यामात्रे च प्रथमा स्यात्। प्रातिपदिकार्थमात्रे-उच्चैः। नीचैः। कृष्णः। श्रीः। ज्ञानम्। लिङ्गमात्रे-तटः, तटी, तटम्। परिमाणमात्रे-द्रोणो व्रीहिः। वचनं संख्या। एकः द्वौ, बहवः।

**169. सम्बोधने च | 2 | 3 | 47 ||**

प्रथमा स्यात्। हे राम। इति प्रथमा।

**170. कर्तुरीप्सिततमं कर्म | 1 | 4 | 49 ||**

कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात्॥

---

**168. पदपरिचयः** - ''प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे'' (स.ए.व.), ''प्रथमा'' (प्र.ए.व.)

**सूत्रसमासः** - प्रातिपदिकस्य अर्थः प्रातिपदिकार्थः, (षष्ठीतत्पुरुषः)॥ प्रातिपदिकार्थं च, लिङ्गं च, परिमाणं च, वचनं च, प्रातिपदिकार्थलिङ्गपरिमाणवचनम् (समाहारः द्वन्द्वः) प्रातिपदिकार्थलिङ्परिमाणवचनं च अदः मात्रं च, प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रम्, तस्मिन् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे (कर्मधारयतत्पुरुषः)।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - प्रातिपदिकार्थमात्रे, लिङ्गमात्रे, परिमाणमात्रे संख्यामात्रे च प्रथमा विभक्तिः भवति।

**विशेषार्थः** - नियता उपस्थितिर्यस्यासौ नियतोपस्थितिकः यस्मिन् प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेन उपस्थितिः सः प्रतिपदिकार्थः उच्चैरित्यत्र उच्चाधिकरणस्य, नीचैरित्यत्र अधोधिकरणस्य, कृष्णरित्यत्र पुंस्त्वविशिष्टवासुदेवरूपाख्यस्य, श्रीरित्यत्र स्त्रीत्वविशिष्टलक्ष्मीरूपार्थस्य, ज्ञानमित्यत्र क्लीबत्वविशिष्टान्तः प्रकाशरूपस्य च भानम्। तस्मात्तेषु तेऽर्थाः नियतोपस्थितिकाः तत्रार्थे (प्रातिपदिकार्थे) प्रथमा।

**169. पदपरिचयः** - ''सम्बोधने'' (स.ए.व.), ''च'' (अव्य.)।

**अनुवृत्तिः** - प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा इत्यनुवर्तते।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - सम्बोधनेऽपि प्रथमा विभक्तिर्भवति।

**विशेषार्थः** - हे राम ! इत्यत्र सम्बोधने अर्थे प्रथमा विभक्तिर्भवति।

**170. पदपरिचयः** - ''कर्तुः'' (ष.ए.व.), ''ईप्सिततमम्'' (प्र.ए.व.), ''कर्म'' (प्र.ए.व.)।

**सूत्रप्रकारः** - संज्ञासूत्रम्

**171. कर्मणि द्वितीया |2|3|2||**

अनुक्ते कर्मणि द्वितीया स्यात्। हरिं भजति। अभिहिते तु कर्मादौ प्रथमा-हरिः सेव्यते। लक्ष्म्या सेवितः।

**172. अकथितं च |1|4|51||**

अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।

दुह्याच्-पच्-दण्ड्-रूधि-प्रच्छि-चि-ब्रू-शासु-जि-मथ्मुषाम्।

कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ॥ १ ॥

गां दोग्धि पयः। बलिं याचते वसुधाम्। तण्डुलानोदनं पचति। गर्गान् शतं दण्डयति। व्रजमवरुणद्धि गाम्। माणवकं पन्थानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरनिधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति हरति कर्षति वहति वा। अर्थनिबन्धनेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि॥ इति द्वितीया।

---

**सरलार्थः** - कर्ता क्रियया विशेषरूपेण प्राप्तुमिच्छति तस्य कारकस्य कर्मसंज्ञा भवति।

**विशेषार्थः** - कर्तुरीप्सिततमं कर्म इत्यस्य समन्वयो **हरिं भजति** इति (देवदत्तः इति शेषः)। अत्र देवदत्तः कर्ता, तद्वृत्तिक्रिया प्रात्यनुकूलव्यापाररूपा, तया (क्रियया) आप्तु मिष्टतमम् इच्छोद्देश्यं हरिपदरूपं कारकं तस्य कर्मसंज्ञा। ततश्च कर्मणि द्वितीया। अतिशयेन ईप्सितम् ईप्सिततमम्।

**171. पदपरिचयः** - ''कर्मणि'' (स.ए.), ''द्वितीया'' (प्र.ए.व.)।

**सूत्रप्रकारः** - विधिसूत्रम्

**सरलार्थः** - अनुक्ते कर्मणि द्वितीयाविभक्तिः भवति।

**विशेषार्थः** - न अभिहितम् (उक्तम्) अनभहितम् तस्मिन् - अनभिहिते कर्मादौ प्रथमा।

**रूपसिद्धिः** - **हरिं भजति।** अस्मिन् भक्तः हरिं भजनक्रियया प्राप्तुं प्रसन्नकर्तुम् इच्छति अतः हरिः कर्तुः ईप्सिततमः, तेन कारणेन '**कर्तुरीप्सिततमं कर्म**' इति सूत्रेण कर्मसंज्ञायाम् '**कर्मणि द्वितीया**' इति सूत्रेण द्वितीयाविभक्तौ स्वादिकार्ये हरिं भजति इति सिद्धम्।

**लक्ष्म्या हरिः सेवितः** - इत्यत्र तु सेवनक्रियायाः कर्त्री लक्ष्मीः अस्ति। लक्ष्म्यै हरिः ईप्सिततमः अतः 'कर्तुरीप्सितमं कर्म' इति सूत्रेण कर्मसंज्ञायाम् किन्तु सति कर्मणि अपि तिङ्द्वारा उक्तम् अस्ति सेवितः इत्यत्र 'तयोरेवकृत्य' इत्यनेन कर्मणि क्तप्रत्ययः उक्तः अतः उक्ते न द्वितीया।

**172. पदपरिचयः** - ''अकथितम्'' (प्र.ए.व.), ''च'' (अव्य.)।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**समासः** - न कथितम् इति अकथितम् (नञ्तत्पु.)।

**सरलार्थः** - अकथितम् अपादानादिकारकैः च अनुक्तं यत् कारकं, तत् कर्मसंज्ञं भवति।

**विशेषार्थः** - गां दोग्धि पयः - इत्यत्र गो इति अपादानम् तथा 'पयः' इति ईप्सिततमं कर्म अस्ति। परन्तु वक्ता यदि अपादानत्वस्य विवक्षया अप्रवृत्तः चेत् प्रकृतसूत्रेणैव गो इत्यस्य कर्मसंज्ञायाम् 'कर्मणि द्वितीया' इत्यनेन द्वितीयाविभक्तौ गां दोग्धि पयः इति सिद्धम्।

**अर्थनिबन्धना इयं संज्ञा** - अर्थं निमित्तीकृत्वा भवति। तात्पर्यमिदमस्ति यत् सूत्रद्वारा प्रतिपादिता कर्मसंज्ञा केवलं दुह्आदिधातुभ्यः न अपि च समानार्थकेभ्यो धातुभ्यो भवति।

**173. स्वतन्त्रः कर्ता |1|4|54||**

क्रियायां स्वातन्त्रेण विवक्षतोऽर्थः कर्ता स्यात्॥

**174. साधकमं करणम् |1|4|42||**

क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्।

---

| कर्तृवाच्य | कर्मवाच्य |
|---|---|
| 1. (सः) गां दोग्धि पयः। | 1. (तेन) गौर्दुह्यते पयः। |
| 2. बलिं याचते वसुधाम्। | 2. बलिर्याच्यते वसुधाम्। |
| 3. तण्डुलानोदनं पचति। | 3. तण्डुला ओदनं पच्यन्ते |
| 4. गर्गान् शतं दण्डयति। | 4. गर्गाः शतं दण्डयन्ते। |
| 5. व्रजमवरूणद्धि गाम्। | 5. व्रजोऽवरीध्यते गाम्। |
| 6. माणवकं पन्थानं पृच्छति। | 6. माणवकः पन्थानं पृच्छ्यते। |
| 7. वृक्षमवचिवोति फलानि। | 7. वृक्षोऽवचीयते फलानि। |
| 8. माणवकं धर्मं शास्ति। | 8. माणवको धर्मं शिष्यते। |
| 9. माणवकं धर्मं ब्रूते | 9. माणवको धर्मं उच्यते। |
| 10. शतं जयति देवदत्तम्। | 10. शतं जीयते देवदत्तः। |
| 11. सुधां क्षीरनिधिं मथ्नाति। | 11. सुधां क्षीरनिधिर्मथ्यते। |
| 12. देवदत्तः शतं मुष्णाति। | 12. देवदत्तः शतं मुष्यते। |
| 13. ग्राममजां नयति। | 13. ग्रामम् अजा नीयते। (प्रधाने कर्मणि) |
| 14. ग्राममजां हरति। | 14. ग्रामम् अजा हियते। (प्रधाने कर्मणि) |
| 15. ग्राममजां कर्षति। | 15. ग्रामम् अजा कृष्यते। (प्रधाने कर्मणि) |
| 16. ग्राममजां वहति। | 16. ग्रामम् अजा उह्यते। (प्रधाने कर्मणि) |

**173. पदपरिचयः** - ''स्वतन्त्र'' (प्र.ए.व.), ''कर्ता'' (प्र.ए.व.)।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**अनुवृत्तिः** - कारके इति सूत्रात् **कारकम्** इति अनुवर्तते।

**समासः** - स्वं तन्त्रं यस्य स स्वतन्त्रः (बहु.)

**सरलार्थः** - क्रियायां स्वातन्त्र्येण विवक्षितस्य कारकस्य कर्तसंज्ञा भवति।

**विशेषार्थः** - सूत्रमिदं कर्तृसंज्ञा विधायकमस्ति। कर्ता क्रियायाः आधारभूतो गण्यते।

**173. पदपरिचयः** - ''साधकतमम्'' (प्र.ए.व.), ''करणम्'' (प्र.ए.व.)।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - क्रियायाः सिद्धौ अत्यन्तोपकारकस्य करणसंज्ञा भवति।

**विशेषार्थः** - साध्नोति-अनेन इति साधकम् **अतिशायने तमबिष्ठनौ** इति तमप्।

क्रियायाः फलनिष्पत्तिर्यद्व्यापारादनन्तरम्।

विवक्ष्यते यदा तत्र करणं तत्तदा स्मृतम्। (वाक्यपदीयम्)

**175. कतृकरणयोस्तृतीया |2|3|18||**

अनभिहिते कर्तरि करणे च तृतीया स्यात्। रामेण बाणेन हतो वाली॥ इति तृतीया।

**176. कर्मणा यमभिप्रैति स सम्प्रदानम् |1|4|32||**

दानस्य कर्मणा यमभप्रैति स सम्प्रदानसंज्ञः स्यात्॥

**177. चतुर्थी सम्प्रदाने |2|3|13||**

विप्राय गां ददाति।

---

**175. पदपरिचयः** - ''कर्तृकरणयोः'' (स.द्वि.व.), ''तृतीया'' (प्र.ए.व.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कर्तरि करणे च कारके तृतीयाविभक्तिः भवति।

**विशेषार्थः** - यदा कर्ता च करणमुक्तं स्यात्तदा तु तृतीया न अपि च प्रातिपदिकार्थमात्रे प्रथमा विभक्तिः भवति अतः अत्र **अनभिहते** इति पदं प्रयुक्तम्।

**रूपसिद्धः** - **रामेण बाणेन हतो बालि** - इत्यत्र 'स्वतन्त्रः कर्ता' इत्यनेन रामस्य कर्तृसंज्ञायाम् '**साधकतमं करणम्**' इत्यनेन हननक्रियायां प्रकृष्टोपकारकत्वात् बाणशब्दस्य करणसंज्ञायां '**कर्तृकरणयोस्तृतीया**' इति सूत्रेण तृतीयाविभक्तौ स्वादिकार्ये रामेण बाणेन हतो बालिः इति सिद्धम्।

**176. पदपरिचयः** - ''कर्मणा'' (तृ.ए.व.), ''यम्'' (द्वि.ए.व.). ''अभिप्रैति'' (इति क्रियापदम्), (अभि + प्र + इण् गतौ) (लटि प्र.पु.ए.व.), सः (प्र.ए.व.), सम्प्रदानम् (प्र.ए.व.)।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - करणभूतेन कर्मणा यस्य अभिप्रायं साधयति (यम्-उद्दिशति) तत् कारकम् कारके = क्रियायां सत्याम् सम्प्रदानसंज्ञकं भवति।

**विशेषार्थः** - सम् सम्यक् दीयते प्रकर्षेण अस्मै इति सम्प्रदानम्। दानं नाम पूजानुग्रहकाम्यया स्वकीयद्रव्यपरित्यागः परस्वत्वापत्तिः अतः **रजकस्य वस्त्रं ददातीत्यत्र** न सम्प्रदानसंज्ञा।

**177. पदपरिचयः** - ''चतुर्थी'' (प्र.ए.व.), ''सम्प्रदाने'' (स.ए.व.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - सम्प्रदाने कारके चतुर्थीविभक्तिः भवति।

**विशेषार्थः** - यदि सम्प्रदानमुक्तं स्यात्तदा '**प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा**' इत्यनेन प्रथमा विभक्तिः भवति यथा-दीयते अस्मै इति दानीयो प्रथमा विभक्तिः भवति यथा-दीयते अस्मै इति दानीयो विप्रः। अत्र 'कृत्यल्युटो बहुलम्' इत्यनेन बहुलग्रहणाद् दा धातुना सम्प्रदानकारके अनीयर् प्रत्ययः विधीयते कृत्द्वारा उक्तत्वाद् '**सम्प्रदाने चतुर्थी**' इत्यनेन चतुर्थीविभक्तिः न भवति।

**रूपसिद्धिः** - **विप्राय गां ददाति** - इत्यत्र दानक्रियायाः कर्म गौः अस्ति। अनेन कर्मणा कर्ता विप्रम् इत्यनेन सह उद्देश्यत्वेन सम्बन्धं कर्तुमिच्छति अतः विप्रशब्दस्य सम्प्रदानसंज्ञायां '**चतुर्थी सम्प्रदाने**' इत्यनेन चतुर्थीविभक्तौ विप्राय गां ददाति इति सिद्ध्यति।

**178. नमस्स्वस्तिस्वाहास्वधालंवषड्योगाच्च | 2 | 3 | 16 ||**

एभिर्योगे चतुर्थी। हरये नमः। प्रजाभ्यः स्वस्ति। अग्नये स्वाहा। पितृभ्यः स्वधा। अलमिति पर्याप्त्यर्थग्रहणम्। तेन दैत्येभ्यो हरिरलं प्रभुः समर्थः शक्त इत्यादि॥ इति चतुर्थी॥

**179. ध्रुवमपायेऽपादानम् | 1 | 4 | 24 ||**

अपायो विश्लेषस्तस्मिन्साध्ये यद् ध्रुवमवधिभूतं कारकं तदपादानं स्यात्॥

**180. अपादाने पञ्चमी | 2 | 3 | 28 ||**

ग्रामादायाति धावतोऽश्वात्पततीत्यादि॥ इति पञ्चमी।

**181. षष्ठी शेषे | 2 | 3 | 50 ||**

कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः सम्बन्धः शेषस्तत्र षष्ठी। राज्ञः पुरुषः। कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठ्येव। सतां गतम्। सर्पिषो जानीते। मातुः स्मरति। एधो दकस्योपस्कुरुते। भजे शम्भोश्चरणयोः॥ इति षष्ठी॥

---

**178. पदपरिचयः** - ''नमः स्वस्तिस्वाहास्वधालंवषड्योगात्'' (प.ए.व.), ''च'' (अव्य.)।

**समासः** - नमश्च स्वस्तिच स्वाहा च स्वधा च अलं च वषट् च इति नमः स्वस्तिस्वाहा-स्वाधालंवषट्, तेषां = नमः स्वस्तिस्वाहास्वधालंवषड्योगः तस्मात् = नमः स्वस्तिस्वाहास्वधालंवषड्योगात्॥

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - नमः स्वस्ति स्वाहा स्वधा अलम् वषट् इत्येतैः योगे चतुर्थी विभक्तिः भवति। अलंशब्दः समर्थः शक्तः इत्यर्थः।

**विशेषार्थः** - ननु नमस्करोति देवान् इत्यत्रापि चतुर्थी स्यात् अतः आह पदान्तरयोगनिमित्तिका विभक्तिः - उपपदविभक्तिः, तदपेक्षया कारकविभक्तिर्बलीयसीत्यर्थः।

**रूपसिद्धिः** - ''**हरये नमः**'' - इत्यत्र नमः योगे 'नमः स्वस्ति' इत्यनेन चतुर्थीविभक्तौ स्वादिकार्ये हरये नमः इति सिद्धम्।

**179. पदपरिचयः** - ''ध्रुवम्'' (प्र.ए.व.), ''अपाये'' (स.ए.व.), ''अपादानम्'' (प्र.ए.व.)।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - विश्लेषो विभागानुकूलव्यापारः तस्मिन् साध्ये जननीये यद् घ्रुवमुदासीनं तादृशव्यापानाश्रयं तदपादानसंज्ञं स्यात्।

**विशेषार्थः** - अपाये यद् उदासीनं चलं वा यदि वाचलम् ।

ध्रुवमेवाऽतदावेशात् तदपादानमुच्यते॥

विभागजनकव्यापारानाश्रयते सति विभागाश्रयत्वमपादानत्वम् इति॥

**रूपसिद्धिः** - **वृक्षात् पर्णं पतति** - इत्यत्र वृक्षस्य अपादानसंज्ञा।

**180. पदपरिचयः** - ''अपादाने'' (स.ब.व.), ''पञ्चमी'' (प्र.ए.व.)।

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अनभिहिते अपादाने कारके पञ्चमीविभक्तिः भवति।

**181. पदपरिचयः** - ''षष्ठी'' (प्र.ए.व.), ''शेषे'' (स.ब.व.)।

**182. आधारोऽधिकरणम्  | 1 | 4 | 45 ||**

कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणं स्यात्॥

**183. सप्तम्यधिकरणे च  | 2 | 3 | 36 ||**

अधिकरणे सप्तमी स्यात्, चकाराद्दूरान्तिकार्थेभ्यः। औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा। कटे आस्ते। स्थाल्यां पचति। मोक्षे इच्छास्ति। सर्वस्मिन्नात्मास्ति। वनस्य दूरे अन्तिके वा॥ इति सप्तमी॥ इति विभक्त्यर्थाः॥

---

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - कर्मादिभ्यः अन्यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसम्बन्धादिः शेषः, तत्र षष्ठीविभक्तिः भवति।

**विशेषार्थः** - येन प्रातिपदिकार्थः व्यतिरिच्यते स व्यतिरेकः। प्रातिपदिकार्थस्य व्यतिरेकः प्रातिपदिकार्थव्यतिरेकः।

**भेद्यभेदकयोश्चैव-सम्बन्धोऽन्योऽन्यमिष्यते।**

**द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात्॥**

सम्बन्धश्च बहुविधः यथा

(1) स्वस्वामिभावसम्बन्धः राज्ञः पुरुषः।

(2) अवयावावयविभावसम्बन्धः - तरोः शाखा।

(3) जन्यजनकभावसम्बन्धः - पितुः पुत्रः।

(4) प्रकृतिविकृतिभावसम्बन्धः - हिरण्यस्य कङ्कणम्।

**182. पदपरिचयः** - ''आधारः'' (प्र.ए.व.), ''अधिकरणम्'' (प्र.ए.व.)।

**सूत्रप्रकारः** - संज्ञासूत्रम्।

**सरलार्थः** - क्रियायाः सिद्धौ यः आधारः, तत् कारकम् अधिकरण-संज्ञकं भवति।

**विशेषार्थः** - अध्रियन्ते अस्मिन्नित्याधारः। यथा वृक्षे खगस्तिष्ठति इत्यत्र वृक्षः आधारः तथा खगः इति आधेयः।

**कर्तृकर्मव्यवहिताम् असाक्षाद् धारयत्क्रियाम्।**

**उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्॥**

**183. पदपरिचयः** - ''सप्तमी'' (प्र.ए.व.), ''अधिकरणे'' (स.ए.व.), ''च'' (अव्य.)॥

**सूत्रप्रकारः** - विधिसूत्रम्।

**सरलार्थः** - अनभिहिते अधिकरणे सप्तमीविभक्तिः भवति। चकारात् दूरान्तिकार्थेभ्यः च॥

**विशेषार्थः** - आधारः त्रिविधः

(1) औपश्लेषिकः - कटे आस्ते।

(2) वैषयिकः - मोक्षे इच्छास्ति।

(3) अभिव्यापकः - तिलेषु तैलम्।

**रूपसिद्धिः - कटे आस्ते** - इत्यत्र कटस्य संयोगसम्बन्धः अतः कटः औपश्लेषिकः आधारः तेन '**सप्तम्यधिकरणे च**' इत्यनेन सप्तमीविभक्तौ स्वादिकार्ये कटे आस्ते इति सिद्धम्॥

## स्वाध्यायः

**1. विकल्पं चित्वा रिक्तस्थानं पूरयत।**

(1) परिमाणमात्रे ……… विभक्तिः भवति। (द्वितीया, प्रथमा, तृतीया)

(2) सम्बोधने ……… विभक्तिः भवति। (द्वितीया, प्रथमा, तृतीया)

(3) कर्तुरीप्सिततमं कर्म इति ……… सूत्रम् अस्ति। (विधिसूत्रम्, नियमसूत्रम्, संज्ञासूत्रम्)

(4) कर्मणि द्वितीया इत्यस्य उदाहरणं ……… ? (कटे आस्ते, हरिं भजति, ग्रामादायति)

(5) अपादानसंज्ञा विधायकं सूत्रं ………। (अपादाने पञ्चमी, षष्ठी शेषे, स्वतन्त्रः कर्ता)

(6) स्वाहायोगे ……… विभक्तिः भवति। (द्वितीया, सप्तमी, चतुर्थी)

(7) आधारः ……… विधः। (द्विविधः, पञ्चवधः, त्रिविधिः)

**2. लघूत्तराणि देयानि।**

(1) अधिकरणं नाम किम् ?

(2) शेषार्थे का विभक्तिः भवति ?

(3) करणसंज्ञा विधायकं सूत्रं किम् ?

(4) अनुक्तं नाम किम् ?

(5) अपादाने का विभक्तिः भवति ?

**3. अधोनिर्दिष्टानि रूपाणि साधयत।**

(1) गां दोग्धि पयः

(2) रामेण बाणेन हतो बालि।

(3) विप्राय गां ददाति।

(4) हरये नमः।

(5) कटे आस्ते।

**4. अधोनिर्दिष्टनां सूत्राणां सोदाहरणमर्थं लिखत।**

(1) प्रातिपदिकार्थ ……… ।

(2) साधकतमं करणम् ।

(3) कर्मणा यमभि……… ।

(4) नमः स्वस्ति स्वाहा ……… ।

(5) आधारोऽधिकरणम्।

**5. अधोलिखितानां प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) दुह्याच्-पच्… इति प्रपूर्य तत्रोक्तानि उदाहरणानि लिखत।

(2) किं नाम सम्प्रदानमिति विलिख्य नमः स्वस्ति… इत्यस्योदाहरणानि विलिखत।

(3) षष्ठी शेषे इति सूत्रं विशदीक्रियताम्।

●

# १५ तर्कसंग्रहः ( अनुमानखण्डात्समाप्तिपर्यन्तम् )

**प्रस्तावना**

'नि' उपसर्गपूर्वकं 'इण्' गतौ इति धातोः न्यायशब्दः निष्पद्यते। नियमेन ईयते इति न्यायः यत्र नियमपूर्वकम् उचितानुचितयोः विवेकः प्रदर्शितः सः न्यायः। 'पञ्चावयवोपेतवाक्यात्मको न्यायः' इत्यपि परिभाषा समुपलभ्यते। न्यायेन सह वैशेषिकशब्दोऽपि 'न्याय वैशेषिक' नाम्ना दर्शनक्षेत्रे सुप्रयुक्तः। परन्तु वैशेषिकदर्शनम् इति पृथक्दर्शनं विद्वद्भिः वैदिकदर्शनेषु स्वीक्रियते। विशेषं पदार्थमधिकृत्य कृतं शास्त्रं वैशेषिकम् इति परिभाषा अस्य शास्त्रस्य। अत एव पूर्वकक्षासु प्रत्यक्षप्रमाणं निरूप्य अधुना कार्यकारणभावसंगतिद्वारा अनुमानप्रमाणनिरूपणारम्भः भवति। कारणं वयम् अनुमानं कर्तुं तदैव शक्नुमः यदा धूमप्रत्यक्षं कुर्मः। अर्थात् साक्षात् दृश्यमानधूमद्वारा अदृश्यमानस्य अपि अग्नेः शतप्रतिशतं सत्ता अस्ति इति ज्ञातुं शक्नुमः।

---

## ॥ तर्कसंग्रहेऽनुमानपरिच्छेदः ॥

(1) अनुमानस्य लक्षणम् - **अनुमितिकरणमनुमानम्। अनुमितेः करणम् = असाधारणं करणम् 'अनुमानम्' इति कथ्यते।**

**पदकृत्यम्** - प्रत्यक्षानुमानयोः कार्यकारणभावसङ्गतिमभिप्रेत्य प्रत्यक्षानन्तरम् अनुमानं निरूपयति-अनुमितीति। अनुमितेः करणमनुमानमित्यर्थः। तच्च लिङ्गपरामर्श एवेति निवेदयिष्यते कुठारादावतिव्याप्तिवारणाय अनुमितीति। प्रत्यक्षादावतिव्याप्तिवारणाय अन्विति।

**पदकृत्यार्थः** - अनुमानं तदैव भवति यदा कस्यचित् पदार्थस्य वस्तुनः वा प्रत्यक्षं भवति। तदनन्तरं वयम् अनुमितिं कर्तुं शक्नुमः। अतः प्रत्यक्षम् इति कारणम्; तेन कारणेन अनुमानरूपं कार्यं भवति। अतः प्रत्यक्षप्रमाणं निरूप्य द्वितीयप्रमाणत्वेन अनुमानस्य निरूपणं ग्रन्थकारः करोति। अनुमितिकरणम् इत्यादि। करणम् अर्थात् असाधारणं कारणम् (कारणस्य कारणम् इति सरलार्थः)। तद् अनुमितेः असाधारणकारणं 'लिङ्गपरामर्शः' इत्यस्य अग्नेः निरूपणं भविष्यति। अत्र यदि 'करणं अनुमानम्' इत्येव लक्षणं कुर्मः तर्हि कुठारः (परशुः) अपि वृक्षच्छेदनस्य असाधारणं कारणम् (करणम्) = अस्ति। अतः इदम् अनुमानलक्षणं कुठारस्य अपि लक्षणं भविष्यति। तस्मात् कारणात् उक्तम् 'अनुमिति (करणम्)' इति। यदि केवलम् ''मितिः = बोधः/ज्ञानम् अनुमानम्'' इति लक्षणं कुर्मः तर्हि प्रत्यक्षे अपि (अयं घटः इत्यादिकं) ज्ञानं भवति। अतः इदं लक्षणं प्रत्यक्षप्रमाणस्य अपि लक्षणं भविष्यति अतः 'अनु' (मिति-) (प्रत्यक्षात्) अनन्तरम् इति आवश्यकम्।

(2) अनुमितेः लक्षणम् - **परामर्शजन्यं ज्ञानमनुमितिः।** परामर्शद्वारा उत्पन्नं ज्ञानम् अनुमितिः इति कथ्यते।

**पदकृत्यम्** - नन्वनुमितेरेव दुर्निरूपात्वात्तद्धटितानुमानमपि दुर्निरूपमित्यत आह - परामर्शेति। प्रत्यक्षादावतिव्याप्तिवारणाय परामर्शजन्यमिति। परामर्शध्वंसवारणय ज्ञानमिति। परामर्श-प्रत्यक्षवारणाय हेत्वविषयकमित्यपि बोध्यम्।

**पदकृत्यार्थः** - अत्र शङ्का उद्भवति यत्, अनुमितेः निरूपणम् अपि कठिनम् ; अतः अनुमानस्य निरूपणं तु ततोऽपि दुष्करं किं न स्यात् ? तत्र समाधानार्थम् उक्तं 'परामर्शः' - इत्यादि। तत्र 'ज्ञानम् अनुमितिः' इत्येव केवलं कथ्यते चेत् प्रत्यक्षम् अपि ज्ञानम् एव अतः अतिव्याप्तिनामकः लक्षणदोषः भविष्यति। अतः उक्तं 'परामर्शजन्यम्' (ज्ञानम् अनुमितिः) इति केवलं 'परामर्शजन्यत्वम्' (अनुमितिः) इति कथ्यते चेत् परामर्शस्य ध्वंसः अपि परामर्शात् एव जायते, अतः 'ज्ञानम्' इति पदम् आवश्यकम्। अत्र मूले नोक्तम् अपि 'हेत्वविषयकम्' इति न कथ्यते चेत् परामर्शप्रत्यक्षलक्षणं भविष्यति, इत्यापि ज्ञातव्यम्। 'हेत्वविषयकम्' इत्यस्य निरूपणं धूमादिहेतुनिरूपणेन भविष्यति।

(3) परामर्शस्य लक्षणम् - **व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः। यथा 'वह्निव्याप्यधूमवानयं पर्वत' इति ज्ञानं परामर्शः। तज्जन्यं पर्वतो वह्निमान् इति ज्ञानमनुमितिः।**

व्याप्तिद्वारा विशिष्टं पक्षधर्मतायाः ज्ञानं 'परामर्श' इति कथ्यते। यथा 'वह्नेः व्याप्यः धूमः, तद्वान् (धूमवान्) अयं

पर्वतः अस्ति' एतादृशं ज्ञानं 'परामर्शः' इति कथ्यते। तेन परामर्शे उत्पन्नं 'पर्वतः वह्निमान् अस्ति' इति ज्ञानम् 'अनुमितिः' अस्ति।

**पदकृत्यम्** - व्यप्तिविशिष्टेति। विषयितासम्बन्धेन व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्श इत्यर्थः। घटादिज्ञानवारणाय पक्षधर्मतेति। 'धूमवान् पर्वतः' इत्यादिज्ञानवारणाय व्याप्तिविशिष्टेति। तदिति। परामर्शजन्यमित्यर्थः॥

**पदकृत्यार्थः** - अधुना परामर्शः कः ? इत्यस्य निरूपणं क्रियते। लक्षणे उक्तानां पदानाम् एकैकशः सार्थकता साध्यते। यः यस्य विषयः सः तस्य विषयी भवति। तस्मिन् पुनः विषयिता भवति। तेन विषयितासम्बन्धेन व्याप्तिद्वारा विशिष्टा अर्थात् व्याप्तियुक्ता, तादृशी या पक्षस्य धर्मता, तस्याः पक्षधर्मतायाः ज्ञानं 'परामर्शः' इति कथ्यते। यदि 'पक्षधर्मता-' इति न भवेत् चेत् तर्हि घटपटादिप्रत्यक्षज्ञानस्यापि लक्षणं भविष्यति (अतः 'पक्षधर्मता-' इति पदम् आवश्यकम्। यदि केवलं 'पक्षधर्मताज्ञानं परामर्शः' इत्येव कथ्यते तर्हि 'धूमवान् पर्वतः' इत्यादिज्ञानस्य इदं लक्षणं भविष्यति, तादृशं मा भूत्। अतः पक्षधर्मतायाः एकं विशेषणं प्रदत्तं 'व्याप्तिविशिष्ट-' इति आवश्यकम्। तद् अर्थात् परामर्शेन यद् 'पर्वतो वह्निमान्' इत्यादि ज्ञानं जायते तद् 'अनुमानम्' इति कथ्यते। यथा इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षं तथैव परामर्शजन्यं ज्ञानम् अनुमानम् इति साधारणतुलना॥

(4) व्याप्तिलक्षणम् **यत्र - यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः।**

यस्मिन् यस्मिन् स्थाने धूमः भवति तस्मिन् तस्मिन् स्थाने अग्निः भवति, एतादृशं हेतुभूतस्य धूमादेः साध्यभूतस्य अग्न्यादेः च सहचरत्वं 'व्याप्तिः' इति कथ्यते।

**पदकृत्यम्** - यत्र यत्रेति। 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति व्याप्तेरभिनयः। साहचर्यनियम इति लक्षणम्। सह चरतीति सहचरस्तस्य भावः - साहचर्यम्, सामानाधिकरण्यमिति यावत्। तस्य नियमो व्याप्तिरित्यर्थः। स चाव्यभिचरितत्वम्। तच्च व्यभिचाराभावः। व्यभिचारश्च साध्याभाववद्वृत्तित्वम्। तथा च 'साध्याभाववद्वृत्तित्वं' व्याप्तिरिति पर्यवसन्नम्। 'महानसं वह्निमत्, धूमाद्' इत्यादौ साध्यो वह्निः, तदभाववान् जलह्रदादिः, तद्वृत्तित्वं नौकादौ अवृत्तित्वं प्रकृते हेतुभूते धूमे, इति कृत्वा लक्षणसमन्वयः। 'धूमवान् वह्नेः' इत्यादो साध्यो धूमस्तत्तदभाववदयोगोलकम्, तद्वृत्तित्वमेव वह्न्यादाविति नातिव्याप्तिः।

**पदकृत्यार्थः** - परामर्शलक्षणे यत् 'व्याप्तिविशिष्ट' - इति उक्तं तदा जिज्ञासा भवति 'व्याप्तिः नाम किम्' ? इति अत्र भागद्वयम्, (क) अभिनयः (ख) लक्षणम्। (क) यत्र यत्र धूमः तत्र तत्र अग्निः इति व्याप्तेः अभिनयः अस्ति। (ख) साहचर्यनियमः (धूमवह्न्यादिहेतुसाध्यादीनाम्) इति व्याप्तेः लक्षणम् अस्ति। (...साहचर्यम् इति यावत् सुबोधम्) समानम् (एकमेव) च तद् अधिकरणम् (आधारः) इति समानाधिकरणम् (द्वयोः एकत्र स्थितिः) तस्य भावः समानाधिकरण्यम्। तस्य साहचर्यस्य यः नियमः शाश्वतिकत्वेन एतद्द्वयं सहैव भवति, सः (नियमः) 'व्याप्तिः' इति कथ्यते। एकमपि स्थानं तादृशं न स्यात् यत्र अपवादः भवेत् यत् 'अत्र तयोः साहचर्यं' नास्ति। इदमेव अव्यभिचरितत्वम्। इदम् अभिव्यभिचरितत्वम् एव व्यभिचाराभावः। व्यभिचारस्य किं लक्षणम् ? - 'साध्यभाववद्वृतित्वम्' इति। यत्र साध्यस्य अभाववति स्थलेऽपि यः भवतिः सः व्यभिचारः -

(अत्र घटः साध्यम्)

यथा मृत्तिका भवेत् चेदेव घटो भवति, नान्यथा,

किन्तु गर्दभो भवेत् तथापिघटो न भवेत्,

गर्दभो न भवेत् तथापिघटो न भवेत्

गर्दभो न भवेत् तथापि घटो भवेत्, इति अन्वयव्यतिरेकव्यभिचारोदाहरणम्॥

अयं व्यभिचारः यत्र न भवेत्, तादृश्म् अविनाभावेन = साहचर्यं व्यप्तिः इति निष्कर्षः।

अधुना व्याप्तेः उदाहरणं प्रदर्श्यते - 'महानसं वह्निमत्, धूमात्' इत्यत्र, पाकशालायाम् अग्निः अस्ति, किन्तु सः प्रत्यक्षरूपेण न दृश्यते। तथापि कथं निश्चयेन कथयितुं शक्यते ? अप्रत्यक्षस्य अग्नेः अस्तित्वं साधनीयम् अस्ति। अतः सः (अग्निः) साध्यः 'धूमात्' इति हेतुः अस्ति। तडागे (जलगर्ते) अग्निः नास्ति, नौकादिकं तडागे भवति अर्थात् नौकादिषु तडागादिवृत्तित्वं इति कथ्यते। प्रस्तुते उदाहरणे, अग्निसत्तायाः सिद्धिसमये हेतुभूतः धूमः तडागे नास्ति, अतः

लक्षणसमन्वयः भविष्यति। व्यत्यासेन उदाहरणं 'धूमवान् वह्नेः' इत्यत्र धूमः साध्यः। तस्य (धूमस्य) अभावः अयोगोलके। तद्वृत्तित्वम् (अयोगोलकादिवृत्तित्त्वम्) एव अग्न्यादौ। इत्थम्, अतिव्याप्तिः न भवेत्। साध्याभाववद्वृत्तित्वं व्यभिचारः। साध्याभाववदवृत्तित्वं व्याप्तिः इति सिद्धः सरलार्थः॥

(5) पक्षधर्मतानिरूपणम् – **व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता**

वह्न्यादीनां व्याप्तिप्रयुक्तानां व्याप्यानां धूमादीनां पक्षभूतेषु पर्वतादिषु सत्ता (अस्तित्वं) 'पक्षधर्मता' इति कथ्यते।

**पदकृत्यम्** – ननु ज्ञातेयं व्याप्तिः, पक्षधर्मताज्ञानमित्यत्र का नाम पक्षधर्मता ? इत्यपेक्षमाणं प्रति तत्स्वरूपं निरूपयति– व्याप्यस्येति। व्याप्यो नाम व्याप्त्याश्रयः। स च धूमादिरेव, तस्य पर्वतादिवृत्तित्वं पक्षधर्मतेत्यर्थः।

**पदकृत्यार्थः** – भवतु, उपर्युक्तरीत्या 'व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः' इत्यत्र व्याप्तेः ज्ञानं जातम्, किन्तु पक्षधर्मता नाम किम् ? इति जिज्ञासायां कथ्यते, व्याप्यः अर्थात् व्याप्तेः आश्रयः = यस्य आश्रयेण व्याप्तिः क्रियते, सः धूमादिः (हेतुः) एव अस्ति। सः धूमादिः यत्र भवति (वसति) = पर्वतादौ, इति तद्वृत्तित्वम्, सा एव पक्षधर्मता इति कथ्यते। अत्र इदम् अवश्यं बोध्यं यत् (क) अधिकदेशवृत्तित्वं व्यापकत्वम्, यथा – अग्निः। (ख) न्यूनदेशवृत्तित्वम्।

(6) अनुमानस्य द्वैविध्यम् – **अनुमानं द्विविधम्, स्वार्थं परार्थं च।**

अनुमानस्य प्रकारद्वयम्, (1) स्वार्थानुमानं (2) परार्थानुमानं चेति।

**पदकृत्यम्** – अथ कथमनुमानमनुमितिकरणम् ? कथं वा तस्मादनुमितेर्जनिरिति जिज्ञासमानं प्रति लाघवादनुमानविभागमुखेनैव बुबोधयिषुरनुमानं विभजते – अनुमानमिति। द्वैविध्यं दर्शयति–स्वार्थं परार्थं चेति।

**पदकृत्यार्थः** – इदानीम् अनुमितिकरणम् अनुमानम् इति कथम् ? अनुमानात् अनुमितिः कथं जायते ? इति जिज्ञासा भवति। अतः सङ्क्षेपेण अनुमानस्य प्रकारान् ज्ञापयन् ग्रन्थकारः अनुमानस्य भेदप्रदर्शनं करोति। (क) स्वार्थानुमानम् (ख) परार्थानुमानम् इति अनुमानस्य भेदद्वयम् अस्ति।

(6) (क) स्वार्थानुमानस्य स्वरूपम् – **तत्र स्वार्थं स्वानुमितिहेतुः। तथाहि स्वयमेव भूयो दर्शनेन 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतस्तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति। तदनन्तरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते। अयमेव लिङ्गपरामर्श इत्युच्यते। तस्मात् 'पर्वतो वह्निमान्' इति ज्ञानमनुमितिरुत्पद्यते। तदेतत् स्वार्थानुमानम्।**

पूर्वोक्तयोः द्वयोः अनुमानयोः मध्ये यत् स्वानुमितिज्ञाने हेतुभूतं स्यात् तत् 'स्वार्थानुमानम्' इति कथ्यते। यथा स्वयमेव पुनः पुनः धूमाग्न्योः साहचर्यं दृष्ट्वा 'यत्र यत्र धूमः भवति तत्र तत्र अग्निः अवश्यमेव भवति' इति पाकशालादिषु व्याप्तिं ज्ञात्वा कश्चित् जनः कदाचित् पर्वतसमीपं गतः। तत्र स्थितस्य वह्नेः आशङ्कां कुर्वाणः पर्वते धूमं दृष्ट्वा व्याप्तेः स्मरणं करोति यतः, ''यत्र यत्रापि धूमः भवति तत्र तत्र अग्निः अवश्यमेव भवति।'' तदनन्तरं तस्मिन् जने 'अयं पर्वतः अग्नेः व्याप्तेः आश्रयेण धूमेन युक्तः (धूमवान्) अयं पर्वतः अस्ति' इति ज्ञानम् उत्पन्नं भवति। इदमेव 'लिङ्गपरामर्श' इति कथ्यते। तस्मिन् परामर्शे 'पर्वतः वह्निमान्' इति अनुमितिज्ञानं तस्य जनस्य भवति। एतादृशम् अनुमितिज्ञानं 'स्वार्थानुमानम्' इति कथ्यते। अनुमितिज्ञानं तस्य जनस्य भवति। एतादृशम् अनुमितिज्ञानं 'स्वार्थानुमानम्' इति कथ्यते।

**पदकृत्यम्** – स्वास्यार्थः प्रयोजनं यस्मात् तत्स्वार्थमिति समासः। स्वप्रयोजनं च स्वस्यानुमेयप्रतिपत्तिः। एवं परार्थमित्यस्यापि। अयमिति। व्याप्तिबलेन लीनमर्थं गमयतीति लिङ्गम्। तच्च धूमादिः। तस्य परामर्शो ज्ञानविशेष इत्यर्थः। तस्मादिति। लिङ्गपरामर्शादित्यर्थः। स्वार्थानुमानमुपसंहरति–तदेतदिति। यस्मादिदं स्वप्रतिपत्तिहेतुस्तस्मादेत–त्स्वार्थानुमानमित्यर्थः।

**पदकृत्यार्थः** – (क) स्वार्थानुमानम् यस्मात् स्वस्य 'अर्थः' अर्थात् 'प्रयोजनं' तत् स्वार्थानुमानम् इति सङ्क्षिप्तः अर्थः। तथा च स्वप्रयोजनम् इत्यनेन स्वस्य अनुमेयत्वस्य प्रतिपादनम्। यथा अयं मम दासः इति यः वदति तेन स्वयं बोधः भवति यत् वक्ता तस्य स्वामी इति स्वस्य स्वामित्वप्रतिपादनं सः करोति। तथैव परार्थम् इत्यपि बोध्यम्। व्याप्तेः प्रयोगेण गूढम् अर्थं बोधयति तद् 'लिङ्गम्' इति कथ्यते। प्रस्तुतोदाहरणे धूमादिः लिङ्गम् अस्ति। तस्य लिङ्ग (प्रत्यक्षानन्तरम्) परामर्शः अर्थात् विशिष्टं ज्ञानम् ''अरे ! अत्र धूमः अस्ति ! तर्हि निश्चितरूपेण अग्निः स्याद् एव''

इत्यादि। तस्माद् लीनस्य गूढस्य अर्थस्य ज्ञापकस्य लिङ्गस्य परामर्शात् 'पर्वतो वह्निमान्' इति ज्ञानम् उत्पन्नं भवति। यतो हि अस्मिन् अनुमाने स्वस्य प्रतिपादनं स्वार्थे क्रियते अतः स्वार्थानुमानम् (अन्यत् मूले अर्थे च स्पष्टमेव)॥

(6) (ख) परार्थानुमानस्य स्वरूपम् - **यत्तु स्वयं धूमादग्निमनुमाय परं प्रति बोधयितुं पञ्चावयववाक्यं प्रयुङ्क्ते तत्परार्थानुमानम्। यथा पर्वतो वह्निमान्, धूमवत्त्वात्, यो यो धूमवान् स स वह्निमान्, यथा महानसम्, तथा चायम् तस्मात् तथा इति। अनेन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते।**

यः (पूर्वोक्तस्वार्थानुमानकर्ता) स्वयं धूमात् अग्नेः अनुमानं कृत्वा अन्यम् अपि बोधयितुं पञ्चावयवयुक्तवाक्यप्रयोगं करोति तत् 'परार्थानुमानम्' इति कथ्यते। यथा (1) पर्वतः वह्नियुक्तः अस्ति (2) धूमयुक्तः अस्ति अतः (3) यः यः धूमयुक्तः भवति स स वह्नियुक्तः भवति..., यथा पाकशाला (महानसम्) (4) तथैव अयं पर्वतः (5) अतः पर्वतः वह्नियुक्तः अस्ति। एतैः पञ्चा वयववाक्यैः प्रतिपादितात् हेतुरूपधूमात् लिङ्गात् अन्यः अपि अग्निं ज्ञातुम् (अनुमातुं) प्रभवति।

**पदकृत्यम्** - क्रमप्राप्तं परार्थानुमानमाह - यत्त्विति। यत्पञ्चावयववाक्यं प्रयुज्यते तत्परार्थानुमानमिति सम्बन्धः। पञ्चावयवेति। अथावयवत्वं नाम द्रव्यसमवायिकारणत्वम्। प्रतिज्ञादिषु तदसम्भवात्कथमेतेऽवयवाः स्युरिति चेत्, अनुमानवाक्यैकदेशत्वात्तु अवयवा इत्युपचर्यन्ते इति गृहाण। नन्वेवमपि पञ्चावयववाक्यस्यानुमानत्वमेव न विचारसहं, तस्य लिङ्गपरामर्शत्वाभावादिति चेत्, मैवम्, लिङ्गपरामर्शप्रयोजकलिङ्गे अनुमानमित्युपचारमात्रत्वात्। तदुदाहरति- यथेति। तथा चायमिति। अयं च पर्वतस्तथा-वह्निव्याप्यधूमवानित्यर्थः। तस्मात्तथेति। वह्निव्याप्यधूमवत्त्वाद्वह्निमानित्यर्थः। अनेनेति। अनेन पञ्चावयवाक्येनेत्यर्थः।

**पदकृत्यार्थः** - (ख) परार्थानुमानम् - अधुना क्रमात् अनुमानस्य परार्थानुमानाख्यं द्वितीयं भेदं निरूपयति यत्, यस्मिन् अनुमाने पञ्चावयववाक्यस्य प्रयोगद्वारा अनुमानं भवति, तत् परार्थानुमानम् इति। अवयवावयविनोः नित्यसम्बन्धः भवति। यथा चक्रं छत्रम् इत्यादीनाम् अवयवानां समवायः भवति तदा 'रथ' इति संज्ञा भवति। अत्र अवयवस्य लक्षणं कथ्यते, 'द्रव्यसमवायिकारणत्वम्' = प्रत्यक्षखण्डे उक्तानां नवद्रव्याणाम् अत्र सन्दर्भः ग्रहणीयः। यथा वृक्षः अवयवी, शाखा तस्य अवयवः।

अत्र जिज्ञासा भवति। यत् प्रतिज्ञा-हेतूदाहरणोपनयनिगमनेषु अवयवत्वं नास्ति तर्हि कथम् एते 'अवयवाः' इति कथ्यन्ते ? तत्रेदं समाधानम्, एतेषां पञ्चानाम् अनुमानवाक्ये एव केवलं प्रयोगः भवति। अतः केवलम् औपचारिकरूपेण 'अवयवाः' इति उक्तम्। यदि इत्थम् आक्षेपः क्रियते यत्, पञ्चावयववाक्ये लिङ्गपरामर्शः न भवति, अतः अनुमानत्वेन तस्य विचारः एव अयोग्यः तर्हि तद् न योग्यम्, कारणम्, लिङ्गपरामर्श इति प्रयोजकलिङ्गे अनुमानम् इति केवलम् औपचारिकम् अस्ति। (अन्यत् स्पष्टं मूलादौ।)

(7) पञ्चावयवनिरूपणम् - **प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः। पर्वतो वह्निमान् इति प्रतिज्ञा। धूमवत्त्वादिति हेतुः। यो यो धूमवान् सोऽग्निमान्, यथा महानसम् इत्युदाहरणम्। तथा चायमित्युपनयः। तस्मात्तथा इति निगमनम्।**

(1) प्रतिज्ञा (2) हेतुः (3) उदाहरणम् (4) उपनयः (5) निगमनम् इति पञ्च अवयवाः सन्ति।

अत्र (1) प्रतिज्ञा - पर्वतः वह्निमान् अस्ति (2) हेतुः - धूमवान् अस्ति अतः (3) उदाहरणम् - यः यः धूमवान् भवति स स वह्निमान् भवति, यथा पाकशाला (महानमसम्) (4) उपनयः - तथैव अयम् (पर्वतः धूमवान् अस्ति) (5) निगमनम् - तस्मात् कारणात् अयम् (पर्वतः वह्निमान्) अस्ति।

**पदकृत्यम्** - ननु पञ्चावयववाक्यमित्यत्र के ते पञ्चावयवाः ? अतस्तान् दर्शयति - प्रतिज्ञेति। प्रतिज्ञाद्यन्यतमत्वमवयवत्वम्। साध्यविशिष्टपक्षबोधकवचनं प्रतिज्ञा। पञ्चम्यन्तं तृतीयान्तं वा लिङ्गवचनं हेतुः। व्याप्तिप्रतिपादकदृष्टान्तवचनमुदाहरणम्। उदाहृतव्यप्तिविशिष्टत्वेन हेतोः पक्षधर्मताप्रतिपादकवचनमुपनयः। पक्षे साध्यस्याबाधितत्वप्रतिपादकवचनं निगमनम्। इदमेव लक्षणं हृदि निधाय प्रतिज्ञादीन् विशिष्य दर्शयति - पर्वतो वह्निमानित्यादिना।

**पदकृत्यार्थः** - (प्र.) अवयवत्वं किम् ? - (उ.) 'प्रतिज्ञाद्यन्यतमत्वम्'। (प्र.) प्रतिज्ञायाः किं स्वरूपम् ? (उ.) साध्यविशिष्टपक्षबोधकवचनं प्रतिज्ञा इति कथ्यते (यथा... इत्यादि मूलादौ स्पष्टम्। पञ्चमीविभक्तिद्वारा तृतीयाविभक्तिद्वारा

वा लिङ्गवचनं भवति सः हेतुः भवति। येन वचनेन व्याप्तिप्रतिपादनार्थं दृष्टान्तः दीयते तद् उदाहरणम् इति कथ्यते। तेन उदाहरणेन सह पक्षधर्मताप्रतिपादकवचनस्य समन्वयः साध्यते सः उपनयः इति कथ्यते। अन्यत् सर्वं स्पष्टम्।

(8) लिङ्गपरामर्शस्य असाधारणकारणत्वम् - **स्वार्थानुमितिपरार्थानुमित्योर्लिङ्गपरामर्श एव करणम्। तस्माल्लिङ्गपरामर्शोऽनुमानम्।**

स्वार्थानुमितेः परार्थानुमितेश्च असाधारणं कारणं लिङ्गपरामर्श एव भवति। तस्मात् कारणात् ''लिङ्गपरामर्श एव अनुमानम् अस्ति'' इति कथ्यते।

**पदकृत्यम्** - लिङ्गेति। ज्ञायमानं लिङ्गमनुमितिकरणमिति वृद्धोक्तं न युक्तम्, 'इयं यज्ञशाला वह्निमती, अतीतधूमाद्' इत्यादौ लिङ्गाभावेऽप्यनुमितिदर्शनादित्यभिप्रायवान् लिङ्गपरामर्श एव करणत्याचष्टे-लिङ्गपरामर्श एवेति। अनुमानमुपसंहरति-तस्मादिति। अनुमितिकरणत्वादित्यर्थः। अयमेव तृतीयज्ञानमित्युच्यते। तथा हि महानसादौ धूमाग्न्योर्व्याप्तौ गृह्यमाणायां यद्धूमज्ञानं तदादिमम्, पक्षे यद्धूमज्ञानं तद्द्वितीयम्। अत्रैव वह्निव्याप्यत्वेन यद्धूमज्ञानं तत्तृतीयम्। इदमेव लिङ्गपरामर्श इत्युच्यते। अनुमानमिति। व्यापारवत्कारणं करणमिति मते व्याप्तिज्ञानमेवानुमानम्, लिङ्गपरामर्शो व्यापार इत्यवसेयम्।

**पदकृत्यार्थः** - 'इयं यज्ञशाला...' इत्यादिषु उदाहरणेषु लिङ्गं नास्ति तथापि अनुमितेः दर्शनं भवति। तस्मात् कारणात् वृद्धैः प्राचीननैयायिकैः यद् उक्तं 'ज्ञायमानम्...' इत्यादि तद् योग्यं नास्ति। यथा अनुमितेः करणम् = असाधारणं कारणम् अनुमानम् अस्ति इति पूर्वम् उक्तम्, तदेव स्पष्टतया कथ्यते द्विविधायाः अनुमितेः असाधारणं कारणं लिङ्गपरामर्शः एव अस्ति। 'एव' इत्यनेन 'न अन्यत्' इति स्पष्टं भवति। अयं लिङ्गपरामर्शः एव तृतीयज्ञानम् इति कथ्यते। तथा च पाकशालादिस्थले यदा वयं धूमवह्न्योः व्याप्तेः ग्रहणसमये यद् धूमज्ञानम् अस्ति तद् आदिमम् = प्रथमम् इति कथ्यते। (पर्वतादि) पक्षे यद् धूमज्ञानं भवति तद् द्वितीयम् भवति। पक्षे एव साध्यस्य व्यापकस्य वह्नेः .... त्वेन ज्ञायते तत् तृतीययम्। अर्थात् अयमेव सारांशः यत्,

(क) व्याप्तेः ज्ञानम् अनुमितौ असाधारणकारणत्वेन (व्यापारवत्कारणत्वेन/करणत्वेन) विराजते।

(ख) परामर्शः अनुमितौ व्यापारत्वेन विराजते।

(ग) तत्फलं च अनुमितिः इति बोध्यम्।

(9) लिङ्गस्य त्रिविधत्वम् - **लिङ्गं त्रिविधम्, अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति।**

(1) अन्वयव्यतिरेकि (2) केवलान्वयि (3) केवलव्यतिरेकि च इति लिङ्गं त्रिविधं भवति।

(9) (क) अन्वयव्यतरेकिणः लिङ्गस्य लक्षणम् - **अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि। यथा वह्नौ साध्ये धूमवत्त्वम्। यत्र धूमस्तत्राग्निर्यथा महानसमित्यन्वयव्याप्तिः। यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति, यथा महाह्रद इति व्यतिरेकव्याप्तिः।**

यत्र अन्वयेन व्यतिरेकेण च व्याप्तिः भवति, तद् लिङ्गम् अन्वयव्यतिरेकि इति कथ्यते। (क) यथा वह्नेः सिद्धिसमये धूमस्य सत्ता। यत्र धूमः भवति तत्र वह्निः भवति, इतीयम् अन्वयव्याप्तिः अस्ति। (ख) यत्र वह्निः न भवति यत्र धूमः अपि न भवति, इतीयं व्यतिरेकव्याप्तिः अस्ति। इत्थं यत्र अन्वयव्याप्तिः व्यतिरेकव्याप्तिः इत्येतयोः द्वयोः सङ्घटना भवति तद् लिङ्गम् 'अन्वयव्यतिरेकि' कथ्यते।

**पदकृत्यम्** - अन्वयव्यतिरेकिणो लक्षणमाह-अन्वयेति। तृतीयायाः प्रयोज्यत्वमर्थः। साध्यसाधनयोः साहचर्यमन्वयः। तदभावयोः साहचर्यं व्यतिरेकः। तथा चान्वयप्रयोज्यव्याप्तिमद्व्यतिरेकप्रयोज्यव्याप्ति मदन्वयव्यतिरेकीत्यर्थः। केवलव्यतिरे किण्यतिव्याप्तिवारणाय अन्वयेति। केवलान्वयिनि व्यभिचारवारणाय व्यतिरेकेणेति। तथा चान्वयव्याप्तिरूपदर्शितैव। व्यतिरेकव्या प्तिश्च साध्याभावव्यापकीभूताभावप्रतियोगित्वमित्यर्थः। तदुक्तम् -

व्याप्यव्यापकभावो हि भावयोर्यादृगिष्यते।

तयोरभावयोस्तस्माद्विपरीतः प्रतीयते॥

अन्वये साधनं व्याप्यं, साध्यं व्यापकमिष्यते।

साध्याभावोऽन्यथा व्याप्यो व्यापकः साधनात्ययः ॥ इति॥

**सरलार्थः**

- एकसत्त्वे अपरसत्त्वम् अन्वयव्याप्तिः। यथा - मृत्तिकासत्त्वे घटसत्त्वम्॥
- एकसत्त्वे अपरासत्त्वं व्यतिरेकव्याप्तिः। यथा - मृत्तिकाऽसत्त्वे घटासत्त्वम्॥
- एकसत्त्वे अपरासत्त्वम् अन्वयव्यभिचारः। यथा - गर्दभसत्त्वे घटाऽसत्त्वम्॥
- एकसत्त्वे अपरसत्त्वं व्यतिरेकव्यभिचारः। यथा - गर्दभाऽसत्त्वे घटसत्त्वम्॥ इति सारल्यार्थं समासः॥

(9) (ख) केवलान्वयिनः लिङ्गस्य लक्षणम् - **अन्वयमात्रव्याप्तिकं केवलान्वयि। यथा-घटोऽभिधेयः, प्रमेयत्वात्, पटवदिति। अत्र प्रमेयत्वाभिधेययोर्व्यतिरेकव्याप्तिर्नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च।**

यत्र केवलम् अन्वव्याप्तेः एव सङ्घटना भवति, तद् लिङ्गं केवलान्वयि इति कथ्यते। यथा घटः वाच्यः (अभिधेयः) अस्ति, यथार्थज्ञानविषय(प्रमेय)त्वात्, यथा पटः। अत्र प्रमेयतायाः तथा च अभिधेयतायाः अन्वयव्याप्तिः एव अस्ति। अर्थात् अनयोः व्यतिरेकव्याप्तिः न सङ्घटते, कारणम्, विश्वस्मिन् सर्वेष्वपि पदार्थेषु प्रमेयत्वम् अभिधेयत्वं च भवत्येव।

**पदकृत्यम्** - केवलान्वयिनो लक्षणमाह-अन्वयेति। अन्वयेनैव व्याप्तिर्यस्मिन् स तथा। प्रमेत्यवाभिधेयत्वयोर्व्यतिरेकव्याप्ति निराकरोति-अत्रेति। अभिधेयत्वसाध्यकानुमाने इत्यर्थः। कृतस्तन्निषेधोऽतस्तत्र हेतुमाह-सर्वस्येति। पदार्थमात्रस्येत्यर्थः। तथा च सकलपदाभिधेयत्वस्येश्वरप्रमाविषयत्वस्य चात्यन्ताभावाप्रतियोगित्वरूपकेवलान्वयित्वेन तदभावाप्रसिद्ध्या तद्घटितव्यतिरेकव्याप्तिर्नसम्भवत्येवेति भावः।

**पदकृत्यार्थः** - यत्र केवलम् अन्वयद्वारा (तत्सत्त्वे तत्सत्त्वम्) व्याप्तिः भवति तत्र केवलान्वयि लिङ्गं भवति। प्रमेयत्वे अभिधेयत्वे वा व्यतिरेकव्याप्तिः नास्ति (तदभावे तदभावः), किमर्थम् ? इति चेत्, अत्र अर्थात् अभिधेयत्वसाधकानुमाने। अर्थात् सर्वे पदार्थाः प्रमेयाः अभिधेयाः च सन्ति। अतः ईश्वरप्रमाविषयत्वात् व्यतिरेकव्याप्ति न सङ्घटते।

(9) (ग) केवलव्यतिरेकिणः लिङ्गस्य लक्षणम् - **व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि। यथा-पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वात्। यदीतरेभ्यो न भिद्यते न तद् गन्धवत्, यथा जलम्। न चेयं तथा। तस्मान्न तथेति। अत्र 'यद्गन्धवत्तदितरभिन्नम्' इत्यन्वयदृष्टान्तो नास्ति, पृथिवीमात्रस्य पक्षत्वात्।**

यत्र हेतौ केवलं व्यतिरेकव्याप्तिः एव भवति तद् लिङ्गं केवलव्यतिरेकि इति कथ्यते। यथा ''पृथिवी स्वस्मात् अन्येभ्यः भिन्ना अस्ति, गन्धयुक्तत्वकारणात्। यद् अन्येभ्यः न भिन्नं तद् न दन्धवत्, यथा जलम्। इयं पृथिवी जलवद् गन्धरहिता नास्ति। अतः अन्यपदार्थवत् पृथिवी गन्धरहिता नास्ति, किन्तु गन्धवती अस्ति।'' अत्र ''यद् गन्धवद् भवति तद् अन्येभ्यः भिन्नं भवति'' इति अन्वयदृष्टान्तः न सङ्घटते, अत्र पृथिवी केवलं पक्षः अस्ति।

**पदकृत्यम्** - केवलव्यतरेकिणो लक्षणमाह-व्यतिरेकेति। व्यतिरेकेणैव व्याप्तिर्यस्मिँस्तत्तथा अन्वयव्यतिरेकिण्यतिव्याप्तिवाराणाय मात्रेति। न चेयं तथेति। इयम् - पृथिवी, न तथा - न गन्धाभाववतीत्यर्थः। तस्मान्न तथेति। गन्धाभाववत्त्वाभावद् इतरभेदाभाववती नेत्यर्थः।

नन्वत्र किमिति नान्वयव्याप्तिरित्याशङ्क्य परिहरति अत्रेति। इतरभेदसाधकानुमान इत्यर्थः। इदमुपलक्षणम्। ''जीवच्छरीरं सात्मकं प्राणादिमत्त्वात्, यत्रैवं तत्रैवम्'', ''यथा घटः। प्रत्यक्षादिकं प्रमाणमिति व्यवहर्तव्यम्, प्रमाकरणत्वात्, यत्रैवं तत्रैवम्'', यथा प्रत्यक्षाभासः। ''विवादास्पदम् आकाशमिति व्यवहर्तव्यम्, शब्दवत्त्वात् इत्यादिकमपि केवलव्यतिरेकीति द्रष्टव्यम्।''

अत्रेदं बोध्यम्-अन्वव्यतिरेकि तु पञ्चरूपोपपन्नं स्वसाध्यं साधयितुं क्षमते। तानि कानीति चेत् श्रूयताम्। पक्षधर्मत्वम्, सपक्षसत्त्वम्, विपक्षाद्व्यावृत्तिः, अबाधितविषयत्वम्, असत्प्रतिपक्षत्वं चेति। अबाधितः साध्यरूपो विषयो यस्य तत्थोक्तम्, तस्य भावस्तत्त्वम्। एवं साध्याभावभासाधकं हेत्वन्तरं यस्य स सत्प्रतिपक्षः इत्युच्यते, स नास्ति यस्य सोऽसत्प्रतिपक्षः, तस्य भावस्तत्त्वमिति बोध्यम्। केवलान्वयि तु चतूरूपोपन्नमेव साध्यं साधयितुं क्षमते, तस्य विपक्षविपर्ययेण तद्व्यावृत्तिविपर्ययात्। केवलव्यतिरेक्यपि तथा, तस्य सपक्षविपर्ययेण तत्सत्त्वविपर्ययादिति। उपदर्शितरूपाणां मध्ये कतिपयरूपोपन्नत्वात्।

**पदकृत्यार्थः** - पदकृत्ये स्पष्टप्रायः।

(10) पक्षसपक्षविपक्षाणां प्रतिपादनम् - **सन्दिग्धसाध्यवान् पक्षः। यथा धूमवत्त्वे हेतौ पर्वतः। निश्चितसाध्यवान् सपक्षः, यथा तत्रैव महानसम्। निश्चितसाध्याभाववान् विपक्षः, यथा तत्रैव महाह्रदः।**

'पक्षः' सः भवति, यत्रवह्न्यादिसाध्ये सन्देहः भवति। यथा धूमवत्त्वहेतुमध्ये पर्वतः पक्षः अस्ति। एवमेव यत्र साध्ये निश्चयः भवति, सः सपक्षः इति कथ्यते। यथा धूमवत्त्वहेतुमध्ये सपक्षत्वेन अस्ति, महानसम्। यस्मिन् स्थले वह्न्यादिसाध्यानाम् अभावस्य निश्चयो भवति, सः विपक्ष इति कथ्यते। यथा धूमवत्त्वहेतुमध्ये महाह्रदः विपक्षः अस्ति।

**पदकृत्यम्** - अथ पृथिवीमात्रस्य पक्षत्वादित्यत्र किन्नाम पक्षतेत्यपेक्षायां तां निर्वक्तिसन्दिग्धेति। सपक्षवारणाय सन्दिग्धेति। निश्चितेति। पक्षेऽतिव्याप्तिवारणाय निश्चितेति। तत्रैवेति। धूमवत्त्वे हेतावेवेत्यर्थः। निश्चितसाध्यभावेति। सपक्षेऽतिव्याप्तिवारणाय साध्येति। पक्षेऽतिव्याप्तिवारणाय निश्चितेति। तत्रैव धूमवत्त्वे एव।

**पदकृत्यार्थः** - मूलार्थे पदकृत्ये च स्पष्टप्रायः।

(11) दुष्टहेतुरूपाणां पञ्चानां हेत्वाभासानां निरूपणम् - **सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः।**

(1) सव्यभिचारः (2) विरुद्धः (3) सत्प्रतिपक्षः (4) असिद्धः (5) बाधितः, इति पञ्चानां हेत्वाभासत्वेन गणना क्रियते।

**पदकृत्यम्** - हेतून्निरूप्य प्रसङ्गाद्धेत्वाभासानाह-सव्यभिचारेति। हेतुवदाभासन्ते इति हेत्वाभासाः। तत्त्वं चानुमितितत्करणाम्यतरप्रतिबन्धकयथार्थज्ञानविषयत्वम्। बाधस्थले 'वह्निरनुष्ण' इत्यनुमितिप्रतिबन्धकं यज्ज्ञानम्-उष्णत्ववद्वह्नावनुष्णत्वसाधकं द्रव्यत्वम् इत्याकारकं तद्विषयत्वस्य विषयतासम्बन्धेन द्रव्यत्वरूपहेत्वाभासे सत्त्वाल्लक्षणसमन्वयः। सद्धेतुवारणाय यथार्थेति। घटादिवारणाय अनुमितितत्करणान्यतरप्रतिबन्धकेति। व्यभिचारिणि अव्याप्तिवारणाय तत्करणान्यतरेति।

**पदकृत्यार्थः** - अधुना हेतुनां निरूपणानन्तरं दोषरूपाणां हेतुवद् आभासमानानां (दुष्टहेतूनां) निरूपणम्।

(11) (1) सव्यभिचारः हेत्वाभासः - **सव्यभिचारोऽनैकान्तिकः। स त्रिविधः, साधारणासाधारणानुपसंहारिभेदात्।**

सव्यभिचारः 'अनैकान्तिकः' इति कथ्यते। सः त्रिधा वर्तते, (क) साधारणः (ख) असाधारणः (ग) अनुपसंहारी चेति।

(11) (1) (क) साधारणः सव्यभिचारः - **तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः। यथा पर्वतो वह्निमान् प्रमेयत्वादिति। अत्र प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात्।**

यत्र साध्यस्य अभावः स्यात् तत्रापि यः भवति सः साधारण अनैकान्तिकः इति कथ्यते। यथा - 'पर्वतः वह्निमान् अस्ति, प्रमेयत्वात्' इत्यत्र 'प्रमेयत्वम्' इति हेतुः वह्न्यभावयुक्ते ह्रदे अपि भवति। तस्मात् कारणात् अत्र प्रमेयत्वरूपः हेतुः व्यभिचारी अस्ति, अतः साधारणः सव्यभिचारः (अनैकान्तिकः) हेत्वाभासत्वेन वर्तते।

**पदकृत्यम्** - तत्रेति। साधारणादित्रितयमध्य इत्यर्थः। अथ विरुद्धेऽतिप्रसक्तिरिति मा स्म दृप्यः; सपक्षवृत्तित्वस्यापि निवेशात्। अथैवमपि स्वरूपासिद्धेर्दूषणं जागर्तीति मा वह गर्वम्; पक्षवृत्तित्वस्यापि तथात्वात्।

**पदकृत्यार्थः** - साधारणासाधारणानुपसंहारिणां मध्ये यः साध्याभावे भवति सः साधारणः हेत्वाभास इति कथ्यते। सपक्षवृत्तित्वस्य अत्र निवेशः कृतः अस्ति अतः विरुपहेत्वाभासे अतिप्रसङ्गः न भविष्यति।

(11) (1) (ख) असाधारणः सव्यभिचारः - **सर्वपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः। यथा शब्दो नित्यः शब्दत्वादिति। शब्दत्वं सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति।**

कस्मिन्नपि सपक्षे विपक्षे वा यो न भवति, केवलं पक्षे एव भवति; सः असाधारणः सव्यभिचारः हेत्वाभास इति कथ्यते। यथा - 'शब्दः नित्यः अस्ति, शब्दत्वकारणात्' अत्र पक्षभूते शब्दे नित्यत्वं साधयितुं 'शब्दत्वकारणात्' इति यः हेतुः अस्ति, स नित्ये सपक्षे अनित्ये च विपक्षे न भवति, केवलं पक्षभूते शब्दे एव भवति। अतः अत्र 'शब्दत्वात्' इति हेतुः असाधारणः सव्यभिचारः/अनैकान्तिकः हेत्वाभासः भवति।

**पदकृत्यम्** - पक्षमात्रेति। ये सपक्षा विपक्षात्सेभ्यो व्यावर्तत इति सर्वसपक्षविपक्षव्यावृत्तः। केवलव्यतिरेकिवारणाय तद्भिन्न इत्यपि देयम्।

**मूलार्थः** - मूलार्थे पदकृत्ये च स्पष्टप्रायः।

(11) (1) (ग) अनुपसंहारी सव्यभिचारः - **अन्वयव्यतिरेकदृष्टान्तरहितोऽनुपसंहारी। यथा सर्वमनित्यं प्रमेयत्वादिति। अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति।**

यत्र अन्वयदृष्टान्तः व्यतिरेकदृष्टान्तो वा न भवति, सः हेतुः 'अनुपसंहारी' सव्यभिचारः हेत्वाभासः इति कथ्यते। यथा - ''सर्वम् अनित्यम् अस्ति; प्रमेयत्वकारणात्'' अत्र, 'सर्वम्' इति पक्षः अस्ति, तत्र अनित्यत्वरूपं साध्यं साधयितुं प्रमेयत्वम् इति हेतुः अस्ति। तस्मात् दृष्टान्ताभावात् अयं सव्यभिचारः हेत्वाभासः 'अनुपसंहारी' इति कथ्यते।

**पदकृत्यम्** - अन्वयेति। केवलान्वयिन्यतिव्याप्तिवारणाय अन्वयेति। केवलव्यतिरेकिण्यतिव्याप्तिवारणाय व्यतिरेकेति। अत्रेति। उपदर्शितानुमाने, इत्यर्थः।

**पदकृत्यार्थः** - पदकृत्ये स्पष्टप्रायः।

(11) (2) विरुद्धः हेत्वाभासः - **साध्याभावव्याप्तो हेतुर्विरुद्धः। यथा शब्दो नित्यः कृतकत्वाद्, घटवदिति। अत्र कृतकत्वं हि नित्यत्वाभावेनानित्यत्वेन व्याप्तम्।**

साध्यस्य अभावे व्याप्तः हेतुः 'विरुद्धः' हेत्वाभासः इति कथ्यते। यथा - 'शब्दः नित्यः अस्ति, केनचित् निर्मितत्वात्; घटवत्'। इत्यत्र शब्दः पक्षः अस्ति। तत्र नित्यत्वसिद्ध्यर्थं यः हेतुः 'कृतकत्वात्' इति प्रदत्तोऽस्ति, सः अनित्यत्वरूपेण साध्याभावेन व्याप्तः अस्ति।

**पदकृत्यम्** - विरुद्धं लक्षयति-साध्येति। सद्धेतुवारणाय साध्याभावव्याप्त इति। असम्भववारणाय व्याप्तेति। सत्प्रतिपक्षवारमाय सत्प्रतिपक्षभिन्न इत्यपि बोध्यम्। कृतकत्वादिति। कार्यत्वादित्यर्थः। कृतकत्वमिति। अन्तियत्वेन व्याप्तमिति। यद्यत्कृतकं तत्तदनित्यमिति व्याप्तिर्भवत्येव; तथेति भावः।

**पदकृत्यार्थः** - यदि लक्षणे साध्याभावव्याप्त इति न दीयते चेत् सद्धेतौ लक्षणं गमिष्यति तथा च यदि साध्याभाव इत्येव स्थाप्यते चेत् असम्भवनामकः लक्षणदोषः भविष्यति। यद्यपि लक्षणमिदं सत्प्रतिपक्षे अपे सङ्घटते अतः तद्वारणाय सत्प्रतिपक्षभिन्न इत्यपि ज्ञेयम्। शेषं स्पष्टम्।

(11) (3) सत्प्रतिपक्षः हेत्वाभासः - **यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते, स सत्प्रतिपक्षः। यथा शब्दो नित्यः श्रावणत्वाच्छब्दत्ववदिति, शब्दोऽनित्यः कार्यत्वाद् घटवदिति।**

यस्य साध्याभावस्य साधकः अन्यः/अपरः हेतुः अपि भवति चेत् सः 'सत्प्रतिपक्षः' हेत्वाभासः इति कथ्यते। यथा - ''शब्दः नित्यः, श्रोत्रेन्द्रियग्राह्यत्वात्; शब्दत्ववत्'' इत्यत्र शब्दः पक्षः अस्ति, तत्र साध्यं नित्यत्वम् अस्ति। तत् साधयितुं 'श्रोत्रेद्रियग्राह्यत्वात्' इति हेतुः अस्ति। 'यथा शब्दत्वम्' इति उदाहरणम् अस्ति। तत्प्रतिपक्षत्वेन अन्यः हेतुः अपि वर्तते ''शब्दः अनित्यः, कार्यत्वात्, घटवत्''। इत्थम् 'कार्यत्वात्' इति प्रतिपक्षहेतोः विद्यमानत्वात् 'श्रावणत्वात्' इत्यत्र सत्प्रतिपक्षः हेत्वाभासः।

**पदकृत्यम्** - सत्प्रतिपक्षं लक्षयति-साध्येति। यस्य-हेतोः, साध्याभावसाधकं-साध्याभावस्यानुमापकम्, हेत्वन्तरम्-प्रतिपक्षो हेतुर्विद्यते स हेतुः सत्प्रतिपक्ष इत्यर्थः। अयमेव प्रकरणसम इत्युच्यते। विरुद्धवारणाय हेत्वन्तरं यस्येति। वह्न्यादिवारणाय साध्याभावेति।

**पदकृत्यार्थः** - मूलार्थे पदकृत्ये च स्पष्टप्रायः।

(11) (4) असिद्धः हेत्वाभासः - **असिद्धस्त्रिविधः, आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्चेति।**

(क) आश्रयासिद्धः (ख) स्वरूपासिद्धः (ग) व्याप्यत्वासिद्धः चेति असिद्धहेत्वाभासस्य त्रय प्रकाराः भवन्ति।

**पदकृत्यम्** - असिद्धं विभजते - असिद्ध इति। आश्रयासिद्धाद्यन्यतमत्वमसिद्धत्वम्।

**पदकृत्यार्थः** - मूलार्थे पदकृत्ये च स्पष्टप्रायः।

(11) (4) (क) आश्रयासिद्धः हेत्वाभासः - **आश्रयासिद्धो यथा - गगनारविन्दं सुरभि, अरविन्दत्वात्, सरोजारविन्दवद्। अत्र गगनारविन्दमाश्रयः, स च नास्त्येव।**

उदाहरणरूपेण आश्रयासिद्धः – ''व्योमपद्मं सुगन्धियुक्तम्, पद्मम् अस्ति अतः, सरोवरोत्पन्नकमलवत्''। अत्र हेतुः गगनारविन्दम्, तस्य आश्रयत्वेन गगनं नैव भवति। (तर्हि का कथा सुगन्धेः !) अतोऽत्र 'पद्मम् अस्ति अतः/ अरविन्दत्वात्' इति आश्रयसिद्धः।

**पदकृत्यम्** – आश्रयासिद्धत्वं च पक्षतावच्छेदकाभाववत्पक्षकत्वम्। भवति हि अरविन्दत्वे गगनीयत्वरूपपक्षतावच्छेदकाभाववत्पक्षकत्वम्, अरविन्दरूपरक्षे गगनीयत्वविरहात्। ननु कथमरविन्दे गगनीयत्वविरहोऽत आह–अत्रेति। उपदर्शितानुमान इत्यर्थः।

**पदकृत्यार्थः** – मूलार्थे पदकृत्ये च स्पष्टप्रायः।

(11) (4) (ख) स्वरूपासिद्धः हेत्वाभासः – **स्वरूपासिद्धो यथा – शब्दो गुणः, चाक्षुषत्वात्। अत्र चाक्षुषत्वं शब्दे नास्ति, शब्दस्य श्रावणत्वात्।**

उदाहरणरूपेण स्वरूपासिद्धः – 'शब्दः' इति गुणः अस्ति, चक्षुरिन्द्रियग्राह्यत्वात्। अत्र शब्दः तु श्रोत्रेन्द्रियग्राह्यो भवति। अतः, चक्षुरिन्द्रियग्राह्यत्वं शब्दे न भवति। तस्मात् 'चाक्षुषत्वात्' इत्यत्र स्वरूपासिद्धः हेत्वाभासः अस्ति।

**पदकृत्यम्** – पक्षे हेत्वभावः स्वरूपासिद्धिः। सद्धेत्वभावेऽतिव्याप्तिवारणाय पक्षे इति। घटाभाव वारणाय हेत्वति। सोऽयं स्वरूपासिद्धः–शुद्धासिद्धः–भागासिद्धः–विशेषणासिद्धः–विशेष्यासिद्धभेदेन चतुर्विधः। तत्राद्यस्तु उपदर्शित एव। द्वितीयो यथा – ''उद्भूतरूपादिचतुष्ठ्यं गुणः रूपत्वाद्'', इत्यत्र रूपत्वहेतोः पक्षैकदेशावृत्तित्वेन तस्य भागे स्वरूपासिद्धत्वम्। तृतीयो यथा – ''वायुः प्रत्यक्षः रूपवत्त्वे सति स्पर्शवत्त्वाद्'', इत्यत्र रूपवत्त्वविशेषणस्य वायाववृत्तेस्तद्विशिष्टस्पर्शवत्त्वस्यापि तथात्वेन तस्य स्वरूपासिद्धत्वं निर्वहति, विशेषणाभावे विशिष्टस्यापि अभावात्। तुरीयो यथा – अत्रेव विशेषणविशेष्यवैपरीत्येन हेतुः, तस्य स्वरूपाऽसिद्धत्वं तु विशेष्याऽभावप्रयुक्त-विशिष्टाऽभावादिति बोध्यम्।

**पदकृत्यार्थः** – यदि लक्षणे 'पक्षे' इति पदं न स्थाप्यते चेत् सद्धेत्वभावे लक्षणसङ्गतिः जायेत। शेषार्थः मूलार्थे पदकृत्ये च स्पष्टप्रायः।

(11) (4) (ग) व्याप्यत्वासिद्धः हेत्वाभासः – **सोपाधिको हेतुर्व्याप्यत्वासिद्धः। साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः। साध्यसमानाधिकरणात्यन्ताभावप्रतियोगित्वं साध्यव्यापकत्वम्। साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वं साधनाव्यापकत्वम्। यथा – पर्वतो धूमवान् वह्निमत्त्वादित्यत्र आर्द्रेन्धनसंयोग उपाधिः। तथाहि यत्र धूमस्तत्रार्द्रेन्धसंयोगो नास्ति, अयोगलके आर्न्द्रेन्धनसंयोगाभावादिति साधनाव्यापकत्वम्। एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वाद् आर्द्रेन्धनसंयोग उपाधिः। सोपाधिकत्वाद्वह्निमत्त्वं व्याप्यत्वासिद्धम्।**

उपाधियुक्तः हेतुः व्याप्तत्वासिद्धः इति कथ्यते। तत्र ''यः साध्यस्य व्यापकः सन् साधनस्य अव्यापकः भवति सः 'उपाधिः' इति कथ्यते।'' साध्यस्य यद् अधिकरणं तदेव अधिकरणं (आधारः) यस्य तत् यद् अत्यन्ताभावस्य प्रतियोगि न स्यात्, तत्त्वं, 'साध्यव्यापकत्वम्' इति कथ्यते। यत् साधनवति स्थितस्य अत्यन्ताभावस्य प्रतियोगि तत्त्वं 'साधनाव्यापकत्वम्'। उदाहरणरूपेण – 'पर्वतो धूमवान्, वह्निमत्त्वात्' इत्यत्र आर्द्रैः काष्ठैः सह वह्नेः संयोगः उपाधिः अस्ति। यथा यत्र धूमः स्यात् तत्र वह्नेः आर्द्रेन्धनैः संयोगः भवति, किन्तु यत्र यत्र वह्निः तत्र तत्र आर्द्रेन्धनैः सह तस्य संयोगः स्यादेवेति न। यथा सन्तप्तलोहगोलके आर्द्रेन्धनसंयोगो न भवति, इति साधनाव्यापकता। एवमेव साध्यव्यापकत्वम् अस्ति तथापि साधनाव्यापकत्वकारणात् आर्द्रेन्धसंयोग उपाधित्वेन गृह्यते। अत्र उपाधियुक्तत्वात् 'वह्निमत्वात्' इति हेतुः व्याप्यत्वासिद्धः हेत्वाभासः।

**पदकृत्यम्** – व्याप्यत्वासिद्धं निरूपयति–सोपाधिक इति। ननु कोऽयमुपाधिरत आह–साध्येति। ''साधनाव्यापक उपाधिः'' इत्युक्ते ''शब्दोऽनित्यः कृतकत्वाद्'', इत्यत्र सामान्यवत्त्वे सत्यस्मदादिबाह्येन्द्रियग्रहणार्हत्वम् अप्युपाधिः स्यात्, तदर्थं साध्यव्यापकत्वमुक्तम्। तावत्युक्ते सामान्यवत्वादिनाऽनित्यत्वसाधने कृतकत्वमुपाधिः स्यात्तदर्थं साधनाव्यापकत्वमुक्तम्। उपाधिभेदमादायासम्भववारणाय व्यापकत्वशरीरेऽप्यत्यन्तपदमादेयम्। साधनभेदमादाय साधनस्योपाधित्ववारणायाव्यापकत्वशरी–रेऽपि अत्यन्तपदमवश्यं देयम्। सोऽयमुपाधिस्त्रिविधः, केवलसाध्यव्यापकः, पक्ष–धर्मावच्छिन्न–साध्यव्यापकः, साधनावच्छिन्नसाध्यव्यापकश्चेति। तत्राद्य उपदर्शितः। एवं ''क्रत्वन्तर्वर्तिनी हिंसा

अधर्मजनिका, हिंसात्वात्, क्रतुबाह्यहिंसावद्'' इत्यत्र निषिद्धत्वमुपाधिः साधनाऽव्यापकः, क्रतुहिंसायां निषिद्धत्वस्याभावात्। ''न हिंस्यात् सर्वभूतानि'' इति सामान्यवाक्यतः ''पशुना यजेत्'' इत्यादिविशेषवाक्यस्य बलीयत्वात्। अतो हिंसात्वं नाधर्मजनकत्वे प्रयोजकमपि तु निषिद्धत्वमेवेत्यादिकमपि द्रष्टव्यम्। द्वितीयो यथा - ''वायुः प्रत्यक्षः, प्रत्यक्षस्पर्शाश्रयत्वात्'', इत्यत्रोद्भूतरूपवत्त्वमुपाधिः। तस्य यत्र प्रत्यक्षत्वं तत्रोद्भूतरूपवत्त्वम् इति न केवलसाध्यव्यापकत्वम्, रूपे व्यभिचारात्। किन्तु द्रव्यत्वलक्षणो यः पक्षधर्मस्तदनवच्छिन्नबहिःप्रत्यक्षत्वं यत्र, तत्रोद्भूतरूपवत्त्वमिति पक्षधर्मावच्छिन्नसाध्यव्यापकत्वमेव। आत्मनि व्यभिचार-वारणाय बहिः पदम्। यत्र प्रत्यक्षस्पर्शाश्रयत्वं यत्र नोद्भूतरूपवत्त्वमिति साधनाव्यापकत्वं च वायौ, तत्रोद्भूतरूपविरहात्। तृतीयो यथा - ''ध्वंसो विनाशी जन्यत्वात्'' इत्यत्र भावत्वमुपाधिस्तस्य ''यत्र विनाशित्वं तत्र भावत्वम्'' इति न केवलसाध्यव्यापकत्वम्, प्रागभावे भावत्वविरहात्, किन्तु जन्यत्वरूपसाधना-वच्छिन्नविनाशित्वं यत्र, तत्र भावत्वमिति साधनावच्छिन्नसाध्यव्यापकत्वमेव। यत्र जन्यत्वं तत्र भावत्वमिति साधनाव्यापकत्वं च ध्वंसे, तत्र भावत्वविरहात्। एवं ''स श्यामो मित्रातनयत्वाद्'' इत्यत्र शाकपाकजन्यत्वमुपाधिः, श्यामत्वस्य नीलघटेऽपि सत्त्वान्न केवलसाध्याव्यापकत्वम्, किन्तु साधनावच्छिन्निसाध्यव्यापकत्वमेव। अष्टमे पुत्रे शाकपाकजन्यत्वविरहेण साधनाव्यापकत्वं चेत्यादिकमपि द्रष्टव्यम्।

**पदकृत्यार्थः** - मूलार्थे पदकृत्ये च स्पष्टप्रायः।

(11) (5) बाधितः हेत्वाभासः - **यस्य साध्याभावः प्रमाणान्तरेण पक्षे निश्चितः, स बाधितः। यथा - वह्निरनुष्णो द्रव्यत्वादिति। अत्रानुष्णत्वं साध्यम्, तदभाव उष्णत्वं स्पर्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम्।**

यस्य हेतो साध्याभावः अन्येन प्रमाणेन पक्षे निश्चितः भवति सः बाधितः हेत्वाभासः इति कथ्यते। यथा - ''वह्निः (अनुष्णः) उष्णो न भवति, द्रव्यत्वात्।'' अत्र साध्यम्, उष्णतारहितत्वम्। तस्य (साध्यस्य अनुष्णत्वस्य) अभावः अर्थात् उष्णत्वम्, त्वगिन्द्रियप्रत्यक्षद्वारा (स्पर्शद्वारा) ज्ञायते। अतः अत्रोदाहरणे बाधितः हेत्वाभासः अस्ति।

**पदकृत्यम्** - यस्येति। सद्धेतुवारणाय प्रमाणान्तरेणेति घटादिवारणाय साध्येति।

**पदकृत्यार्थः** - मूलार्थे पदकृत्ये च स्पष्टप्रायः।

**॥ तर्कसंग्रहेऽनुमानपरिच्छेदः ॥**

(12) उपमितिकरणमुपमानम्। - **संज्ञासंज्ञिसम्बन्धज्ञानमुपमितिः। तत्करणं सादृश्यज्ञानम्। अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः। तथाहि - कश्चिद् गवयपदार्थमजानन् कुतश्चदारण्यपुरुषाद् गोसदृशो गवय इति श्रुत्वा वनं गतो गोसदृशपिण्डं पश्यन् वाक्यर्थं स्मरति, तदनन्तरमसौ गवयशब्दवाच्य इत्युपमितिरुत्पद्यते।**

उपमितेः करणम् = असाधारणकारणम् उपमानम् इति कथ्यते। संज्ञासंज्ञिनोः अर्थात् पदपदार्थयोः यः सम्बन्धः भवति, तस्य ज्ञानम् उपमितिः अस्ति। तस्याः उपमितेः करणम् = असाधारणकारणं सादृश्यज्ञानम्/तुल्यताज्ञानम् अस्ति। (तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वम् इति सादृश्यम्। तत् कवयः मुखचन्द्रादिद्वारा वर्णयन्ति।) यथा - केनचित् जनेन गवयपदार्थः न ज्ञायते। सः कञ्चित् आरण्यकं (ग्रामीणं वा) पुरुषं पृच्छति 'गवयः कीदृशो भवति ?' तदानीं सः आरण्यकः तं गोपदार्थज्ञापनपूर्वकं ''गोसदृशः गवयः भवति'' इति बोधयति। ततः अदृष्टगवयः अपि जनः वनं गत्वा गोसदृशं किन्तु गोः किञ्चित् एव भिन्नं पिण्डं (पशुं) दृष्ट्वा आरण्यकेन वर्णितं गवयं स्मरति निर्णयं च करोति यत्, 'अयमेव गवयः' इति अनुमितिः उत्पन्ना भवति।

**पदकृत्यम्** - अवसरसङ्गतिमभिप्रेत्यानुमानानन्तरमुपमानं निरूपयति-उपमितीति। उपमितेः करणमुपमानमित्यर्थः। कुठारादिवारणाय मितीति। प्रत्यक्षादिवारणाय उपेति। संज्ञासंज्ञीति। अनुमित्यादिवारणाय सम्बन्धेति। संयोगादिवारणाय संज्ञासंज्ञीति। असौ गवयपदवाच्य इति। अभिप्रेतो गवयो गवयपदवाच्य इत्यर्थः। तेन गवयान्तरे शक्तिग्रहाभावप्रसङ्ग इति दूषणमपास्तम्। तथा च गोसदृश्यविशिष्टपिण्डज्ञानं करणम्। अतिदेशवाक्यार्थस्मरणमवान्तरव्यापारः। उपमितिः फलमिति सारम्।

तच्चोपमानं त्रिविधम्, सादृश्यविशिष्टपिण्डज्ञानम्, असाधारणधर्म-विशिष्टपिण्डज्ञानम्,

वैधर्म्यविशिष्टपिण्डज्ञानञ्च। तत्राद्यमुक्तमेव। द्वितीयं यथा – ''खड्गमृगः कीदृक् ?'' इति पृष्टे नासिकालसदेकश्रृङ्गो ऽनतिक्रान्तगजाकृतिश्च इति तज्ज्ञातृभ्यः श्रुत्वा कालान्तरे तादृशं पिण्डं पश्यन्नतिदेशवाक्यार्थं स्मरति, तदनन्तरं खड्गमृगः खड्गमृगपदवाच्य इत्युपमितिरुत्पद्यते। अत्र नासिकालसदेकश्रृङ्ग एवासाधारणधर्मः। तृतीयं यथा – ''उष्ट्रः कीदृकः ?'' इति पृष्टे ? ''अश्वादिवदसमानपृष्टो न ह्रस्वग्रीवशरीरश्च'' इति आप्तोक्ते कालान्तरे तत्पिण्डदर्शनाद्वैधर्म्यविशिष्टपिण्डज्ञानम्, ततोऽतिदेशवाक्यार्थस्मरणम् तत् ''उष्ट्रपदवाच्य'' इत्युपमितिरुपद्यते।

**पदकृत्यार्थः** – उपमितिकरणम् उपमानम् इति।

यदि 'उपकरणम् उपमानम्' इति लक्षणं कुर्मः तर्हि च्छेदनक्रियायाम् उपकरणत्वेन स्थिते 'कुठारे' अपि अतिप्रसक्तिः भविष्यति। तस्याः अतिप्रसक्तेः वारणाय लक्षणे 'मिति' इति आवश्यकम् अस्ति।

यदि 'मितेःकरणम् उपमानम्' इति लक्षणं कुर्मः तर्हि मितेः = ज्ञानस्य करणानि प्रत्यक्षदीनि अपि समाविष्टानि भवेयुः। तस्मात् करणात् 'उप' इति आवश्यकम्।

यदि 'संज्ञासंज्ञिज्ञानम् उपमितिः' इति लक्षणं कुर्मः तर्हि 'संज्ञासंज्ञि'–इत्यनेन पदपदार्थयोः ग्रहणम् अस्ति। तयोः ज्ञानं तु अनुमित्यादिभिः – अपि शक्यम्। अतः उमितेः लक्षणे 'सम्बन्ध' इति पदस्य समावेशः आवश्यकः अस्ति।

यदि 'सम्बन्धज्ञानम् उपमितिः' इति लक्षणं कुर्मः तर्हि सम्बन्धज्ञानं तु संयोगादिभिः – अपि भवति। अतः तत्र अतिव्याप्तिः मा भूत् तदर्थं 'संज्ञासंज्ञि–' इति आवश्यकम्।

उपमानं त्रिविधं भवति। (क) सादृश्यविशिष्टपिण्डज्ञानम् (ख) असाधारणधर्मविशिष्टपिण्डज्ञानम् (ग) वैधर्म्यविशिष्टपिण्डज्ञानं चेति।

(क) सादृश्यविशिष्टपिण्डज्ञानं तु ''गोसदृशोगवयः'' इत्यनेन ज्ञायते।

(ख) असाधारणधर्मविशिष्टपिण्डज्ञानं केनचित् ''खड्गमृगः कीदृशः ?'' इति पृष्टे ''नासिकालसदेकश्रृङ्गः, गजसमाकृतिर्जीवः'' इति खड्गज्ञातारः भन्ति तेभ्यः श्रुत्वा कालान्तरे तादृशं पिण्डं दृष्टवादेशान्तरे स्थितः अपि जनः स्मरति। ततः खड्गमृगे ''अयं खड्गमृगपदवाच्यः'' इति उपमितिः उत्पद्यते। अत्र खड्गस्य नासिकास्थितम् एकश्रृङ्गम् एव असाधारणधर्मत्वेन (तादृशम् अन्यत्र न दृश्यते) अस्ति।

(ग) वैधर्म्यविशिष्टपिण्डज्ञानं तद् उच्यते, कश्चित् उष्ट्रम् अजानन् जनः ''उष्ट्रः कीदृशः ?'' इति प्रश्नं करोति तदानीं उष्ट्रपदार्थज्ञातारः ''अश्वसमः किन्तु तत्समानपृष्ठः न, ह्रस्वग्रीशरीरः च न सः उष्ट्रः'' इति वर्णयन्ति। कालान्तरे सः यथाश्रुतपिण्डदर्शनात् अश्वादिवैधर्म्यात् (भिन्नत्वाद्) उष्ट्रज्ञातृभिः वर्णितं पिण्डवर्मनं स्मरति। ततः ''असौ उष्ट्रः'' इति उपमितिः उत्पद्यते॥

## ॥ अथ शब्दखण्डः॥

(13) शब्दस्य स्वरूपादिविवरणम् – **आप्तवाक्यं शब्दः। आप्तस्तु यथार्थवक्ता। वाक्यं पदसमूहः। यथा गामानयेति। शक्तं पदम्। अस्मात् पदादयमर्थो बोद्धव्य इतीश्वरसंङ्केतः शक्तिः।**

आप्तस्य अभिजनाभियुक्तादेः वाक्यं शब्द इति कथ्यते। लक्षणम्, 'यथार्थवक्ता' (यथा युधिष्ठिरः कदापि असत्यं नैव वदति इतिवत् ('नरो वा कुञ्जरो वा' इति तु व्यभिचारः अपवादो वा)। अनेकेषां पदानां समूहः 'वाक्यम्' इति कथ्यते, यथा 'गाम् आनय'। यत्र (अर्थबोधिका कारकार्थादिसमन्विता) शक्तिः भवति तत् 'पदम्' इति उच्यते। यथा 'गाम् आनय' इत्यत्र 'गाम' इति सुबन्तपदम्, 'आनय' इति तिङ्गन्तपदम्। 'अस्मात् पदाद् अयम् अर्थः बोद्धव्यः' इति अनादिकालात् शब्दनाम् अर्थाः निश्चिताः। तत्र ईश्वरसङ्केतः शक्तिः इति कथ्यते॥

**पदकृत्यम्** – अवसरसङ्गतिमभिप्रेत्योपमानानन्तरं शब्दं निरूपयति–आप्तेति। शब्द इति। शब्दप्रमाणमित्यर्थः। भ्रान्तविप्रलम्भकयोर्वाक्यस्य शब्दप्रमाणत्ववारणाय आप्तेति। ननु कोऽयमाप्त इत्यत आह–आप्तस्त्विति। यथार्थवक्ता–यथाभूताबाधितार्थोपदेष्टा। वाक्यं लक्षयतिवाक्यमिति। घटादिसमूहवारणाय पदेति। शक्तमिति। निरूपकतासम्बन्धेन शक्तिविशिष्टमित्यर्थः। अस्मादीति। घटपदाद् घटरूपोऽर्थो बोद्धव्य इतीश्वरेच्छैव शक्तिरित्यर्थः। अर्थ स्मृत्यनुकूलपदपदार्थसम्बन्धत्वं तल्लक्षणम्। शक्तिरिव लक्षणापि पदवृत्तिः। अथ केयं लक्षणा ? उच्यते, शक्यसम्बन्धो लक्षणा। स च त्रिधा–जहदजहज्जहदजहद्भेदात्। वर्त्तते च गङ्गायां घोष इत्यत्र गङ्गापदशक्यप्रवाहसम्बन्धस्तीरे।

लक्षणाबीजं च तात्पर्यानुपपत्तिः। अत एव प्रवाहे घोषतात्पर्यानुपपत्तेस्तीरे लक्षणा सेत्स्यति। ''छत्रिणो यान्ति'' इत्यादौ द्वितीया। ''सोऽयमश्व'' इत्यादौ तृतीया।

**पदकृत्यार्थः** - उपमानारम्भे संज्ञासंज्ञिज्ञानम् (शब्दार्थज्ञानम्) इति यद् उक्तम्, तस्मिन् सन्दर्भे 'शब्दः कः ?' अर्थः कः ? कतिविधः ? इति जिज्ञासायाः उत्पत्तिः एव अवसरः। तस्य सङ्गतेः अभिप्रायः अत्र वर्तते।

यदि 'वाक्यं शब्द' इत्येव लक्षणं कुर्मः तर्हि वाक्यस्य भेदयोः भ्रान्तः (भ्रमयुक्तः) विप्रलम्भकयोः (वञ्चकः) शब्दे ग्रहणं भविष्यति। अर्थात् तत्र अतिव्याप्तेः वारणाय: 'आप्तः' इति पदम् आवश्यकम्।

यथार्थवक्ता = सत्यभाषी भवति तथा च व्यवधान/बाधा-रहितस्य अर्थस्य उपदेशकः भवति।

'पदसमूहो वाक्यम्' इत्यत्र यदि 'समूहः वाक्यम्' इति लक्षणं कुर्मः तर्हि घटादिसमूहे लक्षणं गमिष्यति तन्निवारणाय 'पद'-इति आवश्यकम्।

(क) 'शक्तिः' इति प्रथमा (ख) लक्षणा इति द्वितीयाः, इमे द्वे शब्दस्य शक्ती स्तः।

(क) यस्य पदस्य (शब्दस्य) श्रवणेन स्मृतिफलके या (यस्य वा) आकृतिः दृश्यते, सः तस्य अर्थः भवति। सः सङ्केतितः वंशादिपरम्परानुसारम् आसमन्तात् वातावरणानुसारं वा 'अयं गौः' इति आबाल्याद् संस्कारः भवति। तत्र शक्तिः (या साहित्यशात्रे 'अभिधा' इति ख्याता) अस्ति। तस्याः अर्थः 'शक्यार्थः' इति कथ्यते।

(ख) 'शक्यसम्बन्धो लक्षणा' इति द्वितीयस्याः शब्दशक्तेः लक्षणम्। एतस्याः त्रयः प्रकाराः सन्ति, (अ) जहल्लक्षणा-यत्र स्वस्य अर्थस्य त्यागः भवति, यथा गङ्गायां घोष इत्यत्र 'गङ्गा' शब्दं श्रुत्वा जलप्रवाहरूपस्य अर्थस्य स्मरणं भवति, अतः सः शक्यार्थः अस्ति। तस्य सम्बन्धः 'तीरे' अस्ति, किन्तु 'तीर' इति पदाभावेऽपि तस्य किमर्थं ग्रहणम् ? तत्रोत्तरम्, 'तात्पर्यानुपपत्तिः लक्षणाबीजम्' इति। घोषस्य जलप्रवाहे असम्भवत्वात् 'अनुपपत्तिः' इति। अतः 'शक्यार्थसम्बन्धो लक्षणा' इति सुसङ्गतम्। (इ) अजहल्लक्षणा-यत्र स्वस्य अर्थस्य त्यागः न भवति, यथा - छत्रिणो यान्ति इत्यत्र छत्रधारिणः पुरुषाः इति अर्थस्य त्यागः केवलं छात्राणि यातुम् असमर्थानि इति अनुपत्तिः, तस्मात् लक्षणसङ्गतिः (उ) जहदजहल्लक्षणा-यत्र प्रत्यभिज्ञा = पूर्वानुभूतादिस्मरणद्वारा कस्यचिद् अर्थस्य त्यागः भवति कस्यचिद् न भवति, आरोपो वा भवति; यथा - सः अयम् अश्वः इत्यत्र सः चेद् अयं न अथवा यः पूर्ववर्णितः दृष्टो वा, सः इत्यनेन कः इति वाक्ये नोक्तम्... इत्यादि स्पष्टम्॥

(14) वाक्यार्थज्ञाने हेतवः तेषां लक्षणानि च - **आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञानहेतुः। पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वम् आकाङ्क्षा। अर्थाबाधो योग्यता। पदानामविलम्बेनोच्चारणं सन्निधिः। आकाङ्क्षादिरहितं वाक्यमप्रमाणम्। यथा गोरश्वः पुरुषो हस्तीति न प्रमाणम्, आकाङ्क्षाविरहात्। अग्निना सिञ्चतीति न प्रमाणं, योग्यताविरहात्। प्रहरे प्रहरेऽसहोच्चारितानि गामानयेत्यादिपदानि न प्रमाणं, सान्निध्याभावात्।**

वाक्यस्य अर्थस्य ज्ञाने हेतुभूतम्/बीजभूतम् एतत् त्रयम् अस्ति, (अ) आकाङ्क्षा (इ) योग्यता (उ) सन्निधिः चेति।

(अ) का नाम आकाङ्क्षा ? वाक्ये स्थितस्य एकस्य पदस्य अन्येन पदेन सह अन्वयसङ्घटना एव आकाङ्क्षा।

(इ) का नाम योग्यता ? परस्परं पदानाम् अन्वयः भवति किन्तु अर्थस्य बाधः मा भूत्, इति तादृशं वाक्यं योग्यतायुक्तम् इति बोध्यम्।

(उ) पदानाम् उच्चारणे क्रमशः योग्यम् आवश्यकं च कालान्तरं 'सन्निधि' इति कथ्यते आकाङ्क्षायोग्यतासन्निधिरहितं वाक्यं प्रमाणं न भवति।

(अ) यथा गौः अश्वः पुरुषः हस्ती इत्यत्र पदसमूहः अस्ति अतः वाक्यलक्षणानुसारम्, किन्तु अत्र आकाङ्क्षा पूर्णा न भवति, अतः इदम् अप्रमाणम्।

(इ) यथा अग्निना सिञ्चति इति वाक्यम् अप्रमाणम्, कारणम्, 'अग्निना' इति पदस्य 'सिञ्चति' इति पदान्तरेण अन्वयसंघटना न भवति अतः योग्यता नास्ति।

(उ) यथा प्रातः केवलं 'गाम्' इति उच्चारितम्, सायं च पुनः 'आनय' इति उच्चार्यते चेत् प्रातः उच्चारितस्य 'गाम्' इत्यस्य 'आनय' इत्यनेन सह सान्निध्यं सामीप्यं न भवति, अतः इदम् अपि अप्रमाणम्।

**पदकृत्यम्** - पदस्येति। असम्भववारणाय पदान्तरव्यतिरेकप्रयुक्त इति। पुनरसम्भववारणाय पदान्तरेति। अर्थेति। आकाङ्क्षावारणाय अर्थेति। पदानामिति। असहोच्चारितेष्वतिव्याप्तिवारणाय अविलम्बेनेति। आकाङ्क्षावारणाय पदानामिति। आकाङ्क्षादिशून्यवाक्यस्याऽत्र प्रमाणत्वं निषेधयति-तथा चेति। आकाङ्क्षादिकं शाब्दहेतुरित्युक्ते चेत्यर्थः। अनाकाङ्क्षाद्युदाहरणं दर्शयति-यथेति।

**पदकृत्यार्थः** - (अ) यदि 'पदस्य अन्वयाननुभावकत्वम्' इत्येतावत् एव आकाङ्क्षायाः लक्षणं कुर्मः तर्हि 'असम्भव' इत्याख्यः लक्षणदोषः भवति। अस्य दोषस्य निवारणाय 'पदान्तरव्यतिरेकप्रयुक्त' - इति आवश्यकम्। तथा च यदि तत्रैव पुनः 'पदान्तर' इति निष्कासयामः तर्हि अपि 'असम्भव' इति दोषः भवति। अतः तन्निवारणाय 'पदान्तर' इति आवश्यकम्।

(इ) यदि योग्यतायाः लक्षणे 'अबाधो योग्यता' तदानीं 'कस्य अबाधः ?' इति आशङ्का भवति। अतः तस्याः निवारणाय 'अर्थ-' इति आवश्यकम्।

(उ) यदि सन्निधिलक्षणे 'अविलम्बेन' इति पदं न स्थापयामः तर्हि असहोच्चारितेषु शब्देषु अतिव्याप्तिः भविष्यति। यदि 'अविलम्बेन उच्चारणम्' इत्येव लक्षणं कुर्मः तर्हि 'केषाम्' ? इति शङ्का भवति। तस्मात् कारणात् 'पदानाम्' इति आवश्यकम्।

(15) वाक्यप्रकारादिविवरणम् - **वाक्यं द्विविधम्, वैदिकं लौकिकं च। वैदिकमीश्वरोक्तत्वात् सर्वमेव प्रमाणम्। लौकिकं त्वाप्तोक्तं प्रमाणम्। अन्यदप्रमाणम्। वाक्यार्थज्ञानं शाब्दज्ञानं, तत्करणं शब्दः।**

वाक्यस्य द्वौ भेदौ भवतः (अ) वैदिकवाक्यम् (इ) लोकिकवाक्यम् चेति। तत्र,

(अ) वैदिकम् ईश्वरेण उक्तम् अस्ति, तस्मात् कारणात् सर्वमेव प्रामाणिकम् भवति।

(इ) लौकिकवाक्यं यदि यथार्थवक्त्रा (यथार्थवेत्त्रा च) उक्तं चेत् तदेव प्रमाणम्। यदि अन्यः कश्चिद् यथार्थद्रष्टा यथार्थवेत्तापि भवेत् किन्तु आप्तः न भवेत् चेद् तदुक्तं वाक्यम् अप्रमाणम्। वाक्यप्रत्यक्षानन्तरम् (श्रवणानन्तरम्) अर्थज्ञानं भवति, अतः तद् (तस्येदम् = अर्थः) शब्दस्य इदं शाब्दज्ञानम्, शाब्दबोधः इत्यर्थः। शाब्दबोधस्य असाधारणं कारणं शब्दः अस्ति।

**पदकृत्यम्** - नन्वेतावता शब्दसामग्री प्रपञ्चिता। प्रमाविभाजकवाक्ये शाब्दस्याप्युद्दिष्टत्वेन तत्कुतो न प्रदर्शितमित्यत आह-वाक्यार्थेति। शाब्दत्वं च ''शब्दात् प्रत्येमि'' इत्यनुभवसिद्धा जातिः। शाब्दबोधक्रमो यथा - ''चैत्रो ग्रामं गच्छति'' इत्यत्र ''ग्रामकर्मकगमनानुकूलवर्तमानकृतिमांश्चैत्रः'', इति शाब्दबोधः। द्वितीयायाः कर्मत्वमर्थः। धातोर्गमनम्। अनुकूलत्वं च संसर्गमर्यादया भासते। लटो वर्तमानत्वमाख्यातस्य कृतिः। तत्सम्बन्धः संसर्गमर्यादया भासते। ''रथो गच्छति'' इत्यत्र ''गमनानुकूलव्यापारवान् रथः'' इति शाब्दबोधः। ''स्नात्वा गच्छति'' इत्यत्र ''गमनप्रागभावावच्छिन्नकालीनस्नानकर्ता गमनानुकूवर्तमानकृतिमान्'' इति शाब्दबोधः। क्त्वाप्रत्ययस्य कर्ता पूर्वकालीनत्वं चार्थः एवमन्यत्रापि वाक्यार्थो बोध्यः।

**पदकृत्यार्थः** - ''वाक्यार्थज्ञानं शाब्दज्ञानम्'' शाब्दज्ञानस्य असाधारणकारणं शब्दः अस्ति। ''शब्दात् प्रत्येमि'' अर्थात् शब्दाद् ज्ञानं प्राप्नोमि, इति अनुभवसिद्धजातिः शाब्दत्वं भवति। ''चैत्रो ग्रामं गच्छति'' इत्यत्र कर्ता चैत्रः अस्ति। ग्रामप्राप्तिः इति लक्ष्यम् अस्ति। गच्छति इति वर्तमानकालीनक्रिया अस्ति। अत्र इत्थं शाब्दबोधः भवति ''वर्तमानकालीनं चैत्रकर्तृकं ग्रामप्राप्तिलक्ष्यकं गमनम्'' इति वैयाकरणानां शाब्दबोधप्रक्रिया। अत्र पुनः ''गमनानुकूलव्यापारवान् चैत्रः'' इति शाब्दबोधः भवति इति नैयायिकानां शाब्दबोधप्रक्रिया। अर्थात् वाक्ये: 'चैत्र' इत्यस्य प्रथमैकवचने 'सु' इत्यस्य 'कर्ता' इत्यर्थः। 'ग्राम' इत्यत्र द्वितीयैकवचने 'अम्' प्रत्ययस्य कर्मत्वम् अर्थः अस्ति। 'गम्' धातोः गमनम् अर्थः, अर्थात् उत्तरदेशसंयोगानुकूलव्यापारः। यस्मिन् अनुकूलत्वम् संसर्गसम्बन्धमर्यादया भासितं भवति। 'गच्छति' इत्यस्मिन् प्रयुक्त-लट्-लकारेण वर्तमानत्वम्, आख्यानम् ('तिप्') इत्यस्य कृतिः अर्थः। तत्सम्बन्धः संसर्गमर्यादया भासेते। एवम्, अन्यत्रापि वाक्यार्थः बोद्धव्यः/शाब्दबोधः कर्तव्यः॥

## ॥ अथावशिष्टगुणादिखण्डः ॥

(16) अनुभवस्य सभेदं निरूपणम् - **अयथार्थानुभवस्त्रिविधः, संशयविपर्ययतर्कभेदात्। एकस्मिन् धर्मिणि**

**विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः। यथा स्थाणुर्वा पुरुषो वेति। मिथ्याज्ञानं विपर्ययः। यथा शुक्ताविदं रजतमिति। व्याप्यारोपेण व्यापकारोपस्तर्कः। यथा यदि वह्निर्न स्यात्तर्हि धूमोऽपि न स्यादिति।**

अयथार्थस्य अनुभस्य प्रकाराः सन्ति (अ) संशयः (इ) विपर्ययः (उ) तर्कः चेति। तत्र, (अ) एकस्मिन् एव धर्मिणि विरोधिनः विविधाः धर्माः विशिष्टरूपेण भासन्ते। तादृशं ज्ञानं संशयः इति कथ्यते। उदाहरणम् – 'अयं स्थाणुः अस्ति पुरुषो वा अस्ति ?' इत्यादिवत्।

(इ) एकस्मिन् एव धर्मिणि यद् नास्ति तस्यैव (सादृश्यात्) ज्ञानं भवति तद् 'विपर्ययः' इति कथ्यते। यथा – शङ्ख-शुक्तिदर्शनं कृत्वा 'इदं रजतम्' इति विपर्ययः।

(उ) व्याप्यस्य (न्यूनदेशवृत्तेः आरोपद्वारा व्यापकारोपः भवति सः 'तर्कः' इति कथ्यते। यथा – यदि वह्नि न स्यात्; तर्हि धूमः अपि न स्यात्, इत्यत्र अग्न्यभावरूपेण व्याप्यारोपेण धूमाभावरूपः व्यापकारोपः अस्ति, अतः इदं तर्कस्य उदाहरणम्।

**पदकृत्यम्** - अयथार्थानुभवं विभजते-अयथार्थेति। संशयं लक्षयति-एकस्मिन्निति। एकस्मिन् धर्मिणि - एकस्मिन्नेव पुरोवर्तिनि पदार्थे, विरुद्धाः-व्यधिकरणा ये नानाधर्माः-स्थाणुत्वपुरुषत्वादयस्तेषां वैशिष्टयम्-सम्बन्धः, तदवगाहि ज्ञानं संशय इत्यर्थः। घटपटाविति समूहालम्बनज्ञानस्य घटत्वपटत्वरूपविरुद्धनानाधर्मवैशिष्टयावगाहित्वादतिप्रसक्तिवारणाय एकस्मिन्निति। घटः पृथिवीति ज्ञानस्यैकस्मिन् धर्मिणि घटे घटत्वपृथिवीत्वरूपनानाधर्मवैशिष्ठ्यावगाहित्वादतिप्रसङ्गवारमाय विरुद्धेति। पटत्वविरुद्धघटत्ववान् घट इति ज्ञानेऽतिप्रसक्तिवारणाय नानेति। मिथ्येति। यथार्थज्ञानवारणाय मिथ्येति। अयथार्थवारणाय ज्ञानेति। तर्कं लक्षयति - व्याप्यारोपेणेति। असम्भववारणाय व्याप्यारोपेणति। पुनरसम्भव-वारणाय व्यापकारोप इति। अत्र वह्न्यभावो व्याप्यः, धूमाभावो व्यापकः। यद्यपि तर्कस्य विपर्ययात्मकत्वेन पृथिग्विभागोऽनुचितस्तथापि प्रमाणानुग्राहकत्वात् स उदिति इति बोध्यम्।

स्वप्नस्तु पुरीतद्वहिर्देशान्तर्देशयोः सन्धौ इडानाड्यां वा मनसि स्थितेऽदृष्टविशेषण धातुदोषेण वा जन्यते, स च मानसविपर्ययान्तर्भूतः।

**पदकृत्यार्थः** - (अ) संशयः। घटपटौ अर्थात् घटः च पटः च, इति समूहालम्बज्ञाने घटत्वपटत्वरूप-बहुविध-विरुद्धर्माणां सम्बन्धस्य अवगाहनेन लक्षणस्य अतिव्याप्तिः भवति। अतः तस्याः निवारणाय 'एकस्मिन्' इति पदम् आवश्यकम्।

'घटपदौ' इत्यत्र द्वौ धर्मिणौ स्तः, तस्मात् कारणात् अतिव्याप्तिः न भवति। ''घटः पृथीवी'' इत्यस्य ज्ञानस्य एकस्मिन् धर्मिणि घटे घटत्वम् अस्ति। तथा च अन्यस्मिन् धर्मिणि पृथिव्यां पृथिवीत्वम् अस्ति। इत्थम्; अनेकधर्मसम्बन्धावगाहनात् भाव्यमानस्य अतिव्याप्तिदोषस्य निवारणाय 'विरुद्ध-' इत्यस्य ग्रहणम् आवश्यकम्। कारणम्, घटरूपधर्मिणि घटत्वेन सह पृथिवीत्वधर्मः अपि भवति। तस्मात् परस्परं विरुद्धधर्मो न दृश्यते।

पटत्वविरुद्ध-घटत्ववान् घटः। अर्थात्, पटत्वात् विरुद्ध-घटत्वधर्मवान् घटः अस्ति इत्यस्मिन् ज्ञाने लक्षणस्य अतिव्याप्तिवारणाय 'नाना' इति पदं स्थापितम् अस्ति।

(इ) विपर्ययः। यथार्थज्ञानस्य अपि इदं लक्षणं मा भूत् तदर्थं 'मिथ्या' इति पदं प्रदत्तम् अस्ति। 'मिथ्या विपर्ययः' इत्येव लक्षणं कुर्मः तर्हि अयथार्थानुभवे अतिव्याप्तिः भविष्यति। अतः तस्याः निवारणाय 'ज्ञान-' इति पदम् आवश्यकम्।

(उ) तर्कः। यदि 'व्यापकारोपः तर्कः' इत्येव लक्षणं कुर्मः तर्हि 'अस्म्भव-' इत्याख्यः दोषः भविष्यति। तस्य वारणाय 'व्याप्यारोपेण' इति पदम् आवश्यकम्। पुनः भाव्यमानस्य असम्भवदोषस्य निवारणाय 'व्यापकारोपः' इति पदम् आवश्यकम्। यथा ''यदि वह्निर्न स्यात्। तर्हि धूमोऽपि न स्यात्'' इत्यत्र वह्न्यभावः व्याप्यः अस्ति तथा च धूमाभावः व्यापकः अस्ति। अतः इदं वाक्यं तर्कस्य उदाहरणं भवति। विपर्ययात्मकत्वात् तर्कस्य पृथक् ग्रहणं कृतम् अस्ति, तद् व्यर्थम्; तथापि प्रमाणानाम् अनुग्राहकत्वात् फलतः इत्थम् उक्तम् अस्ति। स्वप्नः किमर्थम् अयथार्थानुभवः नास्ति ? इति प्रश्ने जाते सति इदं समाधानं यत्; 'पुरीतत्' इत्याख्या नाड्याः बहिर्देशान्तरदेशयोः सन्धौ, इडानाड्यां,

मनसि स्थिते वा, अदृष्टविशेषेण धातुगतदोषेण वा स्वप्नः उत्पद्यते। तस्य (स्वप्नस्य) च मानसविपर्यये अन्तर्भावः भवति। अतः स्वप्नः अयथार्थानुभवः नास्ति।

(17) स्मृतेः द्वैविध्यम् - **स्मृतिरपि द्विविधाः; यथार्था अयथार्था च। प्रमाजन्या यथार्था। अप्रमाजन्या अयथार्था।**

स्मृतेः अपि भेदद्वयम् अस्ति, (अ) यथार्थस्मृतिः (इ) अयथार्थस्मृतिश्चेति (अ) या स्मृतिः प्रमाद्वारा उत्पन्ना भवति, सा यथार्था भवति। (इ) यस्याः स्मृतेः उत्पत्तिः अप्रमया भवति सा अयथार्था भवति।

(18) सुखलक्षणम् - **सर्वेषामनुकूलतया वेदनीयं सुखम्।** सर्वात्मनाम् अनुकूलता यथा स्यात्तथा वेद्यं यद् भवति तत् 'सुखम्' इति कथ्यते॥

**पदकृत्यम्** - सुखं निरूपयति-सर्वेषामिति। सर्वात्मनामनुकूलमिति वेद्यं यत्तत्सुखमित्यर्थः। ''अहं सुखी'' इत्यनुभवसिद्धसुखत्वजातिमत्, धर्ममात्रासादारणकारणो गुणो वा सुखम्। शत्रुदुःखवारणाय सर्वेषामिति॥

**पदकृत्यार्थः** - ''अहं सुखी अस्मि'' इति अनुभवसिद्धजातिमत् धर्ममात्रं वा यस्य असाधारणकारणं स्यात् सः गुणविशेषः 'सुखम्' इति कथ्यते। यदि 'सर्वेषाम्' इति पदं लक्षणात् अपाकुर्मः तर्हि शत्रुदुःखे अतिव्यप्तिः भविष्यति। तस्याः निवारणाय 'सर्वेषाम्' इति पदम् आवश्यकम्। कारणम्; शत्रुषु जायमानं दुःखम् अपि व्यक्तये अनुकूलवेदनीयं भवति। तस्मात् कारणात् यथोक्तक्षणम् एव ग्रहणीयम्।

(19) दुःखलक्षणम् - **प्रतिकूलतया वेदनीयं दुःखम्।**

**पदकृत्यम्** - प्रतिकूलेति। दुःखत्वजातिमत्, अधर्ममात्रासधारणकारणो गुणो वा दुःखम्। पदकृत्यं पूर्ववत्।

**पदकृत्यार्थः** - ''अहं दुःखी'' इति अनुभवसिद्धजातिमत् अधर्ममात्रं वा यस्य असाधारणकारणं स्यात् सः गुणविशेषः 'दुःखम्' इति कथ्यते। शत्रुदुःखस्य अपि प्रतिकूलवेदनीयत्वात् तत्र अतिव्याप्तिः भविष्यति। तस्याः निवारणाय लक्षणे 'सर्वेषाम्' इति पदं देयम्।

(20) इच्छादिगुणत्रयनिरूपणम् - **इच्छा कामः। क्रोधो द्वेषः। कृतिः प्रयत्नः।**

**पदकृत्यम्** - इच्छां निरूपयति-इच्छेति। काम इति पर्यायः। इच्छात्वजातिमती इच्छा। सा द्विविधा-फलेच्छा उपायेच्छा च। फलं सुखादिकम्। उपायो योगादिः।

द्वेषं निरूपयति-क्रोध इति। 'द्वेष्टि' इत्यनुभवसिद्धद्वेषत्वजातिमान्, द्विष्टसाधन ताज्ञान-जन्यगुणो वा द्वेषः।

प्रयत्नं निरूपयत-कृतिरिति। प्रयत्नत्वजातिमान् प्रयत्नः। स त्रिविधः प्रवृत्तिनिवृत्तिजीवनयोनिभेदात्। इच्छाजन्यो गुणः प्रवृत्तिः। द्वेषजन्यो गुणो निवृत्तिः। जीवनादृष्टजन्यो गुणो जीवनयोनिः। स च प्राणसञ्चारकारणम्।

**पदकृत्यार्थः** - इच्छायाः लक्षणम् इत्थम्; ''इच्छात्वजातिमती इच्छा''। तस्याः द्वौ भेदौ स्तः (अ) फलेच्छा (इ) उपायेच्छा चेति। (अ) फलेच्छा सुखादिः अस्ति। तत्प्राप्त्यर्थं (इ) यागादिः उपायेच्छा वर्तते। अन्यत् स्पष्टम्॥

(21) धर्माधर्मनिरूपणम् - **विहितकर्मजन्यो धर्मः। निषिद्धकर्मजन्यस्त्वधर्मः।**

वेदप्रतिपादितकृत्याकृत्यविवेकपूर्वकं यानि कर्माणि क्रियन्ते, तादृशकर्मद्वारा यः उत्पद्यते सः 'धर्म' इति कथ्यते। वेदे यद्विषये निषेधः कृतः तत् 'निषिद्धकर्म' इति कथ्यते। तस्मात् यस्य उत्पत्तिः भवति सः 'अधर्मः' इति।

**पदकृत्यम्** - धर्ममाह-विहितेति। वेदविहितेत्यर्थः। अधर्मवारणाय वेदविहितेति। यागादिक्रियावारणाय कर्मजन्य इति। च कर्मनाशाजलस्पर्शकीर्तनभोगतत्त्वज्ञानादिना नश्यति।

अधर्मलक्षणमाह निद्धिति। वेदेनेत्यर्थः। धर्मवारणाय वेदनिषिद्धेति। वेदनिषिद्धक्रियावारणाय कर्मजन्य इति। स च भोगप्रायाश्चित्तादिना नश्यति। एतावेव 'अदृष्टम्' इति कथ्यते, वासनाजन्यौ च। वासना च विलक्षणसंस्कारः।

**पदकृत्यार्थः** - धर्मः। यदि धर्मस्य लक्षणं 'कर्मजन्यो धर्मः' इति कुर्मः तर्हि कर्मजन्ये अधर्मे अपि लक्षणसमन्वयः भविष्यति। तन्मा भूत् तदर्थं 'वेदविहित-' इति पदम् आवश्यकम्।

यदि 'वेदविहितो धर्मः' इत्येव लक्षणं कुर्मः तर्हि यागादिक्रियाणाम् अपि वेदविहितत्वात् तत्र अतिव्याप्तिः

भविष्यति। तस्याः निवारणाय 'कर्मजन्य-' इति आवश्यकम् अस्ति। तस्य (धर्मस्य) कर्मनाशः इत्याख्यनदीजलस्पर्शात् उपवासात् कीर्तनात् भोगाच्च इत्यादिकारणात् नाशः भवति।

अधर्मः। यदि 'कर्मजन्यः अधर्मः' इत्येव लक्षणं कुर्मः तर्हि कर्मजन्यः तु धर्मः अपि अस्ति। अतः तत्र अतिव्याप्तिः भविष्यति। तस्मात् कारणात् 'वेदनिषिद्ध-' इति आवश्यकम् अस्ति। वेदनिषिद्धक्रियासु अतिव्याप्तेः निवारणं कर्तुं लक्षणे 'कर्मजन्यः' इति पदं प्रदत्तम्। अधर्मः, भोगप्रायश्चित्तादिभिः विनश्यति। धर्माधर्मौ एव 'अदृष्ट' 'वासनाजन्य' इति पदाभ्यां व्यवह्रियेते। 'वासना' इति विलक्षणः संस्कारः अस्ति।

(22) आत्मविशेषगुणप्रतिपादनम् - **बुद्ध्यादयोऽष्टावात्ममात्रविशेषगुणाः। बुद्धीच्छाप्रयत्ना द्विविधाः नित्या अनित्याश्च। नित्या ईश्वरस्य। अनित्या जीवस्य।**

बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः धर्मः, अधर्मः इति (प्रत्यक्षखण्डोक्ताः) अष्टौ विशेषगुणाः सन्ति ; ये केवलम् आत्मनि एव भवन्ति। तत्र बुद्धिः, इच्छा प्रयत्नश्च इत्येते त्रयः नित्याः अनित्याश्च ; इत्थं द्विविधाः सन्ति। एते ईश्वरे नित्याः भवन्ति जीवे च अनित्याः भवन्ति।

(23) संस्कारनिरूपणम् - **संस्कारस्त्रिविधः; वेगो भावना स्थितिस्थापकश्चेति। वेगः पृथिव्यादिचतुष्टयमनोवृत्तिः। अनुभवजन्या स्मृतिहेतुर्भावना। आत्ममात्रवृत्तिः। अन्यथाकृतस्य पुनस्तावदवस्थापादकः स्थितिस्थापकः। कटादिपृथिवीवृत्तिः।**

संस्कारस्य त्रयः भेदाः भवन्ति। (अ) वेगः (इ) भावना (उ) स्थितिस्थापकश्चेति। तत्र -

(अ) वेगः पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्येषु तथा च मनसि वर्तते।

(इ) यस्याः स्मृतेः उत्पत्तिः अनुभवद्वारा भवति सा 'भावना' इति कथ्यते। सा केवलम् आत्मनि एव भवति।

(उ) कस्यचित् पदार्थस्य मौलिकम् आकृत्यादिकं परिवर्तितं तथापि पुनः स्ववास्तविकाकृत्यादिकं प्रापयति तादृशः विशेषगुणः 'स्थितिस्थापकः' इति कथ्यते। यथा कटः संकलय्य (वेष्टनं कृत्वा) स्थापितः पुनः प्रसारितः स्वाकृतिं गृह्णाति तद्वत्।

**पदकृत्यम् - संस्कारं विभजते** - संस्कारेति। सामान्यगुणात्म-विशेषगुणोभयवृत्तिगुणत्वव्याप्यजातिमान् संस्कारः। घटादिवारणाय गुणत्वव्याप्येति। संयोगादिवारणाय आत्मविशेषगुणोभयवृत्तीति। ज्ञानादिवारणाय सामान्येति। द्वितीयादिपतनासमवायिकारणं वेगः। रूपादिवारणाय द्वितीयादिपतनेति। कालादिवारणाय असमवायीति।

भावनां लक्षयति - अनुभवेति। आत्मादिवारणाय प्रथमदलम्। अनुभवध्वंशवारणाय द्वितीयदलम्।

स्थितिस्थापकमाह - अन्यथेति। पृथिवीमात्रसमवेतसंस्कारत्वव्याप्तजातिमत्त्वं स्थितिस्थापकत्वम्। गन्धवत्त्वमादाय गन्धेऽतिव्याप्तिवारणाय संस्कारत्वव्याप्येति। भावनात्व-मादाय भावनावारणाय पृथिवीसमवेतेति। स्थितिस्थापकरूपान्यतरत्वमादाय रूपवारणाय जातीति। इति गुणा इति। द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः। द्रव्यकर्मणोरतिव्याप्तिवारणाय विशेषणदलम्। सामान्यादावतिव्याप्तिवारणाय विशेष्यदलम्।

**पदकृत्यार्थः** - संस्कारः। लक्षणे यदि 'गुणत्वव्याप्य-' इति अपाकुर्मः तर्हि घटादिषु अपि लक्षणसङ्गतिः भविष्यति। तन्मा भूत् तदर्थं 'गुणत्वव्याप्य-' इति आवश्यकम्। सामान्यविशेषोभयवृत्तिगुणत्वजातेः - आश्रयः तु घटादिः अपि अस्ति। संयोगत्वरूपसामान्यगुणाश्रयसंयोगादिषु अतिव्याप्तेः निवारणाय 'आत्मविशेषोभयगुणवृत्ति' इति पदं समाविष्टम् अस्ति। कारणम्, संयोगादयः आत्मनः विशेषगुणाः न सन्ति। ज्ञानादिषु अतिव्याप्तेः वारणाय 'सामान्य-' इत्यस्य ग्रहणम् अस्ति। कारणम्, ज्ञानादयः तु विशेषगुणाः सन्ति।

(अ) वेगः। यदि 'असमवायिकारणं वेगः' इत्येवं लक्षणं कुर्मः तर्हि रूपादिषु अतिव्याप्तिः भविष्यति। अतः तस्याः वारणायः 'द्वितीयादिपतन' इति आवश्यकम्। 'द्वितीयादिपतनकारणत्वं वेगत्वम्'। इत्थं लक्षणं कुर्मः तर्हि कालादौ अतिव्याप्तिः भविष्यति। अतः तस्याः वारणाय 'असमवायि' इति आवश्यकम्। कारणम्, कालादिः कार्यमात्रस्य साधारणकारणत्वेन भवति, न तु असमवायिकारणत्वेन।

(इ) भावना। यदि 'स्मृतिहेतुर्भावना' इत्येवं लक्षणं कुर्मः तर्हि आत्मनि अतिव्याप्तिः भविष्यति, तस्याः निवारणाय 'अनुभवजन्या' इति पदं प्रोक्तम्। कारणम्, आत्मा अपि स्मृतेः कारणं भवति। किन्तु अनुभवजन्यः नास्ति।

यदि 'अनुभवजन्या भावना' इत्येवं लक्षणं कुर्मः तर्हि अनुभवजन्यः तु अनुभवध्वंसः अपि भवति। तस्मात् कारमात् तत्र अतिव्याप्तिवारणाय 'स्मृतिहेतुः' इति आवश्यकम् अस्ति। सः (अनुभवध्वंसः) स्मृतेः हेतुः नास्ति।

(उ) स्थितिस्थापकः। यदि 'पृथिवीमात्रसमवेतजातिमत्त्वम्' इत्येव स्थितिस्थापकलक्षणं कुर्मः तर्हि पृथिवीमात्रवर्तिगन्धत्वजातेः आश्रयभूते गन्धे अतिव्याप्तिः भविष्यति। तस्याः निवारणाय 'संस्कारत्वव्याप्य' इति कथनम् आवश्यकम् अस्ति। यदि 'संस्कारत्वव्याप्यजातिमत्त्वम्' इत्येवं लक्षणं कुर्मः तर्हि संस्कारत्वव्याप्यजातिमती तु भावना अपि भवति। अतः तत्र लक्षणम् अतिव्याप्तं भवष्यिति। तस्मात् कारणात्, 'पृथीवीसमवेत इति आवश्यकम्। यदि पृथिवीमात्रसमवेतसंस्कारत्वव्याप्यत्वम्' इति लक्षणं कुर्मः तर्हि पृथिवीमात्रम् समवायसम्बन्धेन आश्रयीभूतसंस्कारत्वजातेः व्याप्तिविषयः 'स्थितिस्थापकः' 'रूपं' च अस्ति। अतः द्वयोः (रूपस्थितिस्थापकयोः) एकस्मिन् अतिव्याप्तिं वारयितुं 'जाति' इति पदं प्रदत्तम् अस्ति। कारणम्, रूपं संस्कारजात्याश्रयं नास्ति।

अवशिष्टगुणोपसंहारः। ''द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः'' इति गुणलक्षणम्। द्रव्ये कर्मणि च अतिव्याप्तिः मा भूत् तस्मात् कारणात् लक्षणे 'द्रव्यकर्मभिन्नत्वे सति' इति उक्तम्। यदि 'द्रव्यगुणकर्मभिन्नत्वं गुणत्वम्' इत्येव लक्षणं कुर्मः तर्हि सामान्यविशेषादिषु अतिव्याप्तिः भवष्यिति। तन्निवारणाय 'सामान्यवान्' इति विशेष्यपदं प्रदत्तम् अस्ति।

(24) सभेदं कर्मनिरूपणम् - **चलनात्मकं कर्म। ऊर्ध्वदेशसंयोगहेतुरुत्क्षेपणम्। अधोदेशसंयोगहेतुरपक्षेपणम्। शरीरसन्निकृष्टसंयोगहेतुराकुञ्चनम्। विप्रकृष्टसंयोगहेतुः प्रसारणम्। अन्यत्सर्वं गमनम्।**

पञ्च कर्माणि पूर्वोक्तानि यथा, (अ) उत्क्षेपणम्। (इ) अपक्षेपणम्। (उ) आकुञ्चनम्। (ऋ) प्रसारणम्। (लृ) गमनम्। एकस्य स्थलस्य संयोगः भवित अन्यस्य च वियोगः भवति, तत् चलनम्।

**पदकृत्यम्** - चलनेति। संयोगभिन्नत्वे सति संयोगसमवायिकारणं कर्म। हस्तपुस्तकसंयोगवारणाय सत्यन्तम्। घटादिवारणाय विशेष्यदलम्। ऊर्ध्वेति। अपक्षेपणवारणाय ऊर्ध्वेति। कालादिवारणाय असाधारणेत्यपि बोध्यम्। अधोदेशेति। उत्क्षेपणवारणाय अधोदेशेति। कालादिवारणाय असाधारणेत्यपि देयम्। शरीरेति। प्रसारणादिवारणाय शरीरसन्निकृष्टेति कालादिवारणाय असाधारणं देयम्। विप्रकृष्टेति। उत्क्षेपणादिवारणाय विप्रकृष्टेति। कालादिवारणाय असाधारणपदमप्यावश्यकम्।

**पदकृत्यार्थः** - कर्मणः लक्षणं व्याख्यायते। यदि कर्मलक्षणे 'संयोगासमवायिकारणं कर्म' इत्येवं कुर्मः तर्हि हस्तपुस्तकयोः संयोगः अपि असमवायिकारणं भवति। अतः तत्र अतिव्याप्तेः निवारणाय 'संयोगभिन्नत्वे सति' इति स्थापितम् अस्ति। यदि 'संयोगभिन्नत्वे सति' इत्येव केवलं लक्षणं कुर्मः तर्हि घटादयः अपि संयोगभिन्नाः, तेषु अतिव्याप्तिः भविष्यति। तन्निवारणाय 'संयोगासमवायिकारणम्' इति पदम् आवश्यकम् अस्ति।

(अ) उत्क्षेपणम्। केवलं 'संयोगहेतुः उत्क्षेपणम्' इत्येव लक्षणं कुर्मः तर्हि अपक्षेपणे अतिव्याप्तिः भविष्यति। तस्याः निवारणाय 'ऊर्ध्वदेश' इति आवश्यकम् अस्ति। उर्ध्वदेशसंयोगहेतुत्वेन कालादयः अपि सन्ति। अतः तत्र अतिव्याप्तिलक्षणदोषः मा भूत् तदर्थं 'असाधारण'- इत्यस्य समावेशः करणीयः।

(इ) अपक्षेपणम्। यदि 'संयोगहेतुः अपेक्षपणम्' इत्येवं लक्षणं कुर्मः तर्हि उत्क्षेपणे अतिव्याप्तिः भविष्यति। तस्मात् कारणात् 'अधोदेश-' इति आवश्यकम्। कालादिवारणाय... इत्यादिकं पूर्ववत्।

(उ) आकुञ्चनम्। प्रसारणादिषु अतिव्याप्तेः निवारणाय लक्षणे 'शरीरसन्निकृष्ट-' इति स्थापितम् अस्ति। कार्यमात्रस्य साधारणकारणेषु कालदिगात्ममनस्सु अतिव्याप्तिवारणाय 'असाधारण-' इति पदं स्थापनीयम्।

(ऋ) प्रसारणम्। यदि 'संयोगहेतुः प्रसारणम्' इत्येव लक्षणं कुर्मः तर्हि आकुञ्चनादिषु लक्षणं गमिष्यति। अतः तन्निवारणाय 'विप्रकृष्ट'- इति आवश्यकम्।

(लृ) इमानि चत्वारि कर्माणि विहाय यदवशिष्टं तेषां सर्वेषां कर्मणां (क्रियाणां) गमने अन्तर्भावः भवति।

(25) सामान्यस्य स्वरूपम् - **नित्यमेकमेकानुगतं सामान्यम्। द्रव्यगुणकर्मवृत्ति। तद् द्विविधम्, परापरभेदात्। परं सत्ता, अपरं द्रव्यत्वादिः।**

यद् नित्यम् एकं च भवति, तथापि अनेकेषु अनुगतं भवति, अर्थात् अनेकेषु धर्मेषु समवायसम्बन्धेन तिष्ठति, तत्

'सामान्यम्' इति कथ्यते। एतत् सामान्यं द्रव्यगुणकर्मसु भवति। सामान्यस्य द्वौ भेदौ स्तः (अ) परसामान्यम् (इ) अपरसामान्यं चेति। (अ) सत्तामात्रवृत्ति अधिकदेशव्याप्तं वा परसामान्यम्। (इ) द्रवत्वादिवृत्ति न्यूनदेशव्याप्तं वा अपरसामान्यम्।

**पदकृत्यम्** - नित्यमिति। संयोगादिवारणाय नित्यमिति। कालादिपरिमाणवारणाय अनेकेति। अनेकानुगतत्वं च समवायेन बोध्यम्। तेन नात्यन्ताभावेऽतिव्याप्तिः॥

**पदकृत्यार्थः** - सामान्यम्। यदि 'एकम् अनेकानुगतम्' इत्येव सामान्यस्य लक्षणं कुर्मः तर्हि संयोगे अतिव्याप्तिः स्यात्, कारणम्, संयोग अपि एकत्वे सति अनेकानुगतः भवति। अतः तत्र अतिव्याप्तेः निवारणाय 'नित्यम्' इति पदं प्रदत्तम् अस्ति। कारणम्, संयोगः अनित्यः भवति।

यदि 'नित्यम् एकं सामान्यम्' इत्येव लक्षणं कुर्मः तर्हि कालादीनां परिमाणस्य अपि नित्येषु एकभूतेषु च समावेशः भविष्यति। तन्मा भूत् तदर्थं 'अनेक' इति आवश्यकम्। अत्र 'अनेकानुगतत्वम्' समवायसम्बन्धेन तिष्ठति इति बोध्यम्। अनेकानुगतत्वस्य समवायसम्बन्धेन एव स्वरूपसम्बन्धः अस्ति, तस्मात् कारमात् अनेकानुगतात्यन्ताभावे लक्षणस्य अतिव्याप्तिः न भवति।

(26) विशेषस्य स्वरूपम् - **नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः।**

नित्यद्रव्येषु (कालदिगात्ममनस्सु) वर्तमानाः व्यावर्तकाः 'विशेषाः' कथ्यन्ते (ते अनन्ताः भवन्ति)।

**पदकृत्यम्** - नित्यद्रव्यवृत्तय इति। घटत्वादिवारणाय नित्यद्रव्यवृत्तय इति। आत्मत्वमनस्त्ववारणाय आत्मत्वमनस्त्वभिन्ना इत्यपि बोध्यम्।

**पदकृत्यार्थः** - यदि 'व्यावर्तकाः विशेषाः' इत्थमेवं लक्षणं कुर्मः तर्हि घटत्वादिषु अतिव्याप्तिः भविष्यति। कारणम्, तेऽपि पटत्वादीन् प्रति व्यावर्तकाः भवन्ति। अतः तेषु अतिव्याप्तिवारणाय 'नित्यद्रव्यवृत्तयः' इति पदम् आवश्यक अस्ति। 'आत्मत्वमनस्त्वभिन्नाः' इति पदस्य समावेशः करणीयः इति पदकृत्यकारस्य मतम् अस्ति।

(27) समवायनिरूपणम् - **नित्यसम्बन्धः समवायः, अयुतसिद्धवृत्तिः। ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थमपराश्रितमेवावतिष्ठते तावयुतसिद्धौ, यथा अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्तीविशेषनित्यद्रव्ये चेति।**

समवायः अयुतसिद्धपदार्थेषु भवति। ययोः द्वयोः पदार्थयोः मध्ये कश्चिद् एकः स्वावस्थायाः विनाशपर्यन्तं पराश्रितः भवति, तौ उभौ पदार्थौ अयुतसिद्धौ उच्येते। यथा - अवयवावयिनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती नित्यद्रव्यविशेषाः इति समवायसम्बन्धोदाहरणत्वेन गृह्यन्ते।

**पदकृत्यम्** - नित्येति। आकाशादिवारणाय सम्बन्ध इति। संयोगवारणाय नित्येति। स्वरूपसम्बन्धवारणाय तद्भिन्न इत्यपि बोध्यम्।

**पदकृत्यार्थः** - यदि 'नित्यः समवायः' इत्येवं लक्षणं कुर्मः तर्हि आकाशादयः अपि नित्याः सन्ति, अतः तेषामपि समावेशात् अतिव्याप्तिः भविष्यति। अतः तेषु अतिव्याप्तिवारणाय 'सम्बन्धः' इति पदम् आवश्यकम् अस्ति। यदि 'सम्बन्धः समवायः' इत्येव लक्षणं कुर्मः तर्हि संयोगे अतिव्याप्तिः भविष्यति। तस्मात् कारणात् तद्वारणाय 'नित्य' इति आवश्यकम्। कारणम् संयोगः अनित्यः अस्ति। स्वरूपसम्बन्धे अतिव्याप्तेः निवारणाय 'स्वरूपसम्बन्धभिन्नत्वे सति' इति पदं स्थापनीयम्। तेन इदं सिद्धं भवति यत्, समवायस्य लक्षणं 'स्वरूपसम्बन्धभिन्नत्वे सति नित्यसम्बन्धत्वं समवायत्वम्' इत्येव योग्यम् अस्ति।

(28) सभेदम् अभावनिरूपणम् - **अनादिः सान्तः प्रागभावः। उत्पत्तेः पूर्वं कार्यस्य।** यस्य आदिः न भवति किन्तु अन्तः भवति सः 'प्रागभावः' इति कथ्यते। स कार्यस्य उत्पत्तेः प्राक् भवति॥

**सादिरनन्तः प्रध्वंसः। उत्पत्त्यनन्तरं कार्यस्य।** यस्य आदिः भवति किन्तु अन्तः न भवति सः 'प्रध्वंसाभावः' इति कथ्यते॥

त्रैकालिकलसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। यथा भूतले घटो नास्तीति।

यः त्रिषु (भूतभविष्यवर्त्तमानेषु) कालेषु भवति, यः संसर्गयुक्त प्रतियोगितया युक्तः भवति सः 'अत्यन्ताभावः' इत्युच्यते। यथी - भूतले घटः नास्ति।

**तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः। यथा घटः पटो न भवतीति।**

यः तादात्म्यसम्बन्धयुक्तप्रतियोगितावान् भवति सः 'अन्योन्याभावः' इति कथ्यते। यथा घटः पटो नास्ति।

**पदकृत्यम्** - प्रागभावं लक्षयति-अनादिरिति। घटादिवारणाय प्रथमदलम्। परमाणुवारणाय द्वितीयदलम् पुनः प्रागभावः कस्मिन् कालेऽस्तीत्यत आह - उत्पत्तेरिति। कार्यस्योत्पत्तेः प्राक् स्वप्रतियोगिसमवायिकारणे वर्तते इत्यर्थः।

ध्वंसं लक्षयति-सादिरति। घटादिवारणाय अनन्त इति। आत्मादिवारणाय सादिरति। उत्पत्तीति। कार्यस्योत्पत्यनन्तरं स्वप्रतियोगिसमवायिकारणवृत्तिरित्यर्थः। स च 'ध्वस्तः' इति प्रत्ययविषयः।

अत्यन्ताभावं लक्षयति-त्रैकालिकेति। त्रैकालिकत्वे सति संसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः। ध्वंसप्रागभाववारणाय त्रैकालिकेति। भेदवारणाय संसर्गेत्यादि अन्योन्यभावं लक्षयति-तादात्म्येति। प्रागभावप्रध्वंसाभाववारणाय तादात्म्येति। अत्यन्ताभाववारणाय तादात्म्यत्वेन सम्बन्धो विशेषणीयः।

पदार्थज्ञानस्य परमप्रयोजनं मोक्ष इत्यामनन्ति। स च आत्यन्तिकैकविंशतिदुःखध्वंसस्येदानीमपि सत्त्वेनास्मदादीनामपि मुक्तत्वापत्तिवारणाय कालीनान्तम्। मुक्त्यात्मकदुःखध्वंसस्यान्यदीयदुःखप्रागभावसमानकालीनत्वाद् वामदेवादीनां मुक्तात्मनाम-प्यमुक्तप्रसङ्गात् स्वसमानाधिकरणेति प्रागभावविशेषणम्।

**दुःखानि चैकविंशतिः** - शरीरम्, षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, सुखं दुःखं चेति। दुःखानुषङ्गित्वा-च्छरीरादौ गौणदुःखत्वम्। तथा च 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुतेरात्मज्ञानसाधननिदिध्यासनमननसाधनत्वं पदार्थज्ञाने सञ्जाघटीति। एवं च तत्त्वज्ञाने सति शरीरपुत्रादावात्मत्व-स्वीयत्वाभिमानरूपमिथ्याज्ञानस्य नाशः, तेन दोषाभावः, तेन प्रवृत्त्यनुत्पत्तिः, ततस्तत्कालीनशरीरेण कायव्यूहेन वा भोगतत्त्वज्ञानाभ्यां प्रारब्धकर्मनाशः, ततो जन्माभावः॥

**पदकृत्यार्थः** - प्रागभावः। यदि 'सान्तः प्रागभावः' इत्येवं लक्षणं कुर्मः तर्हि सान्ताः (अन्तसहिताः/अन्तवन्तः) तु घटादयः अपि सन्ति। अतः तद्वारणाय 'अनादिः' इति पदम् आवश्यकम् अस्ति। यदि 'अनादिः' प्रागभावः इत्थं लक्षणं कुर्मः तर्हि परमाणुः अपि अनादिः अस्ति। अतः तत्र लक्षणसङ्गतिः मा भूत् (अतिव्यप्तिः मा भूत्) तदर्थं 'सान्तः' इति पदम् आवश्यकम् अस्ति। कारणम्; परमाणोः अन्तः न भवति।

प्रागभावः कस्मिन् काले भवति ? इत्यस्य स्पष्टतां करोति; ''कार्योत्पत्तेः पूर्वं प्रागभावः स्वप्रतियोगि-समावायिकारणे'' विद्यमानः भवति।

प्रध्वंसाभावः। यदि 'सादिः प्रध्वंसः' इत्येव केवलं लक्षणं कुर्मः तर्हि घटादिषु अतिव्याप्तिः भवेत्। कारणम्; सादिः तु घटादिः अपि अस्ति। अतः तद्वारणाय 'अनन्तं' इति पदम् आवश्यकम् अस्ति।

यदि 'अनन्तः प्रध्वंसः' इत्येव लक्षणं कुर्मः तर्हि अनन्ते भूते आत्मनि अपि लक्षणम् अतिव्याप्तं भवेत्; तस्मात् कारणात् 'सादि' इति पदस्थापनम् आवश्यकम्। कार्योत्पत्तेः पश्चात् स्वप्रतियोगिसमवायिकारणे अयम् अभावः विद्यमानः भवति। स च 'ध्वस्त' इत्येतत्प्रकारकः ज्ञानविषयः अस्ति। 'स्वप्रतियोगिकारणवृत्ति' इत्यस्य तात्पर्यम्; 'घट' रूपोदाहरणे स्व = ध्वंसः, तत्प्रतियोगी = ('यस्याभावः स प्रतियोगी' इति नियमानुसार) घटः, तस्य समवायिकारणं = कपालम्, अर्थात् कपाले प्रध्वंसाभावः विद्यमानः भवति॥

अत्यन्ताभावः। यदि 'संसर्गावच्छिन्नप्रतियोगिताकः' इत्येवं लक्षणं कुर्मः तर्हि ध्वंसप्रतियोगिनोः अतिव्याप्तिः भवेत्, कारणम्; तयोः (ध्वंसप्रतियोगिनोः) प्रतियोगिता अपि संसर्गावच्छिन्ना (संसर्गयुक्ता) भवति। अतः तन्निवारमाय 'त्रैकालिक-' इति आवश्यकम्। भेदे = अन्योन्याभावे लक्षणम् अतिव्याप्तं न स्यात् तदर्थं 'संसर्ग-' इति पदम् आवश्यकम्। अयं संसर्गः तादात्म्यसंसर्गभिन्नः ज्ञेयः॥

अन्योन्याभावः। यदि 'सम्बन्धावच्छिन्नप्रतियोगिताकः अन्योन्याभावः' इत्येवं लक्षणं कुर्मः तर्हि प्रागभाव-प्रध्वंसाभावयोः अतिव्याप्तिः भविष्यति। तस्मात् तद्वारणाय लक्षणे 'तादात्म्य-' इति आवश्यकम्। अत्यन्ताभावे लक्षणम् अतिव्याप्तं न स्यात् तदर्थं सम्बन्धविशेषणरूपे 'तादात्म्य-' इति समावेश्यम्।

(29) विषयोपसंहारः - **सर्वेषां पदार्थानां यथायथमुक्तेष्वन्तर्भावात् सप्तैव पदार्था इति सिद्धम्।**

इत्थम्; विश्वस्मिन् अस्मिन् स्थितानां सर्वेषां पदार्थानां यथायोग्यम् अत्र प्रतिपादेषु सप्तपदार्थेषु गौतमप्रतिपादितानां प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्तावयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छलजातिनिग्रहस्थानानां षोडशपदार्थानाम् अन्तर्भावः भवति। तेन सिद्धं भवति यत् सप्त एव पदार्थाः सन्ति॥

**काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये।**

**अन्नम्भट्टेन विदुषा रचितस्तर्कसङ्ग्रहः॥**

**पदकृत्यम्** - वैशेषिकदर्शनाचार्यः कणादः अस्ति तन्मतम्, तथा च गौतममुनिप्रभृति नैयायिकानां यन्मतम्, इत्येतयोः द्वयोः समन्वयपूर्वकम् ''अनधिगतन्यायशास्त्राणां बालानां व्युत्पत्तिज्ञानं भवतु'' इति प्रयोजनं स्वीकृत्य अन्नम्भट्टनाम्ना विदुषा अस्य तर्कसङ्ग्रहणस्य रचना कृता॥

**पदकृत्यार्थः** - पदार्थज्ञानस्य परमं प्रयोजनं मोक्षम् इत्यामनन्ति। स च आत्यन्तिकैकविंशतिदुःखध्वंसः। आत्यन्तिकत्वं च स्वसमानाधिकरणदुःखप्रागभावासमानका-लीनत्वम्। दुःखध्वंसस्येदानीमपि सत्त्वेनास्मदादीनामपि मुक्तत्वापत्तिवारमाय कालीनान्तम्। मुकत्यात्मकदुःखध्वंसस्यान्यदीयदुःखप्रागभावासमानकालीनत्वाद्वामदेवादीनां मुक्तात्मनामपि अमुक्तत्वप्रसङ्गात् स्वसमानाधिकरणेति प्रागभावविशेषणम्। दुःखानि चैकवंशतिः; शरीरम् षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, दुःखं सुखं च। दुःखानुषङ्गित्वाच्छरीरादौ गौण-दुःखत्वम्। तथा च ''आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'' इति श्रुतेः। आत्मज्ञानसाधननिदिध्यासनमननसाधनत्वं पदार्थज्ञाने सञ्चाघटीति। एवञ्च तत्त्वज्ञाने सति शरीरपुत्रादावात्मत्वस्वीयत्वाभिमानरूपमिथ्याज्ञानस्य नाशः। तेन दोषाभावः। तेन प्रवृत्त्यनुत्पत्तिः। ततस्तत्कालीनशरीरेण कायव्यूहेन वा भोगतत्त्वज्ञानाभ्यां प्रारब्धकर्मणां नाशः। ततो जन्माभावः।

**नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम्।**

**ज्ञानं च विमलीकुर्वन्नभ्यासेन च पाचयेत्॥**

**अभ्यासात्पक्वविज्ञानः कैवल्यं लभते नरः।**

इत्यादिवचनात् ''**तमेव विदित्वातिमृत्युमेति**'' **इति श्रुतेश्च।**

सगुणोपासनाकाशीमरणादेरपि तत्त्वज्ञानद्धारा मुक्तिहेतुत्वम्। अत एव परमेश्वरः काश्यां तारकमुपदिशतीति सारम्।

**पदकृत्यम्** - पदार्थज्ञानस्य परमं प्रयोजनम् अस्ति मोक्षः। स च मोक्षः आत्यन्तिकैकविंश-तिदुःखनां ध्वंसरूपः अस्ति। स्व = दुःख-समानाधिकरणे अर्थात् अधिकरणकाले दुःखस्य प्रागभावस्य अविद्यमानत्वम् आत्यन्तिकत्वम् इति कथ्यते। वर्तमाने अपि दुःखध्वंसस्य सत्तायाम् अपि अस्मादृशेषु अपि मुक्तत्वस्य आपत्तिः भविष्यति। फलस्वरूपेण लक्षणम् अतिव्याप्तं भवेत्। तन्मा भूत् तदर्थम् आत्यन्तिकलक्षणे 'कालीनान्त' इत्यस्य समावेशः कृतः। कस्यचित् पुरुषस्य मुक्तिस्वरुपदुःखध्वंसस्य अन्यपुरुषस्य दुःखप्रागभावस्य समानकालीनत्वात् वामदेवादिमुक्तजनेषु समुक्तत्वस्य प्रसङ्ग उपस्थितः भवेत्; तस्य निवारणाय प्रागभावस्य विशेषरूपेण 'स्वसमानाधिकरण' इत्यस्य समावेशः लक्षणे विहितः अस्ति। दुःखानि एकविंशतिः, यथा - शरीरम्, श्रोत्र-त्वक्-चक्षु-घाण-रसना-मनांसि इति षडिन्द्रियाणि, शब्द-स्पर्श-रूप-गन्ध-रस-दुखानि इति षड्विषयाः, षड् बुद्धयः, दुःखं सुखं चेति। दुःखस्य अनुषङ्गित्वेन स्थितेषु शरीरादिषु गौणं दुःखत्वम्। यथा ''आत्मा वा.....'' अर्थात् आत्मनः प्रदर्शनं श्रवणं मननं पुनः पुनः निःशेषेण ध्यानं च कर्त्तव्यम्; इति श्रुतेः अनुसारम् आत्मज्ञानेसाधनभूतानि इमानि चत्वारि पदार्थज्ञाने सङ्घटितानि भवन्ति। एतावत्तत्त्वज्ञानानन्तरं तत्त्वज्ञानवतः जनस्य शरीरे पुत्रादिषु आत्मत्व-स्वीयत्वादिकम् अभिमानस्वरूपं मिथ्याज्ञानं विनश्यति। फलस्वरूपेण सः जनः दोषरहितो भवति। यदा सः दोषरहितः भवति तदा तस्मिन् प्रवृत्तेः उत्पत्तिः न भवति। प्रवृत्तेः उत्पत्तेः अभावे तत्कालीनशरीरस्य कायव्यूहस्य वा माध्यमेन भोगतत्त्वज्ञानयोः परिमाणरूपेण प्रारब्धकर्मणाम् अपि विनाशः भवति। तस्मात् पुनर्जन्माभावः॥

**चक्रे चन्द्रजसिंहो हि पदकृत्यमिदं शुभम्।**

**परोपकारकरणं माधवो वीक्षतां परम्॥**

**॥ इति श्रीमत्तत्रभवदुरुदत्तसिंहशिष्यश्रीचन्द्रजसिंहविरचितं पदकृत्यम्॥**

**पदकृत्यार्थः** - चन्द्रजससिंह कल्याणकारस्य अस्य तर्कसंग्रहपदकृत्यस्य रचनां केवलं परोप-कारकरणाय एव कृतवान्। भगवान माधवः - अस्य परमस्य परोपकारकरणरूपस्य कार्यस्य अवलोकनं कुर्यात्॥

## स्वाध्यायः

**1. योग्यविकल्पं चित्वा उत्तराणि लिखत।**

(1) परामर्शजन्यं ज्ञानं किं कथ्यते ?

(क) अनुमानम् (ख) अनुमितिः (ग) परामर्शः (घ) व्याप्तिः।

(2) परार्थं स्वार्थं च इति कस्य प्रकारौ ?

(क) अनुमानस्य (ख) परामर्शस्य (ग) उपमानस्य (घ) अन्यस्य

(3) लिङ्गस्य कति प्रकाराः ?

(क) 4 (ख) 5 (ग) 3 (घ) 9

(4) उपमानस्य कति भेदाः ?

(क) 5 (ख) 3 (ग) 7 (घ) 6

(5) वाक्यं नाम किम् ?

(क) अर्थसमूहः (ख) पदसमूहः (ग) तिङ्समूहः (घ) एतेषु न

(6) वाक्यं कति विधम् ?

(क) 5 (ख) 3 (ग) 2 (घ) 8

(7) आकाङ्क्षा योग्यता सन्निधिश्च कस्मिन् हेतुः ?

(क) पदज्ञाने (ख) शब्दज्ञाने (ग) अर्थज्ञाने (घ) वाक्यार्थज्ञाने

**2. लघूतरं प्रदेयम्।**

(1) स्मृतेर्भेदौ लिखत।

(2) सुखस्य लक्षणं लिखत।

(3) शब्दः कः ?

(4) उपमितेर्लक्षणं लिखता।

(5) के पचावयवाः ?

(6) त्रिविधोपमानानि कानि ?

(7) धर्मस्य लक्षणं लिखत।

(8) केन तर्कसंग्रहः रचितः ?

**5. अधोलिखितानां प्रश्नानां सविस्तरम् उत्तरं लिखत।**

(1) आत्मनः अष्टाविशेषगुणाः के ?

(2) इच्छाद्वेषप्रयत्नानां लक्षणानि लिखत।

(3) अनुमानं स्पष्टयत।

(4) वाक्यस्य द्वौ भेदौ सोदाहरणं लिखत।

•

# सूत्रसूचिः वार्तिकसूचिश्च


( अ )

| | | |
|---|---|---|
| १. | अकथितं च | १ । ४ । ५१ ॥ |
| २. | अकर्तरि च कारके संज्ञायाम् | ३ । ३ । १९ ॥ |
| ३. | अकर्मकाच्च | १ । ३ । ४५ ॥ |
| ४. | अचो यत् | ३ । १ । ९७ ॥ |
| ५. | अतः कृकमिकंसकुम्भपात्रकुशाकर्णिष्वनव्ययस्य | ८ । ३ । ४६ ॥ |
| ६. | अनुनासिकस्य क्विझलोः क्ङिति | ६ । ४ । १५ ॥ |
| ७. | अनुपराभ्यां कृञः | १ । ३ । ९६ ॥ |
| ८. | अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् | ३ । ४ । १५ ॥ |
| ९. | अन्येभ्योऽपि दृश्यन्ते | ३ । २ । ७५ ॥ |
| १०. | अपह्नवे ज्ञः | १ । ३ । ४४ ॥ |
| ११. | अपादाने पञ्चमी | २ । ३ । २८ ॥ |
| १२. | अ प्रत्ययात् | ३ । ३ । १०२ । |
| १३. | अभिज्ञावचने लृट् | ३ । २ । ११२ ॥ |
| १४. | अभिप्रत्यतिभ्यः क्षिपः | १ । ३ । ८० ॥ |
| १५. | अरूर्द्विषदजन्तस्य मुम् | ६ । ३ । ६७ ॥ |
| १६. | अर्तिलूधूसूखनसहचर इत्रः | ३ । २ । १८४ ॥ |
| १७. | अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा | ३ । ४ । १८ ॥ |
| १८. | अवे तृस्त्रोघञ् | ३ । ३ । १२० ॥ |

( आ )

| | | |
|---|---|---|
| १९. | आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु | ३ । २ । १३४ ॥ |
| २०. | आतश्चोपसर्गे | ३ । १ । १३६ ॥ |
| २१. | आतोऽनुपसर्गे कः | ३ । २ । ३ ॥ |
| २२. | आतोयुक् चिण्कृतोः | ७ । ३ । ३३ ॥ |
| २३. | आतो युच् | ३ । ३ । १२८ ॥ |
| २४. | आत्ममाने खश्च | ३ । २ । ८३ ॥ |
| २५. | आधारोऽधिकरणम् | १ । ४ । ४५ ॥ |
| २६. | आने मुक् | ७ । २ । ८२ ॥ |
| २७. | आभीक्ष्ण्ये णमुल् | ३ । ४ । २२ ॥ |

( इ )

| | | |
|---|---|---|
| २८. | इगुपधज्ञाप्रीकिरः कः | ३ । १ । १३५ ॥ |
| २९. | इच्छा | ३ । ३ । १०१ ॥ |

( ई )

३०. ईद्यति ६ । ४ । ६५ ॥

३१. ईषद्दुस्सुषु ३ । ३ । १२६ ॥

( उ )

३२. उदश्चरः सकर्मकात् १ । ३ । ५३ ॥

३३. उदितो वा ७ । २ । ५६ ॥

३४. उपमानादाचारे ३ । १ । १० ॥

३५. उपसर्गे च संज्ञायाम् ३ । २ । ९९ ॥

३६. उपसर्गे घोः किः ३ । ३ । ९२ ॥

३७. उपाच्च १ । ३ । ८४ ॥

( ऊ )

३८. ऊतियूतिजूतिसातिहेतिकीर्तयश्च ३ । ३ । ९७ ॥

( ऋ )

३९. ऋहलोर्ण्यत् ३ । १ । १२४ ॥

४०. ऋदोरप् ३ । ३ । ५७ ॥

( ए )

४१. एजेःखश् ३ । २ । २८ ॥

४२. एतिस्तुशास्वृदृजुषः क्यप् ३ । १ । १०९ ॥

४३. एरच् ३ । ३ । ५६ ॥

( ओ )

४४. ओदितश्च ८ । २ । ४५ ॥

( क )

४५. कण्ड्वादिभ्यो यक् ३ । १ । २७ ॥

४६. करणे यजः ३ । २ । ८५ ॥

४७. कर्तरि कर्मव्यतिहारे १ । ३ । १४ ॥

४८. कर्तरि कृत् ३ । ४ । ६७ ॥

४९. कर्तृरीप्सिततमं कर्म १ । ४ । ४९ ॥

५०. कर्तृकरणयोस्तृतीया २ । ३ । १८ ॥

५१. कर्मणा यमभिप्रैति स सम्प्रदानम् १ । ४ । ३२ ॥

५२. कर्मणि द्वितीया २ । ३ । २ ॥

५३. कर्मण्यण् ३ । २ । १ ॥

५४. कर्मवत्कर्मणा तुल्यक्रियः ३ । १ । ८७ ॥

५५. कष्टाय क्रमणे ३ । १ । १४ ॥

५६. काम्यच्च ३ । १ । ९ ॥

५७. कालसमयवेलासु तुमुन् ३ । ३ । १६७ ॥

५८. कृञो हेतुताच्छिल्यानुलोम्येषु ३ । २ । २० ॥

| | | |
|---|---|---|
| ५९. | कृत्यल्युटो बहुलम् | ३ । ३ । ११३ ॥ |
| ६०. | कृत्याः | ३ । १ । ९५ ॥ |
| ६१. | क्तक्तवतू निष्ठा | १ । १ । २६ ॥ |
| ६२. | क्त्रेमम् नित्यम् | ४ । ४ । २० ॥ |
| ६३. | क्यचि च | ७ । ४ । ३३ ॥ |
| ६४. | क्यस्य विभाषा | ६ । ४ । ५० ॥ |
| ६५. | क्वसुश्च | ३ । २ । १०७ ॥ |
| ६६. | क्विप् च | ३ । २ । ७६ ॥ |
| ६७. | क्षायो मः | ८ । २ । ५३ ॥ |
| | **( ख )** | |
| ६८. | खित्यनव्ययस्य | ६ । ३ । ६६ ॥ |
| | **( ग )** | |
| ६९. | गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः | १ । ३ । ३२ ॥ |
| ७०. | गुरोश्च हलः | ३ । ३ । १०३ ॥ |
| ७१. | गेहे कः | ३ । १ । १४४ ॥ |
| | **( घ )** | |
| ७२. | घञि च भावकरणयोः | ६ । ४ । २७ ॥ |
| | **( च )** | |
| ७३. | चजोः कु घिण्ण्यतोः | ७ । ३ । ५२ ॥ |
| ७४. | चतुर्थी सम्प्रदाने | २ । ३ । १३ ॥ |
| ७५. | चरेष्टः | ३ । २ । १६ ॥ |
| ७६. | चिण् भावकर्मणोः | ३ । १ । ६६ ॥ |
| | **( छ )** | |
| ७७. | छ्वोः शूडनुनासिके च | ६ । ४ । १९ ॥ |
| ७८. | छादेर्घेऽद्व्युपसर्गस्य | ६ । ४ । ९६ ॥ |
| | **( ज )** | |
| ७९. | जल्पभिक्षकुट्टलुण्टवृङः षाकन् | ३ । २ । १५५ ॥ |
| ८०. | जहातेश्च क्त्वि | ७ । ४ । ४३ ॥ |
| ८१. | ज्वरत्वरस्रिव्यविमवामुपधायाश्च | ६ । ४ । २० ॥ |
| | **( ट )** | |
| ८२. | ट्वितोऽथुच् | ३ । ३ । ८९ ॥ |
| | **( ड )** | |
| ८३. | ड्वितः क्त्रिः | ३ । ३ । ८८ ॥ |
| | **( ण )** | |
| ८४. | ण्यासश्रन्थो युच् | ३ । ३ । १०७ ॥ |

| | | |
|---|---|---|
| ८५. | ण्वुल्तृचौ | ३ । १ । १३३ ॥ |
| | **( त )** | |
| ८६. | तत्पुरुषे कृति बहुलम् | ६ । ३ । १४ ॥ |
| ८७. | तनोतेर्यकि | ६ । ४ । ४४ ॥ |
| ८८. | तपोऽनुतापे च | ३ । १ । ६५ ॥ |
| ८९. | तयोरेव कृत्यक्तखलर्थाः | ३ । ४ । ७० ॥ |
| ९०. | तव्यत्तव्यानीयरः | ३ । १ । ९६ ॥ |
| ९१. | तितुत्रतथसिसुसरकसेषु च | ७ । २ । ५ ॥ |
| ९२. | तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् | ३ । ३ । १० ॥ |
| ९३. | तृन् | ३ । २ । १३५ ॥ |
| ९४. | तो सत् | ३ । २ । १२७ ॥ |
| | **( द )** | |
| ९५. | दधातेर्हिः | ७ । ४ । ४२ ॥ |
| ९६. | दाणश्च सा चेच्चतुर्थ्यर्थे | १ । ३ । ५५ ॥ |
| ९७. | दृढः स्थूलबलयोः | ७ । २ । २० ॥ |
| ९८. | दृशेः क्वनिप् | ३ । २ । ९४ ॥ |
| ९९. | दो दद्घोः | ७ । ४ । ४६ ॥ |
| | **( ध )** | |
| १००. | धातोः | ३ । १ । ९१ ॥ |
| १०१. | ध्रुवमपायेऽपादानम् | १ । ४ । २४ ॥ |
| | **( न )** | |
| १०२. | न क्त्वा सेट् | १ । २ । १८ ॥ |
| १०३. | न गतिहिंसार्थेभ्यः | १ । ३ । १५ ॥ |
| १०४. | नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः | ३ । १ । १३४ ॥ |
| १०५. | नपुंसके भावे क्तः | ३ । ३ । ११४ ॥ |
| १०६. | नमस्स्वस्तिस्वाहास्वधालंवषड्योगाच्च | २ । ३ । १६ ॥ |
| १०७. | न यदि | ३ । २ । ११३ ॥ |
| १०८. | नित्यवीप्सयोः | ८ । १ । ४ ॥ |
| १०९. | निवासचितिशरीरोपसमाधानेष्वादेश्च कः | ३ । ३ । ४१ ॥ |
| ११०. | निष्ठा | ३ । २ । १०२ ॥ |
| १११. | निष्ठायां सेटि | ६ । ४ । ५२ ॥ |
| ११२. | नेड्वशि कृति | ७ । २ । ८ ॥ |
| ११३. | नेर्विशः | १ । ३ । १७ ॥ |
| ११४. | नः क्ये | १ । ४ । १५ ॥ |

( त )

| | | |
|---|---|---|
| ११५. | पचो वः | ८ । २ । ५२ ॥ |
| ११६. | परिव्यवेभ्यः क्रियः | १ । ३ । १८ ॥ |
| ११७. | परेर्मृषः | १ । ३ । ८२ ॥ |
| ११९. | पुवः संज्ञायाम् | ३ । २ । १८५ ॥ |
| १२०. | पुंसि संज्ञायां घः प्रायेण | ३ । ३ । ११८ ॥ |
| १२१. | पूर्ववत्सनः | १ । ३ । ६२ ॥ |
| १२२. | पोरदुपधात् | ३ । १ । ९८ ॥ |
| १२३. | प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा | २ । ३ । ४६ ॥ |
| १२४. | प्राद्वहः | १ । ३ । ८१ ॥ |
| १२५. | प्रियवशे वदः खच् | ३ । २ । ३८ ॥ |

( भ )

| | | |
|---|---|---|
| १२६. | भञ्जेश्च चिणि | ६ । ४ । ३३ ॥ |
| १२७. | भावकर्मणोः | १ । ३ । १३ ॥ |
| १२८. | भावे | ३ । ३ । १८ ॥ |
| १२९. | भिक्षासेनादायेषु च | ३ । २ । १७ ॥ |
| १३०. | भुजोऽनवने | १ । ३ । ६६ ॥ |
| १३१. | भोज्यं भक्ष्ये | ७ । ३ । ६९ ॥ |
| १३२. | भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप् | ३ । २ । १७७ ॥ |

( म )

| | | |
|---|---|---|
| १३३. | मृजेर्विभाषा | ३ । १ । ११३ ॥ |
| १३४. | मृजेर्वृद्धिः | ७ । २ । ११४ ॥ |
| १३५. | मनः | ३ । २ । ८२ ॥ |
| १३६. | म्वोश्च | ८ । २ । ६५ ॥ |

( य )

| | | |
|---|---|---|
| १३७. | यजयाचयतविच्छपृच्छरक्षो नङ् | ३ । ३ । ९० ॥ |
| १३८. | युवोरनाकौ | ७ । १ । १ ॥ |

( र )

| | | |
|---|---|---|
| १३९. | रदाभ्यां निष्ठातो नः पूर्वस्य च दः | ८ । २ । ४२ ॥ |
| १४०. | रलो व्युपधाद्धलादेः संश्च | १ । २ । २६ ॥ |
| १४१. | राजनि युधि कृञः | ३ । २ । ९५ ॥ |
| १४२. | राल्लोपः | ६ । ४ । २१ ॥ |

( ल )

| | | |
|---|---|---|
| १४३. | लटः शतृशानचावप्रथमासमानाधिकरणे | ३ । २ । १२४ ॥ |

१४४. लट् स्मे ३ । २ । ११८ ॥

१४५. लिटः कानज्वा ३ । २ । १०६ ॥

१४६. लृटः सद्वा ३ । ३ । १४ ॥

१४७. ल्युट् च ३ । ३ । ११५ ॥

१४८. ल्वादिभ्यः ८ । २ । ४४ ॥

( व )

१४९. वर्तमानसामीप्ये वर्तमानवद्वा ३ । ३ । १३१ ॥

१५०. वासरूपोऽस्त्रियाम् ३ । १ । ९४ ॥

१५१. विड्वनोरनुनासिकस्याऽऽत् ६ । ४ । ४१ ॥

१५२. विदेः शतुर्वसुः ७ । १ । ३६ ॥

१५३. विपराभ्यां जेः १ । ३ । १९ ॥

१५४. विभाषा चिण्णमुलोः ७ । १ । ६९ ॥

१५५. व्याङ्परिभ्यो रमः १ । ३ । ८३ ॥

( श )

१५६. शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ३ । १ । १७ ॥

१५७. शास इदङ्हलोः ६ । ४ । ३४ ॥

१५८. शुषः कः ८ । २ । ५१ ॥

( ष )

१५९. षष्ठी शेषे २ । ३ । ५० ॥

१६०. षः प्रत्ययस्य १ । ३ । ६ ॥

( स )

१६१. सनाशंसभिक्ष उः ३ । २ । १६८ ॥

१६२. सप्तम्यधिकरणे च २ । ३ । ३६ ॥

१६३. सप्तम्यां जनेर्डः ३ । २ । ९७ ॥

१६४. समवप्रविभ्यः स्थः १ । ३ । २२ ॥

१६५. समस्तृतीयायुक्तात् १ । ३ । ५४ ॥

१६६. समानकर्तुकयोः पूर्वकाले ३ । ४ । २१ ॥

१६७. समासेऽनञ्पूर्वे क्त्वो ल्यप् ७ । १ । ३७ ॥

१६८. सहे च ३ । २ । ९६ ॥

१६९. साधकतमं करणम् १ । ४ । ४२ ॥

१७०. सार्वधातुके यक् ३ । १ । ६७ ॥

१७१. सुप आत्मनः क्यच् ३ । १ । ८ ॥

१७२. सुपो धातुप्रातिपदिकयोः २ । ४ । ७१ ॥

१७३. सुप्यजातौ णिनिस्ताच्छील्ये ३ । २ । ७८ ॥

१७४. सम्बोधने च २ । ३ । ४७ ॥

| | | |
|---|---|---|
| १७५. | संयोगादेरातो धातोर्यण्वतः | ८ । २ । ४३ ॥ |
| १७६. | स्त्रियां क्तिन् | ३ । ३ । ९४ ॥ |
| १७७. | स्यसिच्सीयुट्तासिषु भावकर्मणोरूपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च | १ । ४ । ५४ ॥ |
| १७८. | स्वतन्त्रः कर्ता | ३ । ३ । ९१ ॥ |
| १७९. | स्वपो नन् | १ । २ । १० ॥ |
| | **( ह )** | |
| १८०. | हलन्ताच्च | ३ । ३ । १२१ ॥ |
| १८१. | हलश्च | ६ । ४ । २ । |
| १८२. | हलः | ३ । ३ । १५६ ॥ |
| १८३. | हेतुहेतुमतोर्लिङ् | ६ । १ । ७१ ॥ |
| १८४. | ह्रस्वस्य पिति कृति तुक् | ६ । १ । ७० ॥ |

## वार्तिकसूचिः

१. ॠल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः

२. केलिमर उपसंख्यानम्

३. क्विब्चिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च

४. घञर्थे कविधानम्

५. मूलविभुजादिभ्यः कः

६. सम्पदादिभ्यः क्विप्

७. सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः

●●●